Table of contents

अध्यात्मग्रन्थावलिः

# सूत्रभाष्यार्थतत्त्वविवेचनी

## २

अध्यात्मप्रकाशकार्यालयः,
होळेनरसीपुरम्.

अध्यात्मग्रन्थावलिः

# सूत्रभाष्यार्थतत्त्वविवेचनी

तत्र

## जन्माद्यधिकरणभाष्यव्याख्या


व्याख्याननिर्मातारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः



क्रमाङ्कः १२१

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः,

होळेनरसीपुरम्.

१९६५

First Edition 1965
1000 Copies

All rights reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur

## PUBLISHERS' NOTE

The Sūtra-Bhāshyārtha-Tattva-Vivecanī, Part Second, now presented to the public, is like the first part, an original work in Sanskrit. It is an attempt to elucidate S'āṅkara-Bhāshya on the second Sūtra of the *S'ārīraka-Mīmāṁsā*. It is written on the same lines as the first part, and is intended to be a sequel to it.

Sri Swamiji has introduced, in the course of his commentary, certain discussions regarding views held by the followers of S'aṅkara now divided into two main sub-schools, as well as the followers of Sri Rāmānuja and Sri Madhva. While the main object is to bring out the superority of what he himself considers to be S'aṅkara's views, these criticisms are certainly thought-provoking and often illuminating. Looked at from this stand-point of view, therefore, there is reason to believe that the work might evoke a reaction on the part of modern scholars interested in comparative study of Vedanta no less than orthodox pandits of all the three schools prevalent in Southern India.

The Working Committee owe a deep debt of gratitude to a donor who prefers to remain anonymous, for financial help which has made the

publication possible. May the great Beneficent Being by whose grace this work has seen the light, inspire the Swamiji with ennobling thoughts and call for the response from other kindred generous souls to support the undertaking so that the remaining portion of this edifying series may see the light of day.

*Holenarsipur*
*15-7-1965*

*Y. NARASAPPA,*
*Chairman, A. P. Karyalaya.*

# INTRODUCTION

The reader is requested to go through my introduction to the *Vivecanī* on the *Jijñāsādhikarana-Bhāshya.* I have explained there at some length the importance of the first four Sūtras of the *S'ārīraka-Mīmāṁsā* as covering the whole ground-work of Vedanta as understood by S'aṅkara. I have also pointed out the circumstances that led me to undertake a new sub-commentary on that portion of S'aṅkara's Bhāshya, which sets forth the fundamentals of the Vedantic System.

The present work which relates to the Bhāshya on the second Sūtra, is a sustained attempt to clarify S'aṅkara's real position with regard to the Vedantic idea of *'causality'*, much on the same lines as were adopted in the previous *Adhikaraṇa* to explain the true nature of the '*knowledge*' of Brahman. In both cases it will be noted, S'aṅkara uses these terms knowledge and causality in a metaphysical sense. By knowledge, he means not a concept of something discrete, but the intuition of one's own self as Brahman, resulting after the elimination of all unreal *Upādhis* whose characteristics are wrongly super-imposed on the Self. Similarly, Brahman is said to be the 'cause' of the world not in the empirical sense of an invariable antecedent some-

thing which transforms itself into something else which is called its effect, but in the metaphysical sense of something which falsely *appears* as something else, while remaining intact all the same. This causal nāture is ascribed to Brahman only as a device in persuance of the method of the *Adhyāropa-apavāda Nyāya* to reveal Brahman's true nature as a metaphysical entity, One without a second, its apparent effect, the world, being really ever essentially one with it.

Another truth that has been made abundantly clear in the Bhāshya on the second Sūtra is that Brahman's being the sole cause of the world's birth, sustentation and dissolution is not provable by logical inference *(Anumāna-Pramāṇam)*, but can be realized only through intuition arising out of the Sruti-teaching supported by Vedic reasoning as distinguished from the pramāṇa known as inference.

One more teaching of S'aṅkara's that has been clarified here is that the so-called creation of the world by Brahman is no more than the differentiation into various names and forms (नामरूपाभ्यां व्याकरणम्) from their undifferentiated condition, and that these names and forms —whether differentiated or not — are only super impositions of Avidyā on Brahman which never

affect its true nature as the Absolute, free from all characteristics. Relative to the world of names and forms and the individual souls in it, Brahman is called *Is'vara* the Overlord, omniscient and omnipotent, and when Brahman is recommended in the S'rutis to be meditated upon as endowed with certain properties to modifications pertaining to those self-same names and forms, it is known as *Saguṇa* (Qualified), *Apara* (Lower) as contrasted with Brahman in itself which is *Nirguṇa* (free from all attributes), and *Para* (Higher). It is, however, to be remembered that Brahman is in no way rendered inferior by being thus spoken of as *Is'vara* or *Apara* or *Saguṇa-Brahma*. Accordingly S'aṅkara draws our attention to this fact, time and again by using the terms Para-Brahman, Is'vara, Parames'vara, and Paramatman indiscriminately for each of those aspects of Brahman when the context leaves no doubt as to which of them is meant.

As in the case of the previous *Adhikaraṇa*, I have tried to impress on the reader the significance of these and other doctrines not only in the body of the present sub-commentary but also in the Appendix which is devoted to the discussion of five different topics relevant to the subject-matter of the Sutra in hand. I am well aware

that some of the discussions raised in the Appendices and even in the body of the sub-commentary on the Sūtras, may not be easily intelligible to the beginner who would naturally prefer to get at the general drift of S'aṇkara's teaching rather than be lost in the maze of controversy, but the very aim of the present work as its name भाष्यार्थतत्त्वविवेचनी indicates is to present the special features of S'aṅkara's Bhashya after sifting them from extraneous teachings liable to be mistaken for S'aṅkara's owing to mis-interpretations of his followers or mis-interpretations of hostile schools. As to how far I have been successful in the attempt, the critical reader alone has to be the judge.

The Adhyatma Prakasha Karyalaya is to be congratulated on its prompt execution of neatly printing the work. For the many errors that have survived in proof-correction, my inadvertance and failing eye-sight are as much responsible as the composing staff.

I have as usual completely entrusted the work to the Chairman, Adhyatma Prakasha Karyalaya, Holenarsipur, for purposes of publishing and giving it a wide publicity.

Holenarsipur.
8-7-1965.

AUTHOR.

# प्रास्ताविकी विज्ञप्तिः

भगवतो नारायणस्य कृपाविशेषात् प्राकाश्यं नीत्वा समर्प्यते पाठकमहाशयानां विदुषां च करकमले अयं भाष्यार्थतत्त्वविवेचन्या द्वितीयो भागः। यस्मिन् खलु जन्माद्यधिकरणभाष्यार्थतत्त्वविवेको, निरस्तमायाः शुद्धशाङ्करवेदान्तप्रक्रियायाः विशेषस्वरूपम् आविष्कर्तुं यत्नश्च कृतोऽस्ति जगज्जन्मस्थितिभङ्गम् अधिकृत्य, यथैव पूर्वाधिकरणभाष्यार्थविवेकः कृतो ब्रह्मजिज्ञासातत्त्वम् अधिकृत्य ॥

## अत्र विवृता भगवत्पादीयप्रस्थानस्य विशिष्टा धर्माः –

अत्र प्राधान्येन निरूपितास्तु शाङ्करप्रस्थानगता विशेषा इमे – (१) अजाद्वयस्य निर्विशेषस्य ब्रह्मणः स्वरूपं निर्देष्टुम् अध्यारोपापवादप्रक्रियया तस्मिन् कार्यकारणविभागमादौ स्वीकृत्य, आकाशादिकस्य बहुप्रपञ्चस्य जगतः कार्यरूपस्य परमकारणरूपाद् ब्रह्मणः परमार्थतोऽनन्यत्वमेव ; प्रतीतरूपेण तस्य वाचारम्भणत्वात् – इत्यन्ते कार्यकारणविभागापह्नवे तात्पर्यं वेदान्तानाम् इत्यभ्युपगमः। (२) तयैव च प्रक्रियया अविद्याकल्पितनामरूपलक्षणं रूपभेदं मायिकमुररीकृत्यैव ब्रह्मणो जगज्जन्मादिकारणत्ववाचोयुक्तिः, स च रूपभेदः प्रतीतवेषेण ब्रह्मत्वतदन्यत्वाभ्यामनिर्वचनीयोऽपि स्वरूपतो निर्विशेषब्रह्मात्मैवेत्यवगमयितुमुपायत्वेनैवोपदिश्यत इत्यङ्गीकारः। (३) ब्रह्मणश्च यथोक्तं कारणत्वं नानुमानप्रमाणगम्यम्, ब्रह्मणोऽविषयत्वे सति तत्सम्बद्धत्वेन कार्यस्य जगतोऽग्रहणात्, किं तु श्रुतिप्रमाणैकगम्यम् : अनुमानविलक्षणः श्रौततर्कः, तदनुसारी लौकिकतर्कश्च केवलं कारणसमर्पकश्रुत्यर्थग्रहणदृढीकरणोपयोगिनौ – इति अध्यारोपापवादप्रक्रियावष्टम्भेनैव वादः। (४) ब्रह्मजिज्ञासायाः फलरूपानुभवावसानत्वम्, तादृशानुभवे च श्रुतिवाक्यस्यैवानुभवविशेषाणां तर्काणां च कारणत्वम् – इत्युपपादनम्। ५) यथोक्ताविद्याकल्पितनामरूपोपाधिपरिच्छेदापेक्षमेव ब्रह्मणि ईशित्रीशितव्य-

सर्वज्ञत्वादिव्यवहारः, नामरूपविकारधर्मैर्विशिष्टत्वेनोपासनायोपदिश्यमाने तु तस्मिन् अपरब्रह्मेत्यपराभिधानकसगुणेश्वरत्वव्यवहारः – इति वादश्चेति ॥

## अत्र प्रस्थानान्तरपरीक्षणप्रवृत्तौ हेतुः –

यद्यपि भाष्यवाक्यार्थतत्त्वविवेचनमेवात्र अभ्यर्हितं व्याख्यानप्रवृत्तौ निमित्तम्, तथापि भाष्यव्याख्यानव्याजेनैव भगवत्पादानुयायिभिरनुप्रवेशितानां प्रस्थानान्तरप्रक्रियाविशेषाणां परिमार्जनाय अत्रापि जिज्ञासाधिकरणभाष्यार्थतत्त्वविवेचन्यामिव यत्र आस्थितस्तत्र तत्र प्रसक्ततः । तथा भाष्यान्तरकर्तॄणामपि प्रस्थानान्तराभिनिविष्टानां भगवत्पादीयभाष्यप्रस्थानव्याख्यानप्रस्थानयोर्वैलक्षण्यमविविच्यानादत्य वा शाङ्करप्रस्थानदूषणे प्रवृत्तानाम् अभिनवानां केचन वादा अपि तत्र तत्र निराकृताः, परिशुद्धशाङ्करप्रस्थानसतत्त्वं बुभुत्सूनाम् अनुग्रहाय ॥

परिशिष्टे चिन्तिताः केचन विषया एतत्सूत्रसंबद्धा अपि अध्यायान्तरस्थितानां कतिचिद् भाष्यसंदर्भाणां संस्तवमपेक्षन्ते, प्रस्थानान्तरप्रक्रियाणां सामान्यपरिचयमपि । तदेतज्ज्ञानमप्यहम् अधिकरणाभिप्रायज्ञानपरिपूर्तये, अधीतसमग्रभाष्याणामपि भगवत्पादीयप्रक्रियां परिशुद्धरूपां स्वयमेव निर्धारयितुम् अशक्नुवताम् उपकाराय, निरपवादवेदान्तविज्ञानं सुनिश्चितवेदार्थं च काङ्क्षमाणानां कुशलमतीनां मुमुक्षूणां बुद्धिवैशद्याय च ग्रन्थभागमिमम् अनुबद्धवानस्मि ॥

तेनैतेन प्रयत्नेन भगवत्पादीयसंप्रदायानुसारिणी विशुद्धवेदान्तप्रक्रिया विधूतसकलदुर्व्याख्याकल्मषा, दूरीकृतभाष्यान्तराक्षेपदुरास्कन्दा तत्त्वजिज्ञासूनां हृदयमागच्छेदिति मम विश्वासः । तयानया यथापूर्वं सप्रश्रयं भक्तिपूर्वकं समर्पितया व्याख्यया यदि किञ्चिदपि प्रीताः प्रसन्ना भवेयुः श्रीभगवत्पादाः, तत एव धन्यं मन्येयात्मानमिति न पृथग् वक्तव्यम् ॥

इमं ग्रन्थं यथालिखितं सकृदवलोक्य संशोधने सहायीभूतानां (१) ब्रह्मश्री विठ्ठलशास्त्री वेदान्तशिरोमणीत्यादिबिरुदाङ्कितः, मद्रास्

सकलविद्यानिलयाधिगतपौरस्त्यविद्याप्रावीण्यप्रशस्तिपत्रश्च, (२) ब्रह्मश्री परकजे सुब्रह्मण्यभट्टः, वेदान्तशिरोमण्यादिविरुदाङ्कितः, (३) पण्डितप्रवरेत्यादिविरुदाङ्कितः, नानाशास्त्रेषु कृतपरिश्रमः, ब्रह्मश्री होसकेरे अनन्तमूर्तिशास्त्रिशर्मा च-इत्येतेषामुपकृतिं नारायणस्मरणपूर्वकम् इहोल्लिखामि। अत्र मम प्रमादवशात् संजातान् भाषादोषान् विचारक्रमदोषांश्च, मुद्रणदोषांश्चावशिष्टान् आविष्कृत्योपकर्तुं संप्रार्थ्यन्ते दोषज्ञाः, यथाहम् आधमर्ण्यप्रकटनपूर्वकं सर्वांस्तान् दोषान् संस्करणान्तरे दूरीकर्तुं प्रयतेय-इति ॥

विश्वावसुसंवत्सरे
आषाढ-शुक्लैकादश्याम्

सच्चिदानन्देन्द्रसरस्वतीभिक्षुः
व्याख्यानिर्माता

—:o:—

# विषयानुक्रमणिका

(कंसान्तर्गतयोः प्रथमा भाष्यखण्डसंख्या, द्वितीया तु पृष्ठसंख्या)


पत्रपार्श्वसंख्या

भाष्यम् १–५

१. सूत्रसंगतिः

ग्रन्थसंबन्धः (१–६) – भगवच्छब्दस्वारस्यम् (२–६) ६–७

२. सूत्रार्थः

जन्मादिशब्दार्थः (३–८) – जन्मस्थितिभङ्गेषु जन्मन आदित्वे युक्तिः (४–९) – 'अस्य' इति कृत्स्नजगन्निर्देशः (५–११) – षष्ठ्यर्थः (६–१२) – यतः पदार्थः (७–१३) – सूत्रवाक्यार्थः (८–१३) – ब्रह्मस्वभावः श्रुत्यैकसमधिगम्यः (९–१६) ८–१८

३. जगन्मात्रस्यैव जन्मादि सूत्रोक्तम्

यास्कपरिपठिता भावविकाराः कुतो न गृह्यन्ते (१०–१८) – ब्रह्मणः कारणत्वं जगतः कार्यत्वं च लोकदृष्टविलक्षणम् (११–२०) १८–२१

४. अब्रह्मकारणवादस्य निराकरणम्

ब्रह्मणो जगज्जन्मादिकारणत्वे आक्षेपः (१२–२२) – प्रधानादिकारणनिराकरणम् (१३–२३) – स्वभाववादनिरासः (१४–२४) – लक्षणवाक्यतात्पर्यविषये व्याख्यातृविमतिः तद्दूषणं च (१५–२६) – ईश्वरकारणवादोपपत्तिः (१६–२८) – उक्तप्रक्रियायाः श्रुत्यादिसंमतत्वोपपादनम् (१७–३०) – निर्विशेषस्य ब्रह्मणो जगत्कर्तृत्वादिलक्षणकारणत्वे आक्षेपपरिहारौ (१८–३२) – ब्रह्मस्वरूपाधिगमायैव जगज्जन्मादिकारणत्वम् अध्यारोप्यते (१९–३४) २१–३५

### ५. सूत्रं श्रुत्यनुगमार्थम्, नानुमानोपन्यासार्थम्


आनुमानिकेश्वरात् श्रौतेश्वरस्य वैलक्षण्यम् (२०–३५) – सूत्रेण नेश्वरानुमानम् उपन्यस्तम्, वेदान्तवाक्यमेव तु सूचितम् (२१–३६) ३५–३८


### ६. तर्कोऽपि ब्रह्मजिज्ञासायामपेक्ष्यते


तर्कस्तु उपकरणं मीमांसाशास्त्रस्य (२२–३९) – वेदान्तवाक्याविरोध्यनुमानस्वरूपम् (२३–४१) – श्रुत्यैव तर्कस्य उपकरणत्वं अङ्गीकृतम् (२४–४२) ३९–४३


### ७. ब्रह्मजिज्ञासायामेव अनुभवाद्यनुसरणे हेतुः


'श्रुत्यादयः प्रमाणं धर्मजिज्ञासायाम्' इति कोऽर्थः? (२५–४४) – ब्रह्मजिज्ञासाया अनुभवावसानत्वात् अनुभवादिप्रमाणापेक्षा (२६–४५) – अनुभवादयश्च यथासंभवं प्रमाणम् इत्यस्यार्थः (२७–४८) – जिज्ञास्यस्वरूपवैलक्षण्याच्च प्रमाणान्तरापेक्षा ब्रह्मजिज्ञासायाम् (२८–५०) ३५–५५


### ८. ब्रह्मणो वेदान्तातिरिक्तप्रमाणाविषयत्वे युक्तिः


केवलतर्कशरणानां शङ्का (२९–५५) – ब्रह्मणो वेदान्तेतरप्रमाणाविषयत्वम् (३०–५७)-अनुमानोपन्यासार्थतानिरासभाष्यव्याख्यानम्, एकीयम् (३१–५८) – यथोक्तव्याख्यानस्य सूत्रभाष्याभ्याम् असङ्गतत्वम् (३२–५९) – स्वोक्त्यसङ्गतं एकीयव्याख्यानम् (३३–६१) – वेदान्तवाक्यानुमानयोर्विषयविभागः(३४–६१) ५५–६३


### ९. सूत्रलिलक्षयिषितवेदान्तवाक्योदाहरणम्


सूत्रोपात्तलक्षणवाक्यविषये शङ्का (३५–६४) – विषयवाक्योदाहरणम् (३६–६४) – विषयवाक्ये भूतशब्दार्थविवेकः (३७–६७) – श्रुत्युपात्तनिर्णयवाक्यसार्थक्यम् (३८–६७) – आनन्दशब्दार्थविवेकः (३९–६८) – जगत्कारणवाक्यानि सर्वाण्यपि अत्र लिलक्षयिषितान्येव (४०–७५) ६३–७७

# जन्माद्यधिकरणे परिशिष्टचिन्ता


## १. अधिकरणभाष्यार्थसारः

अधिकरणे विचारविषयः (४१–७८) – अत्र संशयः (४२–७९) – पूर्वः पक्षः (४३–७९) – एकीयमतेन सिद्धान्तः (४४–८०) – अथ भाष्यकारसम्मतः सिद्धान्तः (४५–८२) ७८–८३

## २. जगत्कारणसतत्त्वविमर्शः

एकीयमतेन सूत्रस्थलक्षणवाक्यविभागः, तद्विमर्शश्च (४६–८३) – मतान्तरेण लक्षणसूत्रव्याख्यानम्, तद्विमर्शश्च (४७–८५) – श्रुत्यनुगमेन सूत्रार्थप्रदर्शनम् (४८–८६) – निर्विशेषस्य ब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणमिति कथम् ? (४९–८७) – माया-सतत्त्वे एकीयमतम् (५०–८८) – एकीयस्य मायावादस्य निरा-करणम् (५१–९१) – सिद्धान्ते ब्रह्मण एव जगत्कारणत्वोपपत्तिः (५२–९६) – सिद्धान्ते व्यावहारिककार्यकारणभावोपगमः कथम् ? (५३–९८) – सर्वज्ञानन्दादिशब्दभाक्त्वमपि ब्रह्मणो न स्वतः (५४–१०१) ८३–१०५

## ३. अनिर्वचनीयजगज्जन्मादिसतत्त्वम्

ब्रह्मकार्ययाथात्म्यज्ञापका दृष्टान्ताः (५५–१०५) – अनिर्वचनीय-वस्तूत्पत्तिवादः, तद्दूषणं च (५६–१०७) – नामरूपयोरनिर्वच-नीयत्वं कीदृशम् ? (५७–१०९) १०५–११३

## ४. अभिनववेदान्तिसम्मतपरिणामवादपरीक्षा

अभिनववेदान्तिकल्पना (५८–११३) – पूर्वपक्षिवेदान्तिभिः स्वपक्ष-विशदीकरणम् (५९–११४) – चिदचिच्छरीरकब्रह्मवादपरिशीलनम् (६०–११६) – चिदचिच्छरीरकब्रह्मवादे ब्रह्मलक्षणासंभवः (६१–११८) ११३–१२०

५. ईश्वरशब्दार्थनिरूपणम्

ब्रह्मणि ईश्वरशब्दप्रयोगः कथम् ? (६२–१२०) – व्याख्यानप्रस्थानीय-मतभेदाः, तत्रेश्वरकारणवादस्यैवात्र विमर्शनीयत्वं च (६३-१२१) – सगुणेश्वरकारणत्ववादिनां मतम् (६४–१२२) – सगुणेश्वर-कारणवादस्य दूषणम् (६५-१२४)–मुक्तस्य सगुणेश्वरभावापत्ति-रित्यपि न सम्यक् (६६–१२५) – प्रजापतिवाक्यस्यैदम्पर्यम् (६७–१२८) – सिद्धान्ते ब्रह्मणि कारणत्वेश्वरत्वादिकल्पनप्रकारः (६८–१३१) – सगुणनिर्गुणब्रह्मसतत्त्वम् (६९–१३६) – प्रजापतिवाक्ये निर्गुणमेव ब्रह्म प्रतिपाद्यते (७०–१३८) – प्रजापतिवाक्ये श्रूयमाणायाः स्वरूपेणाभिनिष्पत्तेः सतत्त्वम् (७१–१४०) १२०–१४३

६. उपसंहारः १४३–१४५

# संकेताक्षरविवरणम्

सूचना – उपनिषदः तत्तन्नामप्रथमाक्षरेणैव सूचिताः । छां० भा० इत्यादि-सङ्केतास्तु तत्तद्भाष्यवाक्यपरामर्शकाः ॥

| सङ्केतः | विवरणम् |
| --- | --- |
| इ० सि० | इष्टसिद्धौ, बरोडा मुद्रितायाम् |
| ऋ० | ऋग्वेदसंहितायाम् |
| खं० | खण्डे, विवेचनीविभागात्मके |
| गी० | भगवद्गीतासु |
| गौ० का० | गौडपादीयकारिकासु |
| जि० भा० त० खं० | जिज्ञासाधिकरणभाष्यार्थतत्त्वविवेचन्याम्, खण्डे |
| जै० सू० | जैमिनीयसूत्रेषु |
| तै० आ० | तैत्तिरीयारण्यके, आनन्दाश्रममुद्रिते |
| ना० | तैत्तिरीयनारायणोपनिषदि |
| न्या० वा० | न्यायवार्तिके, वाराणसीस्थचौखम्बाकार्यालयमुद्रिते |
| नि० | निरुक्ते (यास्कप्रणीते), मुम्बय्यां वेङ्कटेश्वरमुद्रणालयप्रकाशिते |
| पा० | पत्रपार्श्वे, यथायोगं काश्यां हितचिन्तकमुद्रणालयमुद्रिते |
| | दशोपनिषद्भाष्यसंग्रहे, मुम्बय्यां निर्णयसागरमुद्रिते सूत्रभाष्ये वा |
| बृ० मा० | बृहदारण्यकोपनिषदि माध्यन्दिनपाठानुसारिण्याम् |
| बृ० वा० | बृहदारण्यकवार्तिके, आनन्दाश्रममुद्रिते |
| ब्र० सि० | ब्रह्मसिद्धौ, मद्रास्नगर्यां राजकीयमुद्रणालयमुद्रिते |
| वि० पु० | विष्णुपुराणे |
| वे० सू० | वेदान्तसूत्रेषु |
| श्री० भा० | श्रीभाष्ये, मद्रास्नगर्यां आर्० वेङ्कटेश्वरकंपनी इत्येतैः मुद्रिते |
| सू० भा० | भगवत्पादीयब्रह्मसूत्रभाष्ये |

# अशुद्धिशोधनम्

अ = अधरोत्तरं गणने

| पृष्ठे | पंक्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| २७ | ५ | प्रधान | प्रधानादि |
| ३० | अ. २ | अत्र | तत्र |
| ३२ | ६ | उपपादनीयम् । | उपपादनीयं |
| ३२ | अ. ५ | कल्पित नामरूप | कल्पितनामरूप |
| ३६ | ८ | पत्यधिकरण | पत्यधिकरणपूर्वपक्ष |
| ३७ | ६ | नानुमानम् । | नानुमानम् |
| ४३ | ५ | अत्र यथा दृष्टान्ते | ' अत्र मैत्रेयीब्राह्मणे दुन्दुभ्यादिदृष्टान्तैः यथा शब्दविशेषाः शब्दसामान्यात् पृथग् निर्भिद्य ग्रहीतुं न शक्यन्त इति तद्व्यतिरेकेण न सन्तो भवितुमर्हन्ति, एवं सर्वत्रानुगतचिद्रूपात् पृथग् निर्भिद्य ग्रहीतुं न शक्यन्ते नामरूपविकारभूताः पदार्थविशेषाः इति न तद्व्यतिरेकेण वस्तुसन्त – इत्येतत् प्रतिपिपादयिषितं श्रुत्या स्वानुगृहीततर्कद्वारेण इति स्पष्टमेव । छान्दोग्ये तु यथा दृष्टान्ते गन्धारदेशीयः ' (इति संयोज्यम् ) |
| ४८ | अ. ७ | लौकिकान् | तर्कान् लौकिकान् |
| ५६ | अ. ५ | न च | अतः |
| ५६ | अ. ४ | ब्रह्मणा | ब्रह्मणः |
| ५९ | अ. २ | शेषस्वैरू | शेषवैरू |
| ६५ | अन्तिमपंक्तौ | वाक्यार्थसरणिः | वाक्यार्थनिर्णयसरणिः |

| पृष्ठे | पंक्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| ६६ | ९ | तद्विजिज्ञासस्व । | तद्विजिज्ञासस्व |
| ६६ | अ. ८ | पित्र | पितृ |
| ६७ | अ. ९ | जन्याद्य | जन्माद्य |
| ७० | अ. ४ | व्याफरणा | व्याकरणा |
| ७१ | अ. ८ | लक्ष्यते । | लक्ष्यते |
| ७२ | ४ | वारणाय | वारणाय च |
| ७४ | ७ | आपेक्षित | आपेक्षिक |
| ७५ | १० | संस्पर्षि | संस्पर्शि |
| ७९ | अ. ३ | लभते । | लभते |
| ८६ | १ | सत् | सत् तत् |
| ९१ | अ. ७ | पर्यायाः | पर्यायाः । |
| ९५ | ४ | केति वचन | केतिवचन |
| ९७ | २ | बृ. वा. | बृ. |
| ११० | अ. ३ | स्यादाभास- | स्युराभास- |
| १११ | ८ | शुक्त्यादि | शुक्त्यादि, तद्व्यतिरेकेण च |
| ११३ | ८ | तु 'सच्च त्याच्चाभवत्' इति | 'सच्च त्यच्चाभवत्' इति तु |
| ११४ | अ. ५ | ब्रह्मोपादानत्वेऽपि | **ब्रह्मणश्चिदचितोश्च शरीरशरीरिभावसंबन्धः प्रसिद्ध एव, अन्तर्यामिब्राह्मणादिश्रुतिभ्यः । ब्रह्मोपादानत्वेऽपि** (इतिसंयोजनीयम्) |
| ११८ | अ. ५ | नातिशय | सातिशय |
| १२७ | अ. २ | जीवान्तरगर्भितः | जीवान्तराविद्यागर्भितः |

॥ ॐ ॥

श्रीशङ्करभगवत्पादविरचितं

# शारीरकमीमांसाभाष्यम्

## प्रथमाध्याये प्रथमः पादः

तत्र

# २. जन्माद्यधिकरणम्

### सूत्रसङ्गतिः

१. ब्रह्म जिज्ञासितव्यम् इत्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्मेति ? अत आह भगवान् सूत्रकारः । 'जन्माद्यस्य यतः' ॥

### सूत्रार्थः

२. जन्म उत्पत्तिः, आदिरस्य – इति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभङ्गं समासार्थः ॥

जन्मनश्च आदित्वं श्रुतिनिर्देशापेक्षम्, वस्तुवृत्तापेक्षं च । श्रुतिनिर्देशस्तावत् 'यतो वा इमानि भूतानि जायन्ते' (तै. ३–१) इत्यस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि । जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात् ॥

'अस्य' इति प्रत्यक्षादिसंनिधापितस्य धर्मिणः इदमा निर्देशः । षष्ठी जन्मादिधर्मसंबन्धार्था ॥

'यतः' इति कारणनिर्देशः ॥

अस्य जगतः, नामरूपाभ्यां व्याकृतस्य, अनेककर्तृभोक्तृसंयुक्तस्य, प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसापि अचिन्त्यरचनारूपस्य, जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति 'तद् ब्रह्म' इति वाक्यशेषः ॥

## जगन्मात्रस्यैव जन्मादि सूत्रोक्तम्

३. अन्येषामपि भावविकाराणां त्रिष्वेव अन्तर्भावः – इति जन्मस्थितिनाशानाम् इह ग्रहणम् । यास्कपरिपठितानां तु 'जायते', 'अस्ति'– इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वात् मूलकारणात् उत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युः—इत्याशङ्क्येत ; तन्माशङ्कि इति या उत्पत्तिर्ब्रह्मणः, तत्रैव स्थितिः, प्रलयश्च – त एव गृह्यन्ते ॥

## अब्रह्मकारणवाददूषणम्

४. न यथोक्तविशेषणस्य जगतः यथोक्तविशेषणम् ईश्वरं मुक्त्वा अन्यतः प्रधानादचेतनात्, अणुभ्यः, अभावात् संसारिणो वा –उत्पत्त्यादि संभावयितुं शक्यम् । न च स्वभावतः, विशिष्टदेशकालनिमित्तानाम् इह उपादानात् ॥

## सूत्रं श्रुत्यनुगमार्थम्, नानुमानाद्युपन्यासार्थम्

५. एतदेव अनुमानं संसारव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः। ननु इहापि तदेव उपन्यस्तं जन्मादिसूत्रे। न। वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैः, उदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता॥

## तर्कोऽपि ब्रह्मजिज्ञासायाम् अपेक्ष्यते

६. सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत्, न निवार्यते। श्रुत्यैव च सहायत्वेन तर्कस्य अभ्युपेतत्वात्। तथा हि 'श्रोतव्यो मन्तव्यः' (बृ. २–४–५) इति श्रुतिः, 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान् पुरुषो वेद' (छां. ६–१४–२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति॥

## ब्रह्मविद्यायामेव अनुभवादिप्रमाणानुसरणे हेतुः

७. न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्; किं तु श्रुत्यादयः, अनुभवादयश्च यथासंभवम् इह प्रमाणम्। अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षा अस्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्। पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म; यथा अश्वेन गच्छति, पद्भ्याम्,

अन्यथा वा, न वा गच्छति—इति। तथा 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति', 'उदिते जुहोति, अनुदिते जुहोति' इति ॥

विधिप्रतिषेधाश्च अत्र अर्थवन्तः स्युः; विकल्पोत्सर्गापवादाश्च। न तु वस्तु 'एवम्, नैवम्', 'अस्ति, नास्ति' इति वा विकल्प्यते। विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः; न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्, किं तर्हि, वस्तुतन्त्रमेव तत्। न हि स्थाणौ एकस्मिन् 'स्थाणुर्वा, पुरुषः, अन्यो वा' इति तत्त्वज्ञानं भवति। तत्र पुरुषः, अन्यो वा—इति मिथ्याज्ञानम्। 'स्थाणुरेव' इति तत्त्वज्ञानम्, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव। भूतवस्तुविषयत्वात् ॥

## ब्रह्मणो वेदान्तातिरिक्तप्रमाणाविषयत्वे युक्तिः

८. ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता। न। इन्द्रियाविषयत्वेन संबन्धाग्रहणात्। स्वभावतो विषयविषयाणि इन्द्रियाणि न ब्रह्मविषयाणि। सति हि इन्द्रियविषयत्वे ब्रह्मणः 'इदं ब्रह्मणा संबद्धं कार्यम्' इति गृह्येत; कार्यमात्रमेव तु गृह्यमाणम्, किं ब्रह्मणा संबद्धम्, किम् अन्येन केनचिद् वा संबद्धम्?—इति न शक्यं निश्चेतुम्। तस्मात् जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि, वेदान्तवाक्यप्रदर्शनार्थम् ॥

## सूत्रलिलक्षयिषितं वेदान्तवाक्यम्

९. किं पुनस्तद् वेदान्तवाक्यं यत् सूत्रेण इह लिलक्षयिषितम्

'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्युपक्रम्य आह – 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्मेति ॥' (तै. ३-१) । तस्य च निर्णयवाक्यम् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति '(तै. ३–६) । अन्यान्यपि, एवञ्जातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि ॥

इति जन्माद्यधिकरणभाष्यम्

॥ ॐ ॥

# सूत्रभाष्यार्थतत्त्वविवेचनी

अजोऽपि सन्नव्ययात्मा कूटस्थानन्द एव सन् ।
जायते सर्वभूतैर्यस्तं वन्दे मायिनं परम् ॥

## १. सूत्रसङ्गतिः

ब्रह्म जिज्ञासितव्यम् इत्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्मेति ?
अत आह भगवान् सूत्रकारः – 'जन्माद्यस्य यतः' ॥

१. ग्रन्थसंबन्धः – नमो बादरायणाय ! नमः शङ्कराय अथ सूत्रसङ्गतिमाह भाष्यकारः 'ब्रह्म जिज्ञासितव्यम् इत्युक्तम्' इत्यादिना । 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे नित्यानित्यविवेकादि-साधनसंपत्तिमता अधिकारिणा ब्रह्मजिज्ञासा कर्तव्या, ब्रह्मज्ञानस्य परमपुरुषार्थदायित्वात्–इत्युक्तम् इत्यर्थः । तत्र ब्रह्मणोऽनिर्धारित-स्वरूपविशेषस्य स्वरूपसमर्पणसमर्थं श्रुत्युदाहृतं ब्रह्मलक्षणमाह सूत्रकारः 'जन्माद्यस्य यतः' इति । तदाह 'किंलक्षणं पुनस्तद्ब्रह्म ?' इत्यादिना ॥

२. भगवच्छब्दस्वारस्यम् – अत्र सूत्रितं जगज्जन्मादि-कारणत्वरूपं लक्षणं किं कार्येण कारणानुमानविधया तर्कितनिमित्त-

कारणीभूततटस्थेश्वरसमर्पकम्, किं वा 'तदात्मानं स्वयमकुरुत' (तै. २–७) इति श्रुत्यक्षरानुगुण्येन जगद्रूपेण परिणममानब्रह्मसमर्पकम्, आहोस्वित् 'मायिनं तु महेश्वरम्' (श्वे. ४–१०) इति श्रुत्यनुगमात् सर्वजगज्जन्मादिविकल्पास्पदकूटस्थब्रह्मसमर्पकम् ? – इति संशयः समुपजायते। वादिविप्रतिपत्तिदर्शनात्। तत्र तृतीय एव पक्षो निरवद्यः सर्वश्रुत्यर्थनिराकुलत्वाय ग्राह्यः। 'यतो वा इमानि भूतानि जायन्ते' (तै. ३–१) इत्यादीनां जगत्कारणवादिनीनां श्रुतीनाम् एवमेव सामञ्जस्यसिद्धेः। ब्रह्मलक्षणत्वं चास्य सर्वभूतोत्पत्त्यादिकारणत्वस्य, सर्वतो व्यावृत्तवस्तुस्वरूपविशेषसमर्पकत्वमेव नान्यत्–इत्यभिसंदधानो भाष्यकारः, सर्वज्ञकल्पाया भगवत्याः श्रुतेर्हृदयं सर्वज्ञकल्पा एव विज्ञातुं प्रभवन्ति नान्यादृशा इत्यभिप्रायेण सूत्रकारं भगवच्छब्देन पूजयन्नाह '**किंलक्षणं पुनस्तद् ब्रह्म – इत्यत आह भगवान् सूत्रकारः**' इति। स्मरन्ति हि 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥' (वि. पु. ६–५–७८) इति। निर्णीयन्ते च न्यायेनात्र सूत्रसंदर्भे श्रुतिप्रतिपादिता भूतानामुत्पत्त्यादयः – इति साभिप्रायमिदं विशेषणम् ॥

## २. सूत्रार्थः

**जन्म उत्पत्तिः, आदिरस्य – इति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थितिभङ्गं समासार्थः ॥**

जन्मनश्च आदित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत्, 'यतो वा इमानि भूतानि जायन्ते' (तै. ३–१) इत्यस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात्॥

'अस्य' इति प्रत्यक्षादिसंनिधापितस्य धर्मिण: इदमा निर्देशः। षष्ठी जन्मादिधर्मसंबन्धार्था॥

'यतः' इति कारणनिर्देशः॥

अस्य जगतः नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसापि अचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद् ब्रह्म इति वाक्यशेषः॥

३. जन्मादिशब्दार्थः – अथ सौत्रपदार्थकथनपूर्वकं सूत्रवाक्याशयं विवरीतुकामः, जन्मादिपदं तावद् विगृह्णन् व्याचष्टे – 'जन्म उत्पत्तिः आदिरस्य–इति तद्गुणसंविज्ञानो बहुव्रीहिः' इति। अस्मिन् समासार्थे विशेषणीभूतजन्मपदार्थोऽपि संविज्ञायते, न तु 'जन्मादी' इति जन्मव्यतिरिक्तौ स्थितिलयावेव विशेष्यभूतौ परिगृह्येते 'चित्रगुः' इत्यादिषु विशेषणीभूतचित्रगोव्यतिरिक्त एव तद्वान् देवदत्तो यथा–इत्यभिप्रायः। तथा च अन्तर्णीतजन्मैव

समाहारः समासार्थ इत्याह – '**जन्मस्थितिभङ्गं समासार्थः**' इति । जन्मस्थितिभङ्गानां समाहारस्यैव कार्यत्वेन स्वीकारेण केवलं जन्मकारणत्वम्, स्थितिकारणत्वम्, भङ्गकारणत्वं वा न लक्षणत्वेन विवक्षितमिति भाष्यकाराभिप्रायो गम्यते । एतेन हि ब्रह्मणो जगदुपादानकारणत्वमपि लभ्यते । एतच्च परस्तात् स्वावसरे सूत्रकार एव सोपपत्तिकं प्रदर्शयिष्यति '**प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्**' (सू. भा. १–४–२३) इत्यादिना । उपादानकारणत्वावरोधस्य यथा ब्रह्मस्वरूपसमर्पकत्वं तथा इहैव लक्षणवाक्यार्थतत्त्वविवेचनावसरे निपुणतरमुपपादयिष्यामः ॥

४. **जन्मस्थितिभङ्गेषु जन्मन आदित्वे युक्तिः** – ननु 'जन्मादि' इति जन्मन एव आदित्वं किमाशयेनोच्यते ? यावता जगज्जन्मस्थितिप्रलयानां बीजाङ्कुरवद् हेतुहेतुमद्भावस्य 'उपपद्यते चाप्युपलभ्यते च' (वे.सू. २–१–३६) इति संसारस्यानादित्वोपपादनप्रसङ्गेन सूत्रकारेणैव निर्देक्ष्यमाणत्वात्, स्थितेः प्रलयस्य वा यथेच्छमादित्व स्वीकारोऽपि संभवत्येव–इत्याशङ्क्य जन्मन एवादित्वाङ्गीकारे उपपत्तिं दर्शयति–'**जन्मनश्च आदित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च**' इति । श्रुतिनिर्देशं तावदुदाहरति–'**श्रुतिनिर्देशस्तावत्**' इत्यादिना । '**इत्यस्मिन् वाक्ये**' इत्युपप्रदर्शनार्थम् । 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६–८–४), 'तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' (मुं. २–१–१) इत्यादिवाक्येष्वपि तथैव क्रमदर्शनात्–इति द्रष्टव्यम् । एवं च जगज्जन्मादि-

2

कारणत्वस्य शब्दप्रमाणकत्वाद् यथाशब्दमेव तदभ्युपगन्तव्यमित्यतः श्रुतिनिर्देशापेक्षमेतज्जगज्जन्मन आदित्वं परिगृहीतमिति गम्यते – इति भावः । ननु शब्देनापि न शक्यते अनुभवानुसारी न्यायोऽपलपितुम् । दर्शितश्च न्यायः सृष्टिस्थितिप्रलयानां बीजाङ्कुरवद् हेतुहेतुमद्भावे इत्यतो न श्रुतिनिर्देशमात्रम् अत्र कारणविशेषो भवितुमर्हति–इति चेत्, तत्रोत्तरम् ‘ **वस्तुवृत्तमपि** ’ इति । अयमभिप्रायः – श्रुतिनिर्देशेन तावदिदं प्रयोजनं लभ्यते यत् श्रुत्यनुगमेनैव सूत्राणि प्रणीतानीति । एतच्चोत्तरत्र भाष्ये स्पष्टीकरिष्यते । न च श्रुतिरप्युन्मत्तवाक्यवत् न्याय-मनादृत्यैव प्रवृत्ता । यतो वस्तुवृत्तमनुसृत्यैव सा जन्मन आदित्वम् उपदिशति । कथमेतत् ? – इत्यत्र संग्रहवाक्यार्थविवरणेनैवोत्तरमाह– ‘ **जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात्** ’ इति । विद्यमानस्यैव हि वस्तुनः स्थितिप्रलयौ शक्यसंभावनौ, नाविद्यमानस्य ; विद्यमानता च वस्तुनो जन्माभिव्यङ्ग्या इति प्रथमतः कल्पित-जन्मन्येव वस्तुनि लोके स्थितिप्रलयशङ्काप्रसरात् वस्तुवृत्तापेक्ष एवायं श्रुतिनिर्देश–इति भावः । कालाधारं सर्वम्–इति नियममाश्रित्य जन्मादीनां पौर्वापर्यम् अशक्यनिर्धारणम् इत्युपपादयितुं पूर्वपक्षिणा बीजाङ्कुरदृष्टान्त आनीतः । सिद्धान्तिना पुनः प्रतिपत्तिक्रमेण प्रसिद्ध-धर्मिण एव धर्माणां शक्यसंभावनत्वात्, जन्मनो वस्तुसत्ताभिव्यञ्जक-त्वात् प्राधान्यमूरीकरणीयमित्याशयेन शङ्कापरिहारः कृत इति विशेषः । अत्र ‘ जन्मना लब्धसत्ताकस्य ’ इत्यस्याक्षरार्थं गृहीत्वा प्रागुत्पत्तेरसत् कार्यम्, उत्पन्नं सत् सत्तां लभते इति तु भाष्यार्थो नावसेयः ।

असत्कार्यवादस्य स्फुटं निराकरिष्यमाणत्वात् 'युक्तेः शब्दान्तराच्च' (२–१–१८) इति सूत्रभाष्ये ॥

५. **'अस्य' इति कृत्स्नजगन्निर्देशः** – ननु 'अस्य' इत्यत्र इदंशब्देन किं विवक्षितम्? न तावत् 'यतो वा इमानि भूतानि' इति श्रुत्यनुगमेन भूतान्येव तेन निर्दिश्यन्त इति युक्तम्; 'अस्य' इति एकवचनग्रहणात्, भूतानां च बहुत्वात्। न चान्यमर्थं श्रुत्युदाहृतं संनिकृष्टं वा पश्यामः। अत्राभिधीयते – **'अस्य' इति प्रत्यक्षादि-संनिधापितस्य धर्मिणः इदमा निर्देशः।** अयमाशयः। संनिकृष्ट-वाची हि इदंशब्दः। तत्र असति विशेषोपादाने सामान्यस्यैव संनिधानात् प्रत्यक्षादिसंनिधापितं जगत्सामान्यरूपं धर्मि निर्दिश्यत इति गम्यते। प्रत्यक्षेण हि लोकानुभवेन स्वविषयत्वेन संनिधापितं जगदिति। 'प्रत्यक्षादि' इत्यादिशब्देन श्रुतिर्ग्राह्या। श्रुत्या च संनिहितवदिदंशब्देन निर्दिष्टं जगत्–इत्यभिप्रायः। 'इदं सर्वमसृजत' (तै. २–६), 'असद्वा इदमग्र आसीत्' (तै. २–७), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १–१) इत्यादिभिर्हि श्रुतिभिः संनिहितवदिदमा निर्दिश्यते जगत्। इतश्चैतदेवम्। 'जगद्वाचित्वात्' (१–४–१६) इति सूत्रे 'यस्य वा एतत् कर्म' (कौ. ४–१८) इति वाक्यस्थस्य एतच्छब्दस्य समीपतरवर्तिवाचिनो जगद्वाचित्वस्वीकार-दर्शनाच्च। तत्र हि भाष्यकारेण व्याख्यातम् 'असति विशेषोपादाने साधारणेन अर्थेन संनिधानेन संनिहितवस्तुमात्रस्यायं निर्देश इति गम्यते न विशिष्टस्य कस्यचित्। विशेषसंनिधानाभावात्' इति। अतः स एव न्याय इहानुसर्तव्यो भवतीति ॥

'प्रत्यक्षानुमानादिप्रमाणैः संनिधापितस्य' इति तु न विशेषणार्थः। जगत्संनिधापकत्वेनाभिमतस्य प्रत्यक्षादेः स्वसंनिधाप्यात् इदंशब्दगोचराद् व्यतिरिक्तत्वापातात्। इष्यते हि प्रमेयराशेरिव प्रमाणराशेरपि जगदन्तःपातित्वम्, ब्रह्मकारणकत्वं च। अतः यथाव्याख्यात एव प्रत्यक्षादिपदार्थो ग्राह्यः॥

६. षष्ठ्यर्थः – ननु चैवम् 'इदं जन्मादि' इत्येतावदस्तूपन्यस्तम्। किमत्र अस्य इति षष्ठीविभक्तिप्रक्षेपेण? तत्र 'इदम्' इति संनिहितसामान्यं ग्राहयिष्यति; तच्च जन्मादेर्विशेषणं भवत् प्रत्यक्षसंनिधापितं जगज्जन्मादिसमाहारमेवाक्षेप्स्यतीति। तत्राह – '**षष्ठी जन्मादिधर्मसंबन्धार्था**' इति। अयमभिप्रायः। इदंशब्देन धर्मिमात्रम्, नामरूपाभ्यां व्याकृतं जगत्, गृह्यते। षष्ठी च जन्मादिधर्माणां धर्मिणा संबन्धमाचष्टे। न च धर्मग्रहणेनैव धर्म्यपि आक्षिप्यत इति व्यर्थस्तद्वाचकशब्दोपादानायासः – इति वाच्यम्। धर्ममात्रग्रहणे हि जन्मादिधर्माणां दृश्यमानतत्तद्भावविकारत्वेन जन्मादिसमाहारस्य तत्तद्भावाश्रितत्वेनैवोपक्षये जन्मादेर्ब्रह्मकारणकत्वालाभात्, श्रुत्यविवक्षितव्याहारः सूत्रकार इत्यापद्येत। अतो धर्मिग्रहणार्थं जगद्वाचकेदंशब्दोऽपि ग्राह्यः, तेन धर्मिणा धर्माणां संबन्धज्ञापनार्थं षष्ठ्यपि ग्राह्या। न चैवमपि तत्तद्भावगतजन्मादिव्यतिरेकेण समष्टिजगतो जन्मादीनामभावात् अविद्यमानार्थकत्वमेव सूत्रस्य स्यात्–इति शङ्क्यम्। लोकसिद्धतत्तद्भावगतजन्मादिव्यतिरेकेणैव जगतोऽपि जन्मादीनामत्र प्रतिपिपादयिषितत्वात्। एतच्चानुपदमेवोद्भाव्यते भाष्यकारेण–इत्यलमतिप्रपञ्चेन॥

७. **यतःपदार्थः** – यतःशब्देनात्र 'अस्य जगतः, जन्मादि यतः कारणाद् भवति' इति कारणभूतब्रह्मनिर्देशः क्रियते । तदाह – **'यतः' इति कारणनिर्देशः** – इति । 'यतः' इति सार्वविभक्तिकस्तसिल्प्रत्ययः । यस्माज्जन्म भवति, येन च तस्य स्थितिर्भवति, यस्मिंश्च तत्प्रलयो भवति, तत् जगज्जन्मादिकारणं ब्रह्म–इत्यर्थो विवक्षितः इत्यभिप्रायः ॥

८. **सूत्रवाक्यार्थः** – तदेवं तावत् पदार्थान् व्याकृत्य इदानीं वाक्यार्थं वर्णयति – **'अस्य जगतः'** इत्यादिना ॥

(१) **'नामरूपाभ्यां व्याकृतस्य'** इति परिदृश्यमानजगतो विशेषणम् अव्याकृतस्यास्य नामरूपाभ्यां व्याकर्तृत्वमेव जगज्जन्मकारणत्वं ब्रह्मणः इति ज्ञापनार्थम् । तदिदं जगत् प्रागुत्पत्तेः, अव्याकृतनामरूपभेदम्, आत्मभूतम्, आत्मैकशब्दप्रत्ययगोचरम्; इदानीं तु व्याकृतनामरूपभेदत्वात् अनेकशब्दप्रत्ययगोचरम्, आत्मैकशब्दप्रत्ययगोचरं च – इति विशेषः । यथा सलिलात् पृथक् फेननामरूपव्याकरणात् प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनम्, व्याकरणादूर्ध्वं तु 'सलिलम्, फेनं च' इत्यनेकशब्दप्रत्ययभाक्, 'सलिलमेव' इत्येकशब्दप्रत्ययभाक्च भवति, तद्वत् । इत्थं च नामरूपाभ्यां व्याकृतस्य जगतः – फेनस्येव सलिलतो–यतो जन्मस्थितिभङ्गं भवति, तद् ब्रह्म – इत्युक्तं भवति ॥

(२) **'अनेककर्तृभोक्तृसंयुक्तस्य'** इति विशेषणं ब्रह्मादिस्तम्बपर्यन्तानां कर्तृभोक्तृरूपाणां चराचरभूतानामपि जन्मस्थितिभङ्ग-

कारणं ब्रह्म, अत एव च तादृशभूतविलक्षणं तत् – इति द्योतनार्थम् । भूतानां आत्मानात्मस्वरूपविवेकाभावकृतो नैसर्गिकाध्यासः कर्तृत्व-भोक्तृत्वप्रयोजकः – इत्युक्तमध्यासभाष्ये **'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः'** इत्यत्र । अस्य जगतो जन्मादि यतस्तद् ब्रह्म इत्युक्तेः संसार्येव यः कश्चिद् ब्रह्मशब्दवाच्यः, यत्कृतधर्माधर्मवशादेव स्यात् जगतो जन्मस्थितिभङ्गम्–इति मा शङ्कि इति दत्तमिदं विशेषणम् 'अनेककर्तृभोक्तृसंयुक्तस्य' इति । 'सर्वे एत आत्मानो व्युच्चरन्ति' (बृ. मा. २-१-२३) इति श्रुतेरुपाधिसंपृक्तानां सर्वेषामपि कर्तृभोक्तॄणां कार्यभूतजगदन्तःपातित्वं विज्ञायते । तत्तादृशं विविधसंसारियुक्तमिदं जगत् कथं यःकश्चित् संसारी तदन्तर्गतो निर्मिमीत ?–इति भावः ॥

(३) संसारिकारणकत्वनिषेधदार्ढ्यार्थं विशेषणान्तरम् **'प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य'** इति । अस्मिन् देशे, अमुककाले, अमुकनिमित्तमाश्रित्य निर्वर्तितायाः अस्याः क्रियायाः, एतादृशदेशे काले च एवञ्जातीयकनिमित्तमाश्रित्यैव एवंविशिष्टानि फलानि भवेयुः – इति प्रतिनियतकारकक्रियाफलाश्रयस्य जगतः, क्रियाफलस्वभावविभागज्ञानरहितः संसारी कथं नाम व्यवस्थया जन्म-स्थितिभङ्गं विधातुं शक्नुवीत ? – इति भावः ॥

(४) स्यादेतत्–कश्चित् संसारिविशेषः स्वनुष्ठितधर्मविशेष-संपादितप्रज्ञाशक्तिवैशारद्यः सर्वमप्येतत् ज्ञातुं कर्तुं च प्रभवेदेव । किं नाम दुष्करं विशिष्टप्रज्ञादिमतां देवादीनामिति ? तदेतदपाकुर्वद्

विशेषणमादत्ते – 'मनसाप्यचिन्त्यरचनारूपस्य' इति। अयं भावः। 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे. ६–१८), 'तस्माच्च देवा बहुधा संप्रसूताः साध्या मनुष्याः पशवो वयांसि। प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च' (मुं. २–१–७) इत्यादिश्रुतिभ्यः, 'अहमादिर्हि देवानां महर्षीणां च सर्वशः' (गी. १०–२) इत्यादिस्मृतिभ्यश्च देवर्षिमनुष्यादिसकलसंसारिणां तत्कर्तृकधर्माधर्मादीनां तत्फलानां च महाकारणप्रसूतजगत्येवान्तर्भावो विज्ञायते। महाप्रज्ञा अप्येते न शक्नुयुर्मनसापि चिन्तयितुं कथमीदृशं जगत् केन विरचितं स्यात्, केन कथं वा नियन्त्रितं स्यादिति, का कथा तद्विरचनायां तेषां प्रभुत्वस्येति? अथवा अचेतनकारणशङ्का-निरासार्थमिदं विशेषणमिति व्याख्येयम्। महाचतुरैरपि शिल्पिभिर्मनसाप्यचिन्त्यरचनस्यास्य विचित्रस्य जगतः, यथोक्तविशेषणत्रयवतः सृष्ट्यादिकं अचेतनप्रधानादिकृतमिति का संभावना? – इति। तथा च सूत्रप्रवृत्तिर्भविष्यति 'रचनानुपपत्तेश्च नानुमानम्' (२–२–१) इति। व्याख्यास्यति चैतद् भाष्यकृत् 'इदं जगदखिलं पृथिव्यादि नानाकर्मफलोपभोगयोग्यं बाह्यम्, आध्यात्मिकं च शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासम्, अनेककर्मफलानुभवाधिष्ठानं दृश्यमानं प्रज्ञावद्भिः संभाविततमैः शिल्पिभिर्मनसाप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रचयेत्?' इति॥

(५) तदेवं जगतो विशेषणचतुष्टयप्रदर्शनेन तज्जन्मादि-कारणत्वं नामरूपविलक्षणे, कर्तृत्वभोक्तृत्वगन्धरहिते, धर्माधर्मसंस्पर्श-

शून्ये, देशकालनिमित्तानवच्छिन्ने निष्क्रिये क्वचिदाश्रितमिति संभाव्य अन्यदपि कार्यस्वभावापेक्षया तस्मिन्नाश्रये अवश्याकाङ्क्षितं विशेषणद्वयम् उपन्यस्यति जगतो जन्मस्थितिभङ्गं **'यतः सर्वज्ञात् सर्वशक्तेः कारणात् भवति'**–इति । यो हि यदुत्पादयितुम्, व्यवस्थापयितुम्, उपसंहर्तुं च शक्तः, यथा तक्षादिः प्रासादादिकम्, तेन तद्विषयक-विज्ञानवता भाव्यम् इति लोके दृष्टम् । ब्रह्म च सर्वजगदुत्पत्त्यादि-कारणमिति तस्य सर्वज्ञत्वमवश्याश्रयणीयं भवति । तथा यतो यस्य समुत्पत्तिः स्थितिर्भङ्गश्च यथा मृदादितो घटादेः, तस्य तदुत्पादकत्वादि-शक्तियोगेन भाव्यम् । एवं लोके दृष्टत्वात् । एवं ब्रह्मापि सर्व-जगदुत्पत्त्यादिकारणत्वात् तदुत्पादनादिपर्याप्तसर्वशक्तिमदिति युक्तमिति भावः ॥

जिज्ञासासूत्रस्थं ब्रह्मपदम् अनुषज्य यत्पदाक्षिप्तेन शेषेण संयोज्य वाक्यं पूरयति – **'तद् ब्रह्म – इति वाक्यशेषः'** – इति । ईदृशं जगदुत्पत्त्यादिकारणभूतं तत्त्वमेव ब्रह्मशब्दार्थः–इत्यर्थः ॥

९. **ब्रह्मस्वभावः श्रुत्यैकसमधिगम्यः** – एतच्च नाम-रूपविलक्षणत्वादिकं धर्मजातं जगद्रूपकार्यस्वभावनिरूपणेन तत्कारणे ब्रह्मणि संभावनायुक्त्या संपादितं श्रुतिसिद्धमेवात्रानूदितं भाष्यकारेण । तथा हि श्रुतिः – 'तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यामेव व्याक्रियत' (बृ. १–४–७), 'आकाशो ह वै नाम नामरूपयो-र्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छां. ८–१४–१) इति च नाम-रूपरहितं ब्रह्म अव्याकृतस्य जगतो नामरूपाभ्यां व्याकर्तृ–इत्याह ।

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च' (का. १-२-१४), 'अस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति' (बृ. २-१-२०) इति च कर्तृत्वभोक्तृत्वरूपसंसारधर्मरहितं, कालत्रयातीतं भूतशब्द-वाच्यानां कर्तृभोक्तॄणां व्युच्चारहेतुरिति चाचष्टे। 'सर्व एत आत्मानः' (बृ. मा. २-१-२३) इति ह्यधीयते माध्यन्दिनाः । 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृ. ४-५-११) इति सर्वस्यापि जगतो नामरूपात्मकस्य विचित्रक्रिया-फलभोगभूमिविशिष्टस्य अचिन्त्यरचनारूपस्य पुरुषनिःश्वासवदनायासेनैव स्रष्टृ ब्रह्म-इत्याह । 'येन जातानि जीवन्ति' (तै. ३-१), 'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः....एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय' (बृ. ४-४-२२), 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः....' (बृ. ३-८-९) इत्यादयश्च श्रुतयो ब्रह्मणो जगत्स्थितिकारणत्वमाहुः । यत् प्रयन्त्यभिसंविशन्ति' (तै. ३-१), 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनम्' (का. १-२-२५) इत्यादयः पुनर्जग-त्संहर्तृत्वमप्याहुर्ब्रह्मणः । एवं 'यः सर्वज्ञः' (मुं. १-१-९), 'परास्य शक्तिर्विविधैव श्रूयते' (श्वे. ६-८), 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः' (छां. ३-१४-४) इत्यादयश्च तस्य सर्वशक्तिसमन्वितत्वं ब्रुवत इति। अत्र सूत्रकारेण न शब्दतः सूत्रितो ब्रह्मणो यथोक्तस्वभावः श्रुत्यनुगमो वा आदिमसूत्रद्वये, 'शास्त्रयोनित्वात्'

इति तृतीयसूत्रेणैव चेदं द्वयमपि स्फुटीभविष्यतीति कृत्वा। भाष्यकारेण तु सूत्रकारहृदयस्थितं श्रुतिप्रमाणकत्वमुत्तराधिकरणत आकृष्य सूच्यते जगत्स्वरूपविवरणव्याजेन इति विशेषः ॥

तत्र यद्यपि यथोक्तविशेषणचतुष्टयविशिष्टं निष्कलं निष्क्रियं शान्तं ब्रह्म, अथ च सर्वज्ञं सर्वशक्ति चेति विप्रतिषिद्धमिव, तथापि सर्वविकल्पास्पदतया नामरूपादिरहितं स्वरूपेण, अविद्याकल्पितनामरूपबीजव्याकरणापेक्षया च सर्वज्ञं सर्वशक्ति च–इत्यविरोधो द्रष्टव्यः ॥

## ३. जगन्मात्रस्यैव जन्मादि सूत्रोक्तम्

**अन्येषामपि भावविकाराणां त्रिष्वेव अन्तर्भावः–इति जन्मस्थितिनाशानाम् – इह ग्रहणम्। यास्कपरिपठितानां तु 'जायते', 'अस्ति' – इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले सम्भाव्यमानत्वात्, मूलकारणात् उत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युः – इत्याशङ्क्येत; तन्मा शङ्कि–इति या उत्पत्तिर्ब्रह्मणः, तत्रैव स्थितिः, प्रलयश्च–त एव गृह्यन्ते ॥**

१०. **यास्कपरिपठिता भावविकाराः कुतो न गृह्यन्ते सूत्रे ?** – ननु च जन्मस्थितिभङ्गमेव 'जन्मादि' इत्यस्यार्थः, न तु

षड् भावविकाराः यास्कपरिपठिता इति कथमिदमवगम्यते ? जन्म-स्थितिभङ्गान् अन्तरान्तरा इतरेषामपि विकाराणां नान्तरीयकत्वात् तेषामप्यत्राग्रहणमिति कथम् अध्यवस्यामः ?–इत्याशङ्क्याह 'अन्येषामपि' इत्यादिना । अयमाशयः । सत्यम्, सन्त्येव अन्ये भावविकाराः, वृद्ध्यपक्षयादयोऽपि । तेऽपि परम् आद्यन्तयोर्जन्मविनाशयोरन्तकाले तिष्ठन्तीति तेऽपि स्थितिग्रहणेनैव गृहीता भवन्तीति कृत्वा न तेषामिह हिरुग् ग्रहणं क्रियते । एवं हि सूत्रस्य लाघवं स्यादिति । श्रुत्यनुगमाच्च । 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति ' (तै. ३–१) इत्याद्या हि श्रुतयस्तिस्र एव विकृतीः प्रदर्शयन्ति, अन्येऽपि विकारा अत्रैवान्तर्भवन्ति इत्यभिप्रायेण । अत एवेह यास्कपरिपठितानां 'जायते', 'अस्ति', 'वर्धते', 'परिणमते', 'अपक्षीयते', 'विनश्यति' (नि. १–२–८, पृ. २२) इत्येषां षण्णामग्रहणमित्यवसीयते । तेषां ग्रहणे हि यद्यपि विकारान्तर्भावोक्तिप्रयासो परिह्रियेत, तथापि श्रुत्यनुगमसूचना परित्यक्ता स्यात् । तदिदं स्पष्टमित्युपेक्ष्य कारणान्तरमप्यस्ति तेषामग्रहणे, इत्याह भाष्यकृत् – 'यास्कपरिपठितानां तु' इत्यादिना । ते हि विकारा जगतः स्थितिकाले एव परिदृश्यमानानां भावानां धर्मा इत्युदाहृता यास्केन, न तु जगन्मात्रस्येति । अतस्तन्मात्रग्रहणे जगतो परमकारणाद् ब्रह्मणः सकाशाज्जन्म, तत एव स्थितिः, तत्रैव प्रलयश्च इति श्रुतिविवक्षिता न विवक्षिताः स्युः सूत्रकारेण इत्यप्याशङ्क्येत । तथा मा शङ्कीति योत्पत्तिः, स्थितिः, प्रलयश्च श्रुत्युक्ताः, त एव गृह्यन्त इति युक्तम्

इत्यभिप्रायः । अत्र हि सर्वकारणानामपि स्थितिकाले संभाव्यमानानां मूलकारणं ब्रह्म लिलक्षयिषितम् । अतीतानन्तराधिकरणे तस्यैव जिज्ञास्यत्वेनोपदेशात् । ब्रह्मणश्च श्रुतिमात्रगम्यत्वमित्यतस्त्रय एव विकाराः समस्तजगत इह विवक्ष्यन्ते इत्येव युक्तमिति भावः ॥

११. ब्रह्मणः कारणत्वं जगतः कार्यत्वं च लौकदृष्टविलक्षणम् — अत्रेदमवधेयम्, ब्रह्मणो मूलकारणाद् या समुत्पत्तिः श्रूयते, इह च सूत्रे लक्ष्यते, सा न जगतः स्थितिकाले सम्भाव्यमानेन उत्पत्तिलक्षणेन भावविकारेण समानतुलामधिरोहति । कुत एतत् ? स्थितौ सम्भाव्यमाना हि भावोत्पत्तिः, कार्यकारणयोः समानकालसन्तानाधारत्वमाकाङ्क्षते ; कार्यनियतपूर्वकालवर्ति हि तन्निर्वर्तकं कारणं नामेति । न च कालाधेयत्वरहितं किञ्चित् कस्यचित् कारणमिति भण्यते लोके । इह पुनः कालोऽपि व्याकृतजगदन्तर्भावी पदार्थः । प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयं जगत्—इति ह्युक्तम् । तथा च 'कालविशिष्टं जगत् यतः कारणात् समुत्पद्यते तद् ब्रह्म' इत्युक्तं भवति । तत्र ब्रह्म न कालाधारकम्, नापि जगत् तथा । न हि जगदप्यतीत्य तद्बहिः कालो वर्तते, येन तत्कारणमपि कालाधारकमिति संभाव्येत । न च कालविशिष्टं जगत् कालाधारकम् इति शक्यशङ्कम् । जगद्विशेषणीभूतकालस्य कालान्तरं प्रत्याधेयत्वस्य चिन्तयितुमप्यशक्यत्वात् । तदेवं न काले पूर्वापरीभावं भजमाने ब्रह्मजगती । अथ च ब्रह्म कारणमित्युच्यते, ब्रह्मणो जगदुत्पद्यते इति च । अतोऽवगम्यते अन्यादृशमेव ब्रह्मणः कारणत्वम्, जगतः कार्यत्वं चाभिप्रेतम् न लौकिकाभिमत-

मेवेति, अन्यादृश्येव च जगत उत्पत्तिरिह विवक्षिता न लोकाभिमत घटाद्युत्पत्तिसलक्षणेति च ॥

एवं ब्रह्मणा जगतः स्थितिरपि राज्ञेव मन्त्रिसेनापत्यादिस्थान-संविधानपूर्वकं राष्ट्रस्येति न शक्यं कल्पयितुम् । अद्वितीयब्रह्मणो निर्व्यापारस्य तदयोगात्, नियन्तव्यस्य च जगतस्तत्सकाशाद् व्यतिरेकेण अनवस्थानाच्च । नापि लौकिकाभिमतस्य घटादिकार्यस्य मृदादि-कारणाश्रयणेनेव ब्रह्माश्रयणेन जगतः स्थितिरवकल्पते । असंसर्गि-वस्तुत्वाद् ब्रह्मणः । आत्मा हि सर्वस्य ब्रह्मेत्युक्तमतीताधिकरणभाष्ये । आत्मनश्च असंसर्गित्वान्नाधारत्वं कल्पयितुं युक्तम्, जगत आधेयत्वं वा । न ह्याकाशादौ असंसर्गिणि किञ्चिदाधेयभावेन स्थातुमर्हतीति । अथ च ब्रह्मणि स्थितिर्जगतः श्रूयते ; अतो गम्यते लोकाभिमतकारणे कार्यवत्, स्थितिरिहाविवक्षितेति ॥

एवं जगतः प्रलयोऽपि न मृदादौ घटादेरिव भवितुमर्हति । ब्रह्मणो निरवयवत्वे सति, अपरिणामित्वात्, व्यतिरेकेण मृदादिवत् । तस्मात्, सम्यगेवोक्तं सावधारणं 'या उत्पत्तिर्ब्रह्मणः, तत्रैव स्थितिः, प्रलयश्च—त एव गृह्यन्ते' इति लोकदृष्टोत्पत्तिस्थितिप्रलयेभ्यो वैलक्षण्यं जगदुत्पत्त्यादेर्द्योतयितुमिति ॥

# ४. अब्रह्मकारणवादस्य निराकरणम्

**न यथोक्तविशेषणस्य जगतः, यथोक्तविशेषणम् ईश्वरं मुक्त्वा अन्यतः—प्रधानादचेतनात्, अणुभ्यः, अभावात्,**

**संसारिणो वा – उत्पत्त्यादि संभावयितुं शक्यम् । न च स्वभावतः, विशिष्टदेशकालनिमित्तानाम् इह उपादानात् ॥**

**१२. ब्रह्मणो जगज्जन्मादिकारणत्वे आक्षेपः –** अथ कीदृशं ब्रह्मणो जगज्जन्मादिकारणत्वमिह विवक्षितं स्यादिति ? न तावत् कुम्भकारादेरिव केवलनिमित्तकारणत्वं भवति । निर्विशेषाद्वितीयस्वरूपाद् ब्रह्मणो व्यतिरिक्तस्य अधिष्ठेयवस्त्वन्तरस्याभावान्मृदादेरिव । 'एकमेवाद्वितीयम्' (छां. ६–२–१) इति हि श्रुतिः । नापि केवलोपादानकारणत्वम् । मृदादेरन्यानधिष्ठितस्य कार्याकारेण परिणामादर्शनाल्लोके । ब्रह्मणश्चाधिष्ठात्रन्तराभावात् । 'एकमेवाद्वितीयम्' (छां. ६–२–१), 'तदैक्षत बहु स्यां प्रजायेय' (छां. ६–२–३) इत्यादिश्रुतिभ्यः । नापि निमित्तत्वोपादानत्वैतदुभयलक्षणम् । तथाविधकारणस्य लोके अदृष्टत्वात् ; कर्तृत्वोपादानत्वयोश्चेतनत्वाचेतनत्वव्याप्तयोर्विरुद्धधर्मयोरेकस्मिन्नसंभवाच्च । केवलोपादानत्वपक्षे, उत्प्रेक्षामात्रसिद्धे निमित्ताभिन्नोपादानकारणत्वपक्षे च सावयवत्वानित्यत्वादिप्रसङ्गध्रौव्याच्च नोपादानकारणत्वं युक्तम् । न च प्रकारान्तरं संभवति । किञ्च, निर्विशेषात्, नामरूपादिहीनाद् ब्रह्मणो नामरूपादिमतो जगतो जन्म, चेतनाच्च सर्वज्ञाद् ब्रह्मणोऽचेतनस्य जगतो जन्म–इत्यभ्युपगच्छता निर्विशेषमेव सविशेषरूपेण परिणमते, चेतनं चाचेतनत्वेन–इत्युक्तं स्यात्, तच्चायुक्तं स्वभाववैपरीत्यगमनम् । प्रागसदेव च सविशेषं जगत्, निर्विशेषब्रह्मण उत्पद्यते – इत्युक्तं स्यात् । तदप्ययुक्तम्,

असतः सत्त्वापत्तेः सर्वप्रमाणविरुद्धत्वात् । असतो ब्रह्मकारणिका सत्त्वापत्तिः–इति वाचोयुक्तेरपार्थकत्वाच्च । तदेवम् असम्भाव्यमिदं नः प्रतिभाति जगज्जन्मादिकारणत्वं ब्रह्मणः । अतो वरं तन्त्रान्तरप्रसिद्धं प्रधानादिकारणकत्वमेव जगतोऽभ्युपगतम् इति चेत्, अत्र प्रतिविधत्ते–

१३. प्रधानादिकारणनिराकरणम् – 'न यथोक्तविशेषणस्य जगतः, यथोक्तविशेषणम् ईश्वरं मुक्त्वा' इत्यादिना 'उत्पत्त्यादि सम्भावयितुं शक्यम्' इत्यन्तेन । अयं भावः – उपपादितमधस्तात्, यथा कालादिविशिष्टस्य जगतो लोकदृष्टसलक्षणं कारणं सम्भावयितुमशक्यम् । न च प्रधानादेरचेतनात् कारणात् कालादिविशिष्टं चेतनाचेतनवस्तुविशिष्टं जगत् समुत्पत्तुमलम् इति शक्यानुमानम् । अनुमानस्य दृष्टानुसारित्वात् । तथा हि – न तावत् प्रधानकारणकत्वम्, अणुकारणकत्वं वा कालविशिष्टस्य जगतः शक्यसमुत्प्रेक्षणम् । कार्यरूपेण परिणामस्य कार्यारम्भस्य च कालापेक्षाध्रौव्यात्, अचेतनस्य चेतनरूपेण परिणामस्य चेतनारम्भकत्वस्य वा दृष्टविरुद्धत्वाच्च । न चाभावकारणकत्वं शक्यशङ्कम् । भावस्य भावोपादानकत्वस्यैव लोके दृष्टत्वात् । भावाभावसमष्टिरूपत्वाच्च जगतो नाभावकारणकत्वं शक्यकल्पनम् । न च प्रतीत्यसमुत्पादलक्षणपदार्थराशेर्जगतो जन्माद्येव न शक्यनिरूपणमिति शून्यस्वभावकमेवेदं जगदिति महावैनाशिकपक्ष एव 'अभावात्' इत्यनेन विवक्ष्यत इति शङ्क्यम् । अनुभवप्रमाणप्रसिद्धस्यास्य जगतः परमार्थभूतमास्पदं किञ्चिदनधिगम्य केवलयुक्त्या अपह्नोतुमशक्यत्वात् । तथा अपह्नोतुः स्वरूपस्य अशक्या-

पह्नवत्वादेव च शून्यवादहानप्रसङ्गाच्च । न च संसारी कश्चित् स्वयं देशकालाद्यपेक्षधर्माधर्मयोरधिकृतः कारणत्वेन मनसा कल्पयितुमपि शक्य इत्यवोचाम । तस्मात्, युक्तमेवोक्तं '**यथोक्तविशेषणम् ईश्वरं मुक्त्वा अन्यतः प्रधानादचेतनात्, अणुभ्यः अभावात् संसारिणो वा जगत उत्पत्त्यादि संभावयितुं शक्यम्**' इति ॥

१४. **स्वभाववादनिरासः** – अथ स्वभाववादमपि प्रत्याचष्टे '**न च स्वभावतः**' इति । अत्र 'स्वभावत' इति कोऽर्थः ? स्वस्मादेव स्वयम् उत्पद्यत इति वा, अन्यन्निमित्तमनपेक्ष्यैव – इति वा ? नाद्यः, आत्माश्रयप्रसङ्गात् । न द्वितीयः, लोके कार्योत्पत्तेर्नियमेन कारणापेक्षाया दृष्टत्वात् । ननु मास्त्वेव तर्हि जगत उत्पत्त्यादि, न कदाचिदप्यनीदृगिदं जगत् । स्वभाव एवास्य यदुत्पत्त्यादिशून्यत्वम्–इत्यभ्युपगम्यताम् । तच्च न युक्तम् । कुतः ? **विशिष्टदेशकालनिमित्तानाम् इह उपादानात्** । अयमभिप्रायः । स हि वस्तुनः स्वभावो नाम यो वस्तुस्वरूपे एव संनिविष्टः, यथा वह्नेरौष्ण्यम् । न तु परोपाधिविशेषमपेक्ष्य आत्मानं लभमानमपि स्वभावशब्दार्हं भवति । ननु वह्नेरौष्ण्यमपि बाह्यवस्तुविशेषलक्षणपरोपाधिमपेक्ष्यैवाभिव्यज्यते । न । विद्यमानस्यैवौष्ण्यस्य काष्ठादीन्धनसंनिधावभिव्यक्तेः । यदि हि अन्योपाधिनिमित्तमेव स्यात् तदौष्ण्यम्, तर्हि जलादिसंनिधावपि तदभिव्यक्तिः स्यात् । न चैतदस्ति । तस्मात् स्वभावो नाम वस्तुस्वरूपानतिरिक्तमेव वह्न्यौष्ण्यवदित्येव सम्यक् । जगतस्तु न तथा 'स्वभाव एवायम्' इति शक्यं कल्पयितुम् । प्रतिक्षणं विक्रियमाणस्य 'एष एव स्वभावः' इति

निर्धारयितुमशक्यत्वात् । वह्न्यौष्ण्यवदेकरूपत्वाभावात् । इतश्च । 'विशिष्टदेशकालनिमित्तानामिहोपादानात्' । इह हि जगति यद्यद् विक्रियते तन्न स्वत एव विक्रियते, किं तर्हि तत्तद्देशकालनिमित्तान्यपेक्ष्यैव तथा तथा विकारभावं धत्ते । अत एव हि कार्यार्थिनो लोके तत्तत्कार्योत्पत्तिसमपेक्षितदेशकालनिमित्तान्युपादायैव तत्तत्फलप्राप्तये प्रयतमाना दृश्यन्ते ; न तु स्वभावत एव कार्यमुत्पद्यते क्वचित्, लोको वा देशकालाद्यनुपादायैव प्रयतमानो दृश्यते । इत्थं चेदं जगत् सर्वमेव प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयं सत् विक्रियमाणं समुचितदेशकालादिविभागज्ञेनैव सर्वज्ञेन सर्वशक्तेन केनचिदुत्पाद्यत इति संभाव्यते । एवं स्थितिप्रलयावपि तथाविधमेव कारणमपेक्षेते—इत्यवश्यमभ्युपगन्तव्यम् । न तु स्वभावत एव जगदुत्पत्त्यादि भवेदिति संभावनीयम्, दृष्टानुसारिणी हि कल्पना युक्तेति । ननु, आकाशादिपदार्थाः केचिन्नित्या एव, न किञ्चित् स्वजन्मकारणमपेक्षन्ते इति वदन्ति, काणादादयः । न चाकाशकालादीनां कारणं किमप्युत्प्रेक्षितुं शक्यमित्यपि भाति । तत्कथमेषा युक्तिः—इति चेत् । यथा त्वाकाशादीनामपि कारणापेक्षत्वम्, तथा द्वितीयाध्यायतृतीयपादे उपपादयिष्यत इति नेदं चोद्यमवतरति । तस्मात् साध्वेतदुक्तम्, न च स्वभावतः संभावयितुं शक्यं जगज्जन्मादीति ॥

तदीदृशानि ब्रह्मव्यतिरिक्तानि कारणानि श्रुत्यैव वारितानि

'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः ॥' (श्वे. १-२)

इति । तस्मात्, यथोक्तमीश्वरं मुक्त्वा अन्यतो जगत उत्पत्त्यादि न संभावयितुं शक्यमिति सुस्थम् ॥

**१५. लक्षणवाक्यतात्पर्यविषये व्याख्यातृविमतिः, तद्दूषणं च – अत्र केचिदाहुः ।** अनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण सम्भावना उक्ता । तत्र प्रमाणं वक्तव्यमित्युत्तराधिकरणसार्थक्यमिति । तदयुक्तम् । 'जन्मादि यतः सम्भवति तद् ब्रह्म' इति सूत्राक्षराणां भाष्याक्षराणां वा अनुपलम्भात् । श्रुत्यनुगमेन सूत्रसंदर्भप्रवृत्तौ अभ्युपगम्यमानायां लक्षणवाक्यस्य सम्भावनामात्रे पर्यवसानोक्तेरनुपपन्नत्वाच्च । कथं तर्हि लक्षणसूत्रस्यैव ब्रह्मनिश्चायकत्वे समनन्तरोत्तरसूत्रप्रवृत्तिरवकल्पत इति चेत्, वेदान्तवाक्यमीमांसात्मकत्वात् सूत्राणाम् – इति वदामः । वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य तदर्थो विचारपूर्वकं निश्चीयते । प्रकृते हि लक्षणसूत्रे 'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि जगज्जन्मादिवाक्यानि विषयत्वेन उदाजिहीर्षितानि । तेषु चोपसंहारवाक्ये 'आनन्दो ब्रह्मेति व्यजानात्' (तै. ३–६) इत्यादिलक्षणे ब्रह्मस्वरूपं निश्चीयत एवेति निश्चायकान्येव लक्षणवाक्यानि, न पुनः केवलं तदस्तित्वसंभावयितॄणि । अथ च, किं शास्त्रमात्रप्रमाणकं ब्रह्म, आहो प्रमाणान्तरैरपि शक्यते वेदितुम् ? – इति शङ्कायाम्, परिनिष्पन्नवस्तुरूपत्वात् प्रमाणान्तरवेद्यमपि स्यात् इति प्राप्ते मीमांसासूत्रे प्रवर्तयिष्येते 'शास्त्रयोनित्वात्' (१–१–३), 'तत्तु समन्वयात्' (१–१–४) इति च । अतो न किञ्चिदत्र दूषणं प्रसरति । किञ्च, प्रकृतसूत्राक्षरेण शास्त्रस्यानुपात्तत्वात्, किं श्रुत्यनु-

सारेणेदं प्रवृत्तम्, उत केवलमनुमानोपन्यासार्थम् ? — इति संशय-निवारणार्थत्वेनापि उत्तराधिकरणप्रवृत्तेरर्थवत्ता भविष्यति । एतच्च सर्वं भाष्यकार एव सुहृद्भूत्वा विशदयिष्यतीत्यलं श्रुतिगतलक्षणवाक्येऽस्थाने सम्भावनार्थतां प्रकल्प्योत्तराधिकरणसार्थक्योपपादनप्रयासेन । 'न यथोक्त-विशेषणस्य जगतः' इत्यादिभाष्यं तु प्रधानकारणत्वासम्भावनाप्रदर्शन-मात्रेणोपक्षीणमित्यलमतिविस्तरेण ॥

अन्ये तु, यदि जगतो ब्रह्मातिरिक्तं कारणं स्यात्, तदा ब्रह्म-लक्षणस्य तत्रातिव्याप्त्यादिदोषः प्रादुःष्यात् । अतस्तन्निरासाय लक्षण-सूत्रेण ब्रह्म विना जगज्जन्मादिकं न सम्भवति, कारणान्तरासम्भवात्— इति युक्तिः सूत्रिता । सा च तर्कपादे विस्तरेण वक्ष्यते इति जगदुः । तदपि न समञ्जसम् । न हि कुत्रचिदपि ब्रह्मणो जगज्जन्मादिकारणत्वं द्रष्टव्यत्वेन श्रूयते, जगत्कारणनिरूपणं वा तात्पर्येण क्रियते वेदान्तेषु, सूत्रेषु वा । ब्रह्मप्रकरणे ब्रह्मज्ञानादेव फलमिति सिद्धौ सत्याम् उत्तरत्र यज्जगत्सृष्ट्यादि श्रूयते तद् ब्रह्मज्ञानोपायत्वेनैव पठ्यते फलवत्संनिधौ अफलं तदङ्गम्—इतिवत् इति हि न्याय्यम् । अत एव हि निर्णयवाक्ये 'आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । .... ' इत्यादि श्रावयित्वा 'य एवं वेद प्रतितिष्ठति' इति आनन्दस्वरूपब्रह्मज्ञानादेव फलमाह श्रुतिः, न तु भूतजन्मादिज्ञानात्, तत्कारणनिरूपणाद्वा इति ॥

तस्मात्, यज्जगज्जन्मादिकारणं तद् ब्रह्म । तदेव विजिज्ञासि-तव्यम्—इत्येव सूत्रार्थः; न तु ब्रह्म विना जगज्जन्मादिकं न

सिध्यतीति । तथा व्याख्याने हि प्रकृतं ब्रह्म विहाय अप्रकृतस्य जगज्जन्मादिकारणविचारस्य प्रक्रिया स्वीकृता स्यात् । ननु ब्रह्मलक्षणमेव प्रकृतम्, तत्रातिव्याप्त्यादिदोषप्रसक्तिवारणाय युक्तिरपि सूच्यत इत्यभ्युपेयते, तत्र को दोष इति ? लक्षणवाक्यस्य लक्ष्यस्वरूपसमर्पणपरत्वे, तदसाधारणधर्मसमर्पणे तात्पर्यकल्पनमेव दोषः–इति वदामः । यथा चैतत् तथा अग्रे स्फुटीभविष्यतीत्यलं प्रपञ्चेन । प्रधानादिकारणवादनिरासस्तु अर्थाल्लब्धमत्र । तर्कपादे तन्निरसनं च तद्सारताप्रदर्शनेन मोक्षिजनानुग्रहार्थम्, कथं नु नाम सम्यग्दर्शनपथाद् परिभ्रष्टा न भवेयुरिति – इत्यन्यदेतत् । अतो न स्थाने यथोक्तव्याख्यानद्वयमित्यास्तां तावत् ॥

१६. **ईश्वरकारणवादोपपत्तिः** – यत्पुनराक्षिप्तं (खं. १२) ब्रह्मणोऽपि जगत्कारणत्वमनुपपन्नमिति । तत्र प्रचक्ष्महे यत्तावदुच्यते ब्रह्मणो निमित्तम्, उपादानत्वं वा केवलम्, अनुपपन्नमिति । तत् तथैवेत्यनुजानीमहे । शङ्कावाद्युपन्यस्तयुक्तेरनपवदनीयत्वात् । यत् पुनरुच्यते, ब्रह्मणो निमित्तोपादानोभयरूपकारणत्वमप्यनुपपन्नमेव । तथाविधकारणत्वस्य लोके अदृष्टत्वात्, उपादानत्वे ब्रह्मणः सावयवत्वानित्यत्वादिदोषप्राप्तप्रसङ्गात्, निर्विशेषान्नामरूपादिहीनाद् ब्रह्मणो सविशेषस्य नामरूपादिमतो जगतः समुत्पत्तिस्वीकारे स्वभाववैपरीत्यगमनेन सर्वप्रमाणव्याकोपप्रसङ्गाच्च–इति । तत्र ब्रूमः । न तावल्लोकादृष्टत्वमत्र दोषाय । लोकदृष्टविलक्षणमेव हीदं कारणत्वं श्रुत्यनुगमेन लिलक्षयिषितम्–इत्यवोचाम (खं. ११) । न च श्रुत्यापि अनुभवा-

रोहासमर्थोऽनुपपन्नश्चार्थः कथङ्कारं शक्योऽवगाहयितुम् ? – इति शङ्कयम् । यत्कारणं ब्रह्मणो वस्तुवृत्तेन परिणाम एव वा, प्रागविद्यमानस्य जगतः कार्यरूपेणाभिनवसमुत्पाद एव वा नात्राभ्युपगम्यते । निर्विशेषमेव वस्तुतोऽनामरूपकादिलक्षणमेव च सर्वदा तिष्ठद् ब्रह्म नामरूपादिमज्जगदाकारेण मायया जायत इव – इत्येव तूच्यते । तात्त्विकपरिणामवादे हि परिणामस्वभावकमेव सद् ब्रह्म जगद्रूपेण जायते इत्युक्तं स्यात् ; अर्थात् कारणरूपमपि ब्रह्म जातमेवेत्यापद्यते । तत एव तच्चान्यस्मात, तदप्यन्यस्माज्जायते इत्यनवस्थादोषो दुर्निवारणः स्यात् । अतो न युक्तिमानयं पक्षः । माययैव जायते इति वदतस्तु 'अजायमानो बहुधा विजायते' (तै.आ. ३–१३–३९) इति श्रुत्यवलम्बनान्नैकोऽपि दोषः स्यात् । यथोक्तं वेदान्तसंप्रदायविद्भिः – 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः । तत्त्वतो जायते यस्य जातं तस्य हि जायते' (गौ. का. ३–२७) । यदप्युच्यते, प्रागसत एव जगतो जन्माभ्युपगमे, असतः सत्त्वापत्तिरिति । तदप्येतेन प्रत्युक्तम् । नामरूपाद्यात्मकं हि जगत् नैव कारणभूतब्रह्मात्मना हीनं प्रागुत्पत्तेरिदानीं वा स्वतन्त्रमेव समस्ति । येन प्रागुत्पत्तेरसतः सत्त्वापत्तिः शङ्क्येत । का तर्हि जगत उत्पत्तिर्नाम, या सूत्रिता 'जन्माद्यस्य यतः' इति ? तदेतदुक्तमधस्तात् 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः' इत्यभियुक्तोक्तिमाश्रित्य । असतस्तु कथमपि जन्म नैवाङ्गीक्रियते वेदान्तिभिः । तदप्युक्तमभियुक्तैः 'असतो मायया जन्म तत्त्वतो नैव युज्यते । वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते ॥' (गौ. का. ३–२८) । अतो निरवद्योऽयं ब्रह्मकारणतावादः ॥

१७. उक्तप्रक्रियायाः श्रुत्यादिसम्मतत्वोपपादनम् – स्यादेतत्–सर्वमिदं स्वोपज्ञप्रक्रियान्तररचनामात्रम्, न तु श्रुत्यभिमतम्, सूत्रकाराभिमतम्, भाष्यकाराभिमतं वा – इति भाति । कथम् ? श्रुतिस्तावत् 'यतो वा इमानि भूतानि जायन्ते' इत्याद्येवाह न 'मायया जायन्ते' इति । सूत्रकारश्च 'जन्माद्यस्य यतः' (१–१–२) इत्याह, न तु 'मायया जन्मादि' इति । परिणामवादं च स्पष्टमाश्रयिष्यति परस्तात् 'प्रकृतिश्च' (१–४–२३), 'आत्मकृतेः परिणामात्' (१–४–२६) इति च । भाष्यकारश्च द्वितीयाध्यायसंबन्धकथनावसरे वक्ष्यति 'प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणम्, मृत्सुवर्णादय इव घटरुचकादीनाम्' इति । अत इदं रभसादुक्तं प्रतिभाति 'जगत उत्पत्त्यादिकं लोकसिद्धघटाद्युत्पत्त्यादिविलक्षणम्, मायिकमेव' इति-इति चेत्, अत्र ब्रूमः–न श्रुत्यर्थो न सूत्रकारहृदयं भाष्यकारहृदयं वा व्यज्ञायि भवता, नाप्यस्मदुक्त्यभिप्रायः । श्रुतिस्तावदुदाहृतैव पुरस्तात् 'अजायमानो बहुधा विजायते' (तै. आ. ३–१३–३९) इति । न च सूत्रे 'जन्माद्यस्य' इति निर्विशेषणजन्मकथनमात्रेण सत्यमेव जन्म विवक्षितं भगवतो बादरायणस्य – इति नियन्तुं शक्यम् । भाष्ये 'मृत्सुवर्णादय इव' इति दृष्टान्तादानमात्रेण परिणामवाद एव विवक्षितः इति वा । यतः सूत्रकार एव वक्ष्यति 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे. सू. २–१–१४) इति । अत्र हि 'वाचारम्भणं विकारो नामधेयम्' इति श्रुत्यनुगमेन कार्यस्य प्रतीयमानरूपेण मायिकत्वम्, परमार्थरूपेण

तु कारणादनन्यत्वं च–इत्याह। भाष्यकारोऽपि भवदुदाहृतवाक्यशेषेण **'उत्पन्नस्य च जगतो नियन्तृत्वेन स्थितिकारणम्, मायावीव मायायाः'** इति मायिकत्वमेव जगतः प्राह ॥

न च घटाद्युत्पत्तिविलक्षणमेव जगदुत्पत्त्यादि इत्युक्तमस्माभिः। लौकिकाभिमतघटाद्युत्पत्त्यादिविलक्षणम् इतीयन्मात्रं तूक्तम्; नच स्मर्तुमर्हसि। न हि लोको मृदादिपरिणामेन परमार्थत एव घटाद्युत्पत्तिरित्यभिनिविशते – इत्येतदवजानीमहे वयम्। तदभिनिवेशमेव त्वनूद्य तद्विलक्षणा जगदुत्पत्तिरिति प्रतिजानीमहे। न च घटादिकार्यस्यापि समस्ति पारमार्थिकी उत्पत्तिः, यतो मृद्व्यतिरेकेण नैव सन्ति घटादिनामानो मृदादिविकाराः। यदाह श्रुतिः 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६–१–४), 'लोहमित्येव सत्यम्' (छां. ६–१–५) इत्याद्याः। अत एवाहुः सम्प्रदायविदः **'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा। उपायः सोऽवताराय नास्ति भेदः कथञ्चन॥'** (गौ.का. ३–१५), **'भूततोऽभूततो वापि सृज्यमाने समा श्रुतिः। निश्चितं युक्तियुक्तं च यत् तद्भवति नेतरत्॥'** (गौ. का. ३–२३), **'नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि। अजायमानो बहुधा मायया जायते तु सः॥'** (गौ. का. ३–२४)। न च वस्तुतो जन्माद्यभावे श्रुत्या मायिकजन्मोक्तिः, शारीरके तत्सूत्रणं च निष्फलम्–इति शङ्क्यम्। मन्दमध्यमाधिकारिणां क्रमेणाजाद्वयब्रह्मज्ञानावतारार्थत्वात्तथोपदेशोपपत्तेः।

यदप्युक्तमभियुक्तैः – 'उपालम्भात् समाचारादस्ति वस्तुत्ववादिनाम् । जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥' (गौ. का. ४–४२) इति । अतोऽचोद्यमेतदित्यास्तां तावत् ॥

१८. **निर्विशेषस्य ब्रह्मणो जगत्कर्तृत्वादिलक्षणकारणत्वे आक्षेपपरिहारौ** – अथ कथं ब्रह्मणो निर्विशेषस्यापि जगत्कर्तृत्वम्, उपादानत्वं चोपपादनीयम् । यदि तत एव जगज्जन्मादि विवक्षितम् ? न हि निर्व्यापारस्य कर्तृत्वं निष्परिणामस्य उपादानत्वं वा श्रुत्यापि प्रत्याययितुं शक्यते । क्रियायां स्वतन्त्रो हि कर्ता नाम स्यात्, तक्षकलवित्रादीनां च स्वगतव्यापारापेक्षं वास्यादिकरणप्रयोक्तृत्वमस्ति । अनेकात्मकस्यैव हि मृदादेः परिणामसम्भवात् उपादानकारणत्वं युज्यते, ब्रह्म तु पाणिपादादिरहितं निष्क्रियम, निष्कलं च । अतो दुर्घटमेतदिति भाति । ननु चोक्तं मायिकमेवेदम् उत्पत्त्यादि, अतो न चोद्यमवतरतीति । सोऽपि विषम उपन्यासः । न हि मायाविव्यापारं विना मायासृष्टिरपि समस्ति । स्वायत्तमायामन्तरेण वा । इह पुनः सर्वथापि निर्विशेषत्वादद्वितीयत्वाच्च न व्यापारोऽस्ति ब्रह्मणि कश्चित्, नापि ततो द्वितीयं किञ्चित् सहायकमिति । अतः कथमेतदिति ?

नैष दोषः । अविद्याकल्पित नामरूपलक्षणरूपभेदव्यपाश्रयेण सर्वव्यवहाराणामप्युपपत्तेः । यदा हि सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते अव्याकृते नामरूपे आत्मस्थे तत्त्वान्यत्वाभ्यामनिर्वचनीये व्याक्रियेते, तदा आत्मरूपापरित्यागेनैव तेनाप्रविभक्ते एव च ते व्याक्रियेते । तदेतन्नामरूपव्याकरणं ब्रह्मणो जगज्जन्मकर्तृत्वम्,

तादृशनामरूपविकल्पास्पदत्वमेव च तस्य जगदुपादानकारणत्वम्, ते चैते नामरूपे अव्याकृते प्रकृत्यपरनामधेये 'बीजम्', 'माया', ईश्वरस्य 'शक्तिः'–इति च श्रुतिस्मृत्योरभिलप्येते। 'एकं बीजं बहुधा यः करोति' (श्वे. ६–१२), 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे. ४–१०), 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे. १–३), 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (गी. ७–१४), 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' (गी. ९–१०) इत्यादिश्रुतिस्मृतिभ्यः। तदेतन्नामरूपापेक्षमेव प्रत्यस्तमितसर्वविशेषस्यापि ब्रह्मणः, ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वं च न स्वतः। नामरूपे हि सर्वदा ब्रह्मात्मस्वरूपमप्रविहायैव तदायत्ते प्रतीयेते इति ब्रह्मणस्तदपेक्षम् ईश्वरत्वम्, नित्यं तत्प्रकाशकज्ञानस्वरूपत्वात् सर्वज्ञत्वम्, शक्तिरूपेण स्थितयोस्तयोः स्वात्मन्यध्यस्तत्वात् तत्कृतरूपभेदेन सर्वशक्तित्वं च। तदेवं महेश्वरत्वात्, सर्वज्ञत्वात्, सर्वशक्तित्वात्, महामायत्वाच्च तस्य जगज्जन्मादिकारणत्वं निरातङ्कमुपपद्यते। तथा चैतत् सर्वं विस्तीर्य वक्ष्यति भाष्यकारो द्वितीये अध्याये प्रथमपादे "तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि, ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा चोक्तम् 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' (छां. ७–२४–१) इति, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४–५–१५) इत्यादिना च॥" (सू. भा. २–१–१४,

पा. २००) इति । "अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादि-सर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्व-व्यवहारातीतम्, अपरिणतम् अवतिष्ठते" (सू. भा. २–१–२७, पा. २१३) इति च ॥

१९. **ब्रह्मस्वरूपाधिगमायैव जगज्जन्मादिकारणत्व-मध्यारोप्यते** – नन्वेवं वस्तुतो जगज्जन्मादिकारणत्वं ब्रह्मणो नास्त्येवेत्यायातम् । तथा च मूले कुठारो व्यापारितः । सत्यम्, एतदेवायातम् । निर्विशेषतत्त्वाधिगमार्थमेव तु तस्मिन् जगज्जन्मादि-कारणत्वमध्यारोप्य समपोद्यते श्रुतिषु । तथा हि श्रुतिः 'अथ परा यया तदक्षरमधिगम्यते', यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणि-पादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं. १–१–५, ६) इति अदृश्यत्वादिधर्मकमक्षराख्यं ब्रह्मैव परमार्थः, तदधिगमसाधनमेव च परा विद्या – इति प्रतिज्ञाय, तस्मिन्नेव चाक्षरसंज्ञके भूतयोनित्वमध्यारोप्य, तच्च जगत्कारणत्वं वितत्य प्रदर्श्य, सर्वमप्येतद् तद्विकारभूतं जगत् प्रतीयमानरूपेणानृतमेवेति 'अप्राणो ह्यमनाः शुभ्रः' (मुं. २–१–२), 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुं. २–१–३) इत्यादिना हेतुतः प्रतिपाद्य, अन्ते सावधारणम् उपसंहरति 'ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणत-श्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥' (मुं. २–२–१२) इति । अत एव ह्याहुर्वेदान्तसंप्रदायविदः

'स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा । तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥' (गौ. का. २–३१, ३२) इति । अतः सर्वमनाविलम् ॥

## ५. सूत्रं श्रुत्यनुगमार्थम्, नानुमानोपन्यासार्थम्

**एतदेव अनुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः । ननु इहापि तदेव उपन्यस्तं जन्मादिसूत्रे । न । वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम् । वेदान्तवाक्यानि हि सूत्रैः उदाहृत्य विचार्यन्ते । वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता ॥**

२०. **आनुमानिकेश्वरात् श्रौतेश्वरस्य वैलक्षण्यम्** – श्रुत्युक्तब्रह्मस्वरूपसमर्पणाय लक्षणसूत्रमित्यवोचामाधस्तात् । तत्र श्रुतेरनुमानतोऽभ्यर्हितत्वम्, परमतस्य असम्यग्दर्शनत्वप्रदर्शनेनावीतन्यायेन विशदयितुमाह – '**एतदेव अनुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः**' इति । अत्र 'ईश्वरकारणिनः' इति केवलनिमित्तकारणम् ईश्वरमभ्युपगच्छन्तः, श्रुतिमनपेक्ष्यैवेश्वरमनुमिमानाः स्वस्वाभिमतागमप्रमाणमुदाहरन्तो वैशेषिकपाशुपतादयो

विवक्षिताः, नोभयविधकारणत्वमीश्वरस्याभ्युपयन्तः । उभयस्वभावस्येश्वरस्य सिद्धान्तसम्मतत्वात् । यद्यपि सिद्धान्ते एकमेवाद्वितीयं च ब्रह्म परमार्थतः, तथा च न कारणत्वमपि तस्य ; तथाप्यविद्याकल्पितेन रूपभेदेन तस्य कारणत्वादिव्यवहार इत्यवोचाम, तयैव दृष्ट्या तस्याभिन्ननिमित्तोपादानकारणत्वम् ईशित्रीशितव्यविभागश्च स्वीक्रियते उपदेशार्थमिति च । परमते तु पारमार्थिक एवेशित्रीशितव्यविभागः –इत्ययं विशेषः ॥

अन्यच्चात्र पत्यधिकरणपरिगृहीतार अवैदान्तिकाः स्वस्वागमप्रामाण्यबलात्, अनुमानबलाच्च केवलाधिष्ठात्रीश्वरकारणवादमास्थिता एव परामृश्यन्ते भाष्यकारेण न त्वर्वाचीनमाध्वरामानुजीयादिवेदान्तिनः । भाष्ये कुत्रापि तेषां नामोल्लेखस्यादर्शनात्, भाष्यकारकाले द्वैतविशिष्टाद्वैतादिवेदान्तार्थवादिनां सत्त्वे प्रमाणाभावाच्च । यथा च सर्वेषां प्राचीनवेदान्तिनां नियमेनाद्वैतित्वम्, तथा शुद्धशाङ्करप्रक्रियाभास्करे वेदान्तसिद्धान्तनिर्णयकिरणे प्रतिष्ठापितमिति तत एव ग्राह्यमधिकमितीहोपरम्यते । अभ्युपगम्यापि तादृशवेदान्तिप्रभेदानां प्राचीनकालेऽपि सत्त्वं ब्रूमः । तेषां केवलनिमित्तकारणकेवलोपादानकारणान्यतरपक्षावलम्बे श्रुतिविरुद्धत्वं स्फुटमेव, उभयविधकारणपक्षावलम्बे तु लोकदृष्टविरुद्धत्वादेवोपेक्ष्यता । न च सिद्धान्तेऽपि तुल्यो दोषः । अत्र श्रुत्यनुरोधेन मायिककारणवादोपगमात् सर्वदोषमलवर्जितत्वोपपत्तेः – इत्यलं प्रसङ्गागतचिन्ताया विस्तरेण ॥

२१. सूत्रेण नेश्वरानुमानमुपन्यस्तम्, वेदान्तवाक्यमेव तु सूचितम् – यथोक्तं विशेषमजानानः शङ्कते – ‘ननु इहापि

तदेवोपन्यस्तं जन्मादिसूत्रे ' इति । तदेव–ईश्वरानुमानमेव इत्यर्थः । अयमभिप्रायः – 'जन्माद्यस्य यतः' इति सूत्रयता आचार्येणापि सर्वलोकप्रत्यक्षस्य जगतः कार्यत्वात्, कार्यविषयकज्ञानवान् सर्वेश्वरोऽनुमित्सितः । न्यायप्रस्थानत्वान्मीमांसाशास्त्रस्य । तदयमस्थाने परपक्षोपालम्भ इति । परिहरति – '**वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्**' इति । नानुमानम् । इहोपन्यस्तम् । केवलयुक्तिभिः कस्यचिदर्थस्य असिषाधयिषितत्वादत्र शास्त्रे । कथं तर्हि मीमांसासमाख्या शास्त्रस्य ? न हि तर्कं विना मीमांसा नाम भवति–इत्याशङ्क्य संग्रहवाक्यविवरणेन समाधत्ते – '**वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते**' इति । सत्यम्, मीमांसाशास्त्रमेतदिति । अत एव पूजितविचारात्मकत्वात्, वेदान्तवाक्यान्येव पूज्यप्रमाणभूतानि अत्र उदाह्रियन्ते, तान्येव च विचार्यन्ते इति न मीमांसात्वहानिः – इति भावः । तत् किम् अनुमानादीनि अप्रमाणान्येव सर्वथा, येन तानि नात्रोपन्यस्यन्ते ? तत्राह – '**वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता**' इति । भवन्ति अनुमानादीन्यपि प्रमाणानि स्वस्वक्षेत्रे । ब्रह्म तु जगत्कारणं न तेषां विषयः । अतीन्द्रियत्वात् । स्वयंसिद्धत्वाच्च । स्वयंसिद्धं हि सर्वस्यात्मा ब्रह्म मिथ्याप्रत्ययमात्रव्यवहितमिति यथावस्थितज्ञापकवाक्यमात्रमेवापेक्षते, न प्रमाणान्तरैर्विषयीकृत्य प्रकाशनम् । यथा च नानुमानादिगोचरं तत्, तथा अत्रैवोपसंहारभाष्ये स्फुटयिष्यते । यथा च स्वयंसिद्धमप्रमेयमपि सत् वाक्यप्रमाणैकसमधिगम्यम्, तथा समन्वयाधिकरणभाष्ये विशदीकरिष्यते । तस्मान्नानुमानाद्युपन्यासार्थं सूत्रम् ॥

वेदान्तवाक्यकुसुमग्रथनमपि न केवलं तद्ग्रथनव्यसनितया क्रियते, किं तर्हि, ब्रह्मात्मावगतिनिर्वर्तनार्थम् । 'ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्' (भा. त. खं. १८) इति ह्युक्तम् । अतः सप्रयोजनत्वात् इह वाक्यान्युदाहृत्य विचार्यन्ते । विचारणापूर्वकमध्यवसानेन हि ब्रह्मावगतिर्निर्वर्त्येत इति । तदिदमुच्यते– '**वाक्यर्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः**' इति ॥

**अत्रैके व्याचक्षते** 'विचारस्य अध्यवसानं सवासनाविद्याद्वयोच्छेदः ; ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः' इति । तदाशयं च विवृण्वते तद्व्याख्यातारः 'वाक्यार्थविचारणाशब्देन शाब्दबोध उपासनासहित उक्तः, परस्तादवगतिरेव–इति मध्ये अध्यवसानशब्दो न युक्तः इत्याशङ्क्य नायं ज्ञानवचनः, किं तु संस्कारसहितलयविक्षेपाविद्यासमाप्तिवचन इत्याह–सवासनेति । वृत्तिरूपसाक्षात्कारस्य अविद्याध्वंसिनो मध्ये विद्यमानत्वेऽपि न सोऽध्यवसानशब्देन गृहीतः, अविद्यानिवृत्त्या स्वरूपाभिव्यक्तिं प्रति व्यवधानादिति' इति । नेदं भाष्याक्षरानुगुणं व्याख्यानमित्यस्मन्मतिः । न हि क्वचिदपि भाष्ये वाक्यार्थनिश्चयस्यावगतिव्यतिरेकेण अविद्याद्वयवासनानिर्वृत्त्यर्थमपि यत्नः कर्तव्यत्वेनोपदिष्ट उपलभ्यते, वाक्यार्थज्ञानव्यतिरिक्तः साक्षात्कारोऽप्यन्यः समपेक्ष्यते पुरुषार्थायेति वा । अतो यथाव्याख्यात एवार्थो 'वेदान्तवाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः'– इत्यस्य वाक्यस्येति स्थितम् ॥

## ६. तर्कोऽपि ब्रह्मजिज्ञासायामपेक्ष्यते

**सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत् न निवार्यते श्रुत्यैव च सहायत्वेन तर्कस्य अभ्युपेतत्वात् । तथा हि 'श्रोतव्यो मन्तव्यः' (बृ. २-४-५) इति श्रुतिः, 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान् पुरुषो वेद' (छां. ६-१४-२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति ॥**

२२. **तर्कस्तूपकरणं मीमांसाशास्त्रस्य** – तत् किं सर्वथा अनपेक्षितमेवानुमानादिकमिहेति ? तत्राह–'**सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु**' इत्यादिना '**दर्शयति**' इत्यन्तेन । **सत्स्वपि वेदान्तवाक्येषु** प्रमाणभूतेषु स्वतः प्रतीतिजननसमर्थेषु मन्दमध्यमाधिकारिणाम् तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते । नात्रायमर्थो विवक्षितो यज्जगज्जन्मादिवादीनि वेदान्तवाक्यानि न शक्नुवन्ति स्वार्थं निःसंशयं समर्पयितुमिति, तज्जनितार्थज्ञानं न दृढं भवति यावदनुमानादि तत्सहायार्थं न विनियोक्ष्यत इति वा ; किं तर्हि, येषां मन्दमतीनां वाक्यश्रवणमात्रेण तदर्थविषया अवगतिर्न जायते, तान् प्रत्युपयुज्यत एवानुमानमपीति । अयं हि जगज्जन्मादिकारणवादिनां वेदान्तवाक्यानामर्थः, यज्जन्मादिधर्मिणो जगतो ब्रह्मात्मतादात्म्यम् । उत्पत्तिस्थितिप्रलयावस्थासु

यदात्मतां न जहाति जगत्, तदेव ब्रह्मणो लक्षणम् इति हि तेषां वाक्यानामभिप्रायः । स एष वाक्यार्थो यैर्वाक्यार्थविचारणामात्रेण दृढं संशयविपर्ययप्रतिबन्धरहितं न गृह्यते । तान् प्रति तादृश-प्रतिबन्धापनयाय अनुमानमप्यनुज्ञायत एव । अनुमानशब्देन चात्र श्रुतिप्रमाणमनु प्रयुज्यमानस्तर्कोऽभिप्रेतः । स च संशयादिनिरासद्वारेण ज्ञानसाधनं भवन्, वाक्यैकसमधिगम्यत्वं ब्रह्मणो ब्रुवद्भिर्वेदान्तिभिर्न निवार्यते, किं तु स्वीक्रियत एव–इति भाष्यवाक्यार्थः ॥

अत्र 'अनुमानमपि प्रमाणम्' इति वदता भाष्यकारेण न प्रमाणसंप्लववादोऽङ्गीक्रियते । स्वविषयशूरत्वाभ्युपगमात् प्रमाणानाम् । प्रमाणसंप्लववादिभिरपि तावत् प्रतिप्रमाणं स्वस्वविषयीभूतप्रमेयांश एव हि ज्ञापनीयत्वेनाङ्गीक्रियते । तथा हि दर्शितं न्यायवार्तिक-कारेण – "अयं लौकिकः 'अमुत्राग्निः' इत्याप्तोपदेशादग्निं प्रति आहितप्रत्ययः, तं देशं गच्छति; प्रत्यासीदन् पुनः, धूमविशेषणं धूमाङ्गत्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते; आसन्नतरस्त्विदानीम् इन्द्रियार्थसंनिकर्षादग्निप्रत्ययं करोति तदा निराकाङ्क्षो भवति–इत्यतः प्रधानं प्रत्यक्षम् इति । यत्र संप्लवस्तत्रैवम्; यत्र पुनर्व्यवस्था, तत्र गुणप्रधानता न चिन्त्यते" (न्या. वा. १-१-३, पा. ३०) इति । इह पुनर्ब्रह्मस्वरूपं वेदान्तैकसमधिगम्यं न प्रमाणान्तरविषयो वर्तते कथमपि । तस्मात्, तर्कोऽपि श्रुत्यर्थे प्रमाणमिति नैवाभिप्रेयते, किं तर्हि, श्रवणमात्रेण श्रुत्यर्थमनुभवितुमशक्नुवानानां तदर्थग्रहणदार्ढ्याय

वेदान्ताविरोधी लौकिकस्तर्कः, उपकरणं भवन् अङ्गीक्रियत एव अनुभवाङ्गत्वेनेति । अतो न दोषः ॥

२३. **वेदान्तवाक्याविरोध्यनुमानस्वरूपम्** – अनुमानमपि 'वेदान्तवाक्याविरोधि' प्रमाणं भवेदित्यत्र किमभिप्रेतमिति विवेचनीयमस्ति । 'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना' इति हि प्रत्यज्ञायि पूर्वाधिकरणोपसंहारभाष्ये । तत्र **मीमांसा** वाक्यार्थविचाररूपं शास्त्रम् 'जन्माद्यस्य यतः' इत्यादिसूत्रसमर्पितम् । 'यतो वा इमानि भूतानि जायन्ते' इत्यादिः जगज्जन्मादिवादी **श्रुत्यनुगृहीतस्तर्कः । तदविरोधितर्कात्मकानुमानं** तु 'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्' (मुं. १–१–७) इत्यादिश्रुत्युपजीवी तर्कः, प्रमाणानुग्राहको लौकिकदृष्टान्तबलेन श्रुत्युपदेशविशदीकरणायोपात्तः । (१) 'ब्रह्म वस्तुवृत्तेनैव परिणमते' इति न समीचीनं मतम् । अजाद्वितीयस्यामृतस्वभावस्य मर्त्यत्वेन परिणामानुपपत्तेः । मर्त्यस्य जीवस्य साधनानुष्ठानेनामृतत्वप्राप्त्यनुपपत्तेश्च । (२) 'सर्वमेवेदम् असत्; प्रतीत्यसमुत्पादात्' इति न समीचीनस्तर्कः; 'शुक्तिरजतादिवत् प्रतीयमानस्य सर्वथा निःसारत्वानुपपत्तेः, सर्वथाप्यसतो वन्ध्यापुत्रादेः प्रतीयमानत्वादर्शनाच्च'–इत्यादिकः **केवलतर्कः**, परमतप्रतिषेधेन तदासारताप्रकटनपूर्वकं श्रौतमते विश्वासशैथिल्यनिवारणाय प्रयुज्यमानः – इति विवेकः । एवं चात्र जगतो ब्रह्मकारणकजन्मस्थितिप्रलयवत्त्वात्, नित्यं ब्रह्माव्यतिरिक्तत्वमिति श्रुत्यनुगृहीततर्कात्मक-

6

वाक्यैर्ज्ञापिते, तदुपष्टम्भको लौकिकतर्क एवात्रानुभवाङ्गत्वेनाश्रीयमाणोऽनुमानतर्कशब्दाभ्यां व्यपदिश्यते । इत्थमेव च तर्कस्यापि वेदान्तार्थग्रहणदार्ढ्यार्थम् अनुमतिः, न पुनस्तार्किकसम्मतानुमानादेरपि श्रुतिसहायकत्वमत्राभ्युपेयते । अनुपदमेव तादृशानुमानादेर्भाष्यकारेण कण्ठरवेण दूरीकरिष्यमाणत्वात् इति मन्तव्यम् । अनुमतोऽपि च तर्कः नागमसमबलत्वेन, किं तर्हि श्रुत्यर्थगतसंशयादिविनिवर्तकत्वेनेति सर्वमनाकुलम् ॥

२४. **श्रुत्यैव तर्कस्योपकरणत्वमङ्गीकृतम्** – न चेदं स्वमनीषिकामात्रम्, किं तु श्रुत्यैवोररीकृतम्, अतोऽवश्यं यथोक्तजातीयकस्तर्क आदर्तव्य इत्याह – '**श्रुत्यैव च सहायत्वेन तर्कस्य अभ्युपेतत्वात्**' इति। श्रुत्यभ्युपेतत्वं निदर्शयति "**तथा हि। श्रोतव्यो मन्तव्य इति श्रुतिः, 'पण्डितो मेधावी' इति च**" इति। 'श्रोतव्यो मन्तव्य' इति वाक्यं बृहदारण्यकात् मैत्रेयीब्राह्मणत उद्धृतम् । 'अरे मैत्रेयि, आत्मा वै–आत्मैव द्रष्टव्यः, दर्शनार्हः, दर्शनविषयतामापादयितव्यः । श्रोतव्यः, पूर्वम् आचार्यतः, आगमतश्च । पश्चात् मन्तव्यस्तर्कतः' इति वाक्यभागस्यार्थः । अत्र हि ब्रह्मैकत्वविषयकसम्यग्दर्शनप्रसादः श्रवणोत्तरमननेनापि संपादयितव्यः–इति दर्शितम् । द्वितीयं वाक्यं 'पण्डितो मेधावी' (छां. ६–१४–२) इत्यादि छान्दोग्यगतम् इन्द्रियैरनुपलभ्यमानमपि परमात्मतत्त्वम् उपायान्तरात्, आचार्योपदेशलक्षणात् शक्यमुपलब्धुम् तर्कसाहाय्येन – इति निदर्शयितुम् । यथा गन्धारेभ्यः पुरुषं कश्चित् तस्करैर्बद्धचक्षुषम् आनीय निर्जने वने

विसृष्टम्, पान्थः कश्चित् कारुणिकः चक्षुर्बन्धनं प्रमोच्य गन्धारदिश-मुपदिश्योवाच – ' एतां दिशं व्रज ' इति ; स च पण्डितो मेधावी ग्रामाद् ग्रामं पृच्छन् गन्धारानेवोपसम्पद्यते, एवमेवेह आचार्यवान् पुरुषो वेद–इति । अतः किमवगम्यते ? तत्राह – ' पुरुषबुद्धि साहाय्यम् ' इत्यादि । अत्र यथा दृष्टान्ते पण्डितो मार्गोपदेशवान् मेधावित्वात् परोपदिष्टमार्गावधारणसामर्थ्येन स्वदेशं प्रापत्, एवमेवेह अध्यात्ममार्गेऽपि स्वयं मार्गतत्त्वावधारणसमर्थ एव, आचार्यवान् गुरुणा विमोक्षिताविद्याबन्धनः स्वमात्मानम् उपसंपद्यत – इति ब्रुवती श्रुतिः, न केवलं कृतश्रवणः पण्डितः, किन्तु मेधाव्यपि, उपदिष्टार्थस्य तर्केणानुसंधानसमर्थोऽपि, यः स एव वेद–इति श्रोतृपुरुषबुद्धिसाहाय्य-मात्मनः स्वस्य अपेक्षितं दर्शयतीत्यर्थः । अत्र च बुद्धिसाहाय्यमुदितं न केवलं श्रुत्यर्थविचारे, अपि तु यथोक्तनीत्या तदर्थग्रहणप्रतिबन्ध-विनिवर्तने इत्यवधेयम् ॥

## ७. ब्रह्मजिज्ञासायामेवानुभवाद्यनुसरणे हेतुः

**न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासा-याम्, किं तु श्रुत्यादयः, अनुभवादयश्च यथासम्भवम् इह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य । कर्तव्ये हि विषये नानुभवापेक्षा अस्तीति**

श्रुत्यादीनामेव प्रामाण्यं स्यात् । पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य । कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म ; यथा अश्वेन गच्छति, पद्भ्याम्, अन्यथा वा, न वा गच्छति—इति । तथा 'अतिरात्रे षोडशिनं गृह्णाति'। 'नातिरात्रे षोडशिनं गृह्णाति', 'उदिते जुहोति, अनुदिते जुहोति' इति । विधिप्रतिषेधाश्च अत्र अर्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च । न तु वस्तु 'एवम्, नैवम्', 'अस्ति, नास्ति' इति वा विकल्प्यते । विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः ; न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्, किं तर्हि, वस्तुतन्त्रमेव तत् । न हि स्थाणौ एकस्मिन्, 'स्थाणुर्वा, पुरुषः, अन्यो वा' इति तत्त्वज्ञानं भवति । तत्र पुरुषः, अन्यो वा—इति मिथ्याज्ञानम् । 'स्थाणुरेव' इति तत्त्वज्ञानम्, वस्तुतन्त्रत्वात् । एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम् । तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव । भूतवस्तुविषयत्वात् ॥

२५. 'श्रुत्यादयः प्रमाणं धर्मजिज्ञासायाम्' इति कोऽर्थः ? – ननु किमिति ब्रह्मजिज्ञासायामेव तर्कसहायत्वमाकाङ्क्ष्यते फलनिष्पत्तिं प्रति, न तु धर्मजिज्ञासायामपि ? यदि मतम्, चोदनालक्षणार्थस्य धर्मस्य अतीन्द्रियस्य प्रत्यक्षाद्यविषयत्वात् तर्कानपेक्षा –

इति । तर्हि तुल्यन्यायेन श्रौतार्थत्वेन ज्ञानस्यापि तदनपेक्षैव युक्ता– इत्यभ्युपगन्तव्यं भवति इत्याशङ्कां प्रत्याह– '**न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयः, अनुभवादयश्च यथासम्भवम् इह प्रमाणम्**' इति । अत्र 'श्रुत्यादयः' इति श्रुतिलिङ्गवाक्यादयः शब्दशक्तितात्पर्यावधारणार्था अभिप्रेताः – इति केचित्, श्रुतीतिहासपुराणस्मृतय इत्यपरे । तत्र न केवलं श्रुत्यादयः, किं तु अनुभवादयश्च' इत्यनुभवादिसहकृतानां प्रमाणत्वेन परामर्शात्, श्रुतिस्मृतिशिष्टाचाराणां पूर्वमीमांसायां चोदनालक्षणधर्मविचारे समुपात्तानामेव ग्रहणं न्याय्यमिति इति भाति नः । तत्र हि तन्त्रे 'तस्य निमित्तपरीष्टिः' (जै. सू. १–१–३) इति प्रत्यक्षादीनां धर्मे प्रमाणत्वाभावमुपपाद्य श्रुतिस्मृत्यादय एवोररीकृताः प्रमाणत्वेन, श्रुतिलिङ्गादयस्तु वाक्यार्थाध्यवसाने समपेक्षिता अपि न धर्मे प्रमाणविधया समुपात्ता इति न तेऽत्र 'श्रुत्यादि' इत्यत्रादिशब्देन विवक्ष्यन्त इत्यवगम्यते ॥

२६. **ब्रह्मजिज्ञासाया अनुभवावसानत्वात् अनुभवादिप्रमाणापेक्षा** – अथ 'अनुभवादयश्च' इति किं विवक्षितमिति विवेचनीयम् । अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः ; तस्य अविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः फलम् इति केचित् । एवं च वृत्तिरूपानुभवस्य प्रमाणत्वम्, ब्रह्मस्वरूपाविर्भावलक्षणानुभवस्य फलत्वम् – इति विवेचनात् 'अनुभवावसानत्वाद् ब्रह्मविज्ञानस्य' इति भाष्यमुपपादितं भवति – इति तेषामाशयः । '**श्रुत्यैव च सहायत्वेन**

तर्कस्याभ्युपेतत्वात्' इत्यत्र तर्को युक्त्यपरपर्यायः, अर्थापत्तिरनुमानं वा — इत्यभ्युपगमात् 'अनुभवादयः' इत्यादिशब्देनानुमानार्थापत्ती गृह्येते इत्यभिप्रायस्तेषां व्याख्यातॄणामिति गम्यते । वयं तु पश्यामो नैतत् समीचीनं व्याख्यानमिति । कुतः ? श्रुतिं प्रति क्वचिदपि भाष्ये अर्थापत्तेरनुमानस्य वा सहायत्वेनानभ्युपेतत्वात् । ब्रह्मणोऽनुमानादि-प्रमाणान्तरविषयत्वस्य अत्रैव सूत्रभाष्ये उत्तरत्र निराकरिष्यमाणत्वाच्च तादृशतर्कस्य न श्रुत्युपबृंहकत्वम्, ब्रह्मणि प्रमाणत्वं वा अवकल्पते । जगज्जन्मादिकारणवादिनीनां श्रुतीनामर्थग्रहणदार्ढ्याय हि तर्कसाहाय्य-मूरीकृतं प्रकृतभाष्ये । तत्र जगज्जन्मादिवाक्यानां किं श्रुतिवाक्यत्वादेव ब्रह्मणि प्रामाण्यं स्वीक्रियते, किं वा कार्यलिङ्गकानुमानविधया, आहोस्वित् स्वबोध्यार्थे प्रमितिजनकतया—इति विवेक्तव्यम् । तत्र न तावत् केवलं वाक्यत्वेन । 'तद् विजिज्ञासस्व' इत्याद्युपक्रमसामर्थ्याद् विज्ञानार्थतया एवावगमात् । विज्ञानं हि नामानुभवः । अत एव न कार्यलिङ्गकानुमानविधया । तथा हि 'अस्ति किमपि जगज्जन्मादि-लिङ्गकं ब्रह्माख्यं वस्तु' इति मतिः स्यात्, न पुनरिदं तत् इति विज्ञानम् । इह पुनः 'अधीहि भगवो ब्रह्म', 'तद्विजिज्ञासस्व तद्ब्रह्म', 'आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते.... ॥' इत्यादिवाक्यसन्दर्भपर्यालोचनया विशिष्टविज्ञाना-धायकत्वमेवोद्दिष्टमिति गम्यते । उपपादितं च प्राग् यथा लक्षणसूत्रस्यास्य तदनुगतजन्मादिवाक्यानां च न केवलं ब्रह्मास्तित्वसद्भावनामात्रपरत्वम् । निराकृतश्चानुभवशब्दस्य ब्रह्मसाक्षात्कारार्थस्वीकारवादो भाष्यबहिर्भूत-

त्वोपपादनेन तादृशवादस्य । तस्मान्नेदं तर्कानुभवशब्दयोः सम्यग् व्याख्यानमिति स्थितम् ॥

कथं तर्हि 'अनुभवादयश्च यथासम्भवमिह प्रमाणम्' इति वाक्यं व्याख्येयमिति ? तदुच्यते–उक्तमधस्तात् यथा जगज्जन्मादि-वाक्यान्यपि श्रुत्यनुगृहीततर्कात्मकानीह अनुभवाङ्गत्वेनाश्रीयन्त इति। सत्सु हि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २–१), 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६–२–१) इत्यादिषु श्रुतिवाक्येषु ब्रह्मस्वरूपावगमार्थेषु, तदधिगमार्थम् एवञ्जातीयकास्तर्काः श्रुत्यनुगृहीता अनुभवाङ्गत्वेनोपप्रदर्श्यमाना अपि आगमविधयैव विनियुक्ता भवन्ति। वक्ष्यति हि भाष्यकारोऽग्रे 'श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेन आश्रीयते–स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागत-त्वम्, संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मत्वम्; प्रपञ्चस्य ब्रह्मप्रभवत्वात्, कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेकः– इत्येवञ्जातीयकः' (सू. भा. २–१–६) इति । तत्रागमरूपैरेतादृश-वाक्यैर्निष्पाद्यमानोऽनुभवो विज्ञानापरपर्यायः 'सत्यं ज्ञानम्', 'सदेव सोम्य', 'तत्त्वमसि' इत्यादिवाक्यैरुत्पिपादयिषितानुभवस्य 'प्रमाणम्' इति भाष्यते । वाक्यजन्यावगतिश्च फलरूपा 'अनुभवावसानत्वात्' इत्यत्रत्येन अनुभवशब्देन परामृश्यते। 'अनुभवादयश्च' इत्यादिशब्देन अवान्तरवाक्यजन्यज्ञानोपबृंहकः श्रौततर्कः, तदनुसारिणी लौकिकयुक्तिः, तदविरोधिनी च–इत्येते अपि प्रमाणत्वेनोपलक्ष्यन्ते। ब्रह्मात्मानुभवरूपाम् अवगतिं प्रति परम्परया करणत्वेन, उपकरणत्वेन चानीयमानत्वात् ।

एतच्च 'ज्ञानेन हि प्रमाणेन अवगन्तुमिष्टं ब्रह्म' (जि. भा. त. खं. १८–२२), 'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते' (जि. भा. त. खं. ४२) इति भाष्यवाक्यार्थतत्त्वविवेचनावसरे प्रपञ्चितमेवेत्यलं पल्लवितेन ॥

२७. अनुभवादयश्च यथासम्भवं प्रमाणम्–इत्यस्यार्थः–

तत्र 'अनुभवावसानत्वात्' इति फलभूतानुभवप्रदर्शनं परमार्थतत्त्वावगतौ एकान्तेन जिज्ञासापरिसमाप्तिः–इति द्योतनार्थमिति स्पष्टमेव; 'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९), 'आनन्दो ब्रह्मेति व्यजानात्' (तै. ३–६), 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै. २–९), 'तद्धास्य विजज्ञौ' (छां. ६–१६–३), 'सत्त्वशुद्धौ ध्रुवा स्मृतिः' (छां. ७–२६–२०) इत्यादिषु कृतकृत्यताप्रकाशनार्थम् उपात्ताः विद्याः विज्ञान–ध्रुवस्मृत्यादिशब्दाः एतमेवानुभवं परामृशन्ति। स चानुभवः (१) अवान्तरवाक्यजन्यज्ञानान्यनुभवशब्दवाच्यानि, (२) अनुभवसंनिकृष्टांस्तर्कान् श्रुत्यनुगृहीतान्, (३) तदुपजीवकांश्च लौकिकान् प्रमाणशब्दशब्दितान् अवश्यमपेक्षते स्वोत्पत्तौ दृष्टफलकानुभवपर्यवसानत्वाज्जिज्ञासाया इति स्फुटमेव। अत एव हि शिष्यप्रश्नाचार्यप्रतिवचनलक्षणसंवादरूपया आख्यायिकया जिज्ञास्यं वस्तु समर्प्यते 'कथं नु भगवः स आदेशो भवति' (छां. ६–१–३), 'भगवांस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच' (छां. ६-१-७), 'भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच' (छां. ६–८–७) इत्यादिभिर्वचनैः। अत्र प्रमाणभूतानुभवशब्दवाच्यः

कः पदार्थ इति विचिन्त्यम् । न तावत् प्रत्यक्षानुभवः, नापि सुखदुःखहृदयशूलादिवेदनालक्षणोऽनुभवो मानसः । प्रत्यक्षानुभवो हि बाह्यप्रमेयमात्रविषयः, इन्द्रियसंनिकर्षजन्यश्च काचित्कः ; सुखदुःखाद्यनुभवस्तु वैयक्तिकः, तत्तदाध्यात्मिकवेदनाविशेषः,काचित्कश्च । अयं पुनः सर्वबाह्याध्यात्मिकवेद्यविषयकः प्रकाश आत्मस्थः । कृत्स्नानात्मसंनिधौ, तदभावे च सुषुप्तादिषु सदैवैकरूपेण वर्तमानः सर्वदेशकालस्थितपुरुषमात्रसाधारणः । तदेवं सर्वान्तरानुभवतदनुसारितर्कप्रमाणसहकृता ब्रह्मजिज्ञासा श्रुत्याद्याधेयविज्ञानोत्पत्तिप्रतिबन्धकसंशयादिनिवृत्तिद्वारेण, अधिकारिणाम् अवगत्यपराभिधानानुभवाभिव्यक्तौ पर्यवस्यतीत्येष राद्धान्तो वेदान्तार्थविज्ञानविषयकः ॥

अथ ' यथासम्भवम् ' इति विशेषणार्थो विचिन्त्यः । तत्र श्रुत्यादीनाम् अनुमानादीनां च शब्दतात्पर्यावधृतिद्वारा अनुभवमुत्पाद्य ब्रह्मणि प्रामाण्यम्, अनुभवस्य तु साक्षादेव (इ. सि.) तदविद्याध्वंसित्वेन–इति मत्वा उक्तम् 'यथासम्भवम्'–इति केचित् । तदसत्, श्रुत्यादिशब्देन श्रुतिलिङ्गादिग्रहणस्य अयुक्तत्वात्, श्रुत्यादीनाम् अनुभवादीनां च यथासम्भवं प्रमाणत्वाभ्युपगमे अवगतिपरामर्शालाभाच्च । कस्तर्हि यथासम्भवपदार्थः ? अत्रोच्यते–ज्ञानकाण्डे हि यथावस्थितब्रह्मवस्तुज्ञापकानि ज्ञानवाक्यानि, उपासनापरपर्यायज्ञानविधायीनि च – इति द्विविधानि वाक्यानि समाविष्टानि । तत्र वस्तुप्रकाशकानां यथोपवर्णितानुभवजननद्वारेण प्रामाण्यमित्येकान्तः । उपासनावाक्यानि तु धर्मजिज्ञासाविषयवाक्यवत् कर्तव्यमात्रचोदकानि

– इति न तत्रानुभवापेक्षेति श्रुत्यादय एव तत्र प्रमाणम्, न तु यथाव्याख्यातानुभवादयः। यद्यपि कर्मवाक्येषु, उपासनावाक्येषु च तत्तत्सामग्रीविषयकप्रत्यक्षाद्यनुभवोऽप्यपेक्ष्यत एव, तथाप्युपासनारूप-ज्ञानविषयीभूतवस्तुविषयकानुभवो यथोक्तलक्षणो नैव प्रमाणत्वेनापेक्ष्यते लोकान्तरे प्राप्यत्वात् कर्मफलस्य उपास्यब्रह्मणश्च–इत्यस्त्ययं विशेषः। तदेवं ब्रह्मजिज्ञासायाम् ज्ञेयविषयस्यभाववैलक्षण्यापेक्षया क्वचित् केवलश्रुत्यादीनामेव प्रमाणत्वम् क्वचिच्च श्रुत्यादीनाम् अनुभवादीनां च प्रमाणत्वम् – इति कृत्वा श्रुत्यादयोऽनुभवादयश्च 'यथासम्भवम्' इह प्रमाणम् – इत्युच्यत इति सर्वमवदातम् ॥

२८. **जिज्ञास्यस्वरूपवैलक्षण्याच्च प्रमाणान्तरापेक्षा ब्रह्म-जिज्ञासायाम्** – अथ ब्रह्मजिज्ञासाया एव अनुभवावसानत्वम्, न धर्मजिज्ञासायाः–इत्येतत् कस्य हेतोः? किं नु खल्वस्याः पूर्वजिज्ञासातो वैलक्षण्यं येनात्रैव साधनसामग्र्याम् अनुभवादयोऽप्याकाङ्क्षणीयाः स्युरिति? तत्राह–'भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' इति। ब्रह्म हि भूतं सिद्धं वस्तु, धर्मस्तु भव्यः साध्यः। अत एवं जिज्ञास्यवैलक्षण्याद् युक्तं सामग्रीवैलक्षण्यम् इति भावः। एवमपि किमित्यधिकप्रमाणापेक्षा ब्रह्मजिज्ञासायाम्? – इत्याशङ्क्य साध्यवस्तुनः साध्यत्वादेव जिज्ञासा-काले न तदनुभवोऽपेक्ष्यते संभवति वा। अतः साधनमात्रपरिच्छिन्ना तत्र चिन्तेति 'किं कर्तव्यम्, केन कर्तव्यम्, कथं च कर्तव्यम्?'– इतीयन्मात्रंज्ञातव्यत्वेन तत्रापेक्ष्यते। अतो यथोक्तांशत्रयविषयकज्ञाने-नैवोत्पन्नेन जिज्ञासा परिसमाप्यते तत्र। तच्च ज्ञानं श्रुत्यादिभिरेवोत्पाद्यते नान्यतः – इत्यतः श्रुत्यादीनामेव प्रामाण्यं तत्रेति युक्तम्। अनु-

भवावसानत्वाभावाच्च तत्र फलविषयकावान्तरानुभवलक्षणप्रमाणस्य वा तत्सहकारितर्कस्य वा नाकाङ्क्षा इति च ॥

इतश्चैतदेवम् – **पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य।** न हि कर्तव्यम् आत्मावगतिवत् तर्कसहकृतानुभवप्रमाणव्यापारजन्यम्, येन तस्य तादृशसामग्र्यपेक्षा स्यादपि, किं तर्हि पुरुषप्रयत्नानुनिष्पाद्यमेव तत्। अतः पुरुषप्रयत्नमेवापेक्षते तत् स्वात्मलाभं प्रति, न तु अनुभवं तर्कं वा इति युक्तम् इत्यभिप्रायः। कर्तव्यसामान्यविषया चेयं पुरुषप्रयत्नायत्तता – इत्येतदन्वयव्यतिरेकाभ्यां निदर्शयति – **'कर्तुमकर्तुम्'** इत्यादिना **'उदिते जुहोति, अनुदिते जुहोति'** इत्यन्तेन। पुरुषाधीनोत्पत्तिमत्त्वादेव हेतोः, कर्तुम् अकर्तुम् अन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म। एवं भाविकाले एव स्वोत्पत्तिम्, तदर्थं पुरुषप्रयत्नं चाभिकाङ्क्षमाणं कर्तव्यं कथङ्कारं जिज्ञासोः साद्यस्कानुभवयोग्यम्, कथन्तरां च अनुभवादिप्रमाणसाकाङ्क्षं भवेत्? – इति भावः। लौकिककर्मणः पुरुषाधीनात्मलाभत्वे उदाहरणम् **'अश्वेन गच्छति'** इत्यादि। तत्र 'अश्वेन गच्छति' इति 'कर्तुम्' इत्यस्योदाहरणम्, 'पद्भ्याम् अन्यथा वा' इति 'अन्यथा कर्तुम्' इत्यस्य, 'न वा गच्छति' इति तु 'अकर्तुम्' इत्यस्येति विवेकः। वैदिककर्मणः पुरुषाधीनात्मलाभत्वे दृष्टान्तः 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति'(?)[1] इति। कर्तुमकर्तुं वा इत्यस्योदाहरणमिदम्। 'उदिते जुहोति, अनुदिते जुहोति'(?) इति तु कर्तुमन्यथा वा कर्तुम् इत्यस्य–इति विवेकः॥

1. इदं वचनं कुत्रत्यम् इति न विज्ञायते। शाबरभाष्ये तु सर्वत्र 'अतिरात्रे गृह्णाति षोडशिनम्' इत्येव पदानुक्रमो नियतो दृश्यते वाक्ये॥

अन्यदप्यस्ति वैलक्षण्यं जिज्ञास्ययोः, येनैवं प्रमाणव्यवस्था सुस्था भविष्यतीत्याह – '**विधिप्रतिषेधाश्च अत्र अर्थवन्तः स्युः विकल्पोत्सर्गापवादाश्च**' इति । यत एव कर्मण आत्मलाभः पुरुषाधीनः, अत एवात्र कर्मणि विषये विधिप्रतिषेधा अर्थवन्तः । 'अहरहः सन्ध्यामुपासीत' ( ? ) इत्यादयो विधयः, 'ब्राह्मणो न हन्तव्यः' ( ? ) इत्यादयः प्रतिषेधाः । यदि हि पुरुषो न स्वतन्त्रः स्यात् कर्मणि, कर्म च न तदधीनसिद्धिकम्, तर्हि विधिप्रतिषेधाः निरर्थका एव स्युः, अधिकार्यभावात् ; अप्रमाणं च स्याद् विधिप्रतिषेधशास्त्रम्, अशक्यानुष्ठानचोदकत्वात् । पुरुषाधीनात्मलाभत्वे तु कर्मणः विध्यादीनां सार्थक्यं भवति, अधिकारिलाभात् इत्यर्थः । एवम् 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' ( ? ) इत्यैच्छिको विकल्पः, 'उदिते जुहोति; अनुदिते जुहोति' ( ? ) इति च व्यवस्थितो विकल्पः सार्थको भवति, पुरुषेच्छाधीनात्मलाभत्वादेव कर्मणः । एवम् 'न हिंस्यात् सर्वा भूतानि' ( ? ) इत्युत्सर्गस्य, 'अग्नीषोमीयं पशुमालभेत' ( ? ) इत्यपवादस्य चार्थवत्त्वं भवति, यदैवाहिंसा पश्वालम्भश्च पुरुषाधीनात्मलाभौ स्याताम् – इत्यभिप्रायः ॥

यथा तु लौकिकं वैदिकं च कर्म पुरुषाधीनात्मलाभत्वाद् विधिप्रतिषेधाद्यर्हम्, न तथा भूतं वस्तु तज्ज्ञानं वा पुरुषेच्छया साध्यम्, विधिप्रतिषेधादिगोचरं वा येन ब्रह्मवस्तुज्ञानमपि केवलश्रुत्यादिप्रमाणगम्यं भवेदित्याह – "**न तु वस्तु 'एवम्, नैवम्', 'अस्ति, नास्ति' इति वा विकल्प्यते**" इति । विधिप्रतिषेधादीनामपि

उपलक्षणमेतत् । ब्रह्मवस्तु ' एवं भवतु ' इति विधातुम् 'एवं मा भवतु' इति निषेद्धुं वा न शक्यते ; ' सामान्यतः सर्वस्यात्मा सदपि अमुकस्य नात्मा ' इत्युत्सर्गप्रतिपन्नं विशेषतोऽपवदितुं वा – इत्यपि द्रष्टव्यम् । 'एवम्, नैवम्'; 'अस्ति, नास्ति'–इति विकल्पमात्रप्रदर्शनं तु वस्तुप्रकारे वा प्रकारिसद्भावे वा क्रियायामिव विकल्पो न सम्भवति, अतोऽनुभवलक्षणं प्रमाणं तत्सहायकस्तर्को वा एकप्रकारमेव विज्ञानं जनयेद् ब्रह्मवस्तुनि, न त्वनेकप्रकारम्–इति ज्ञापनार्थम् । ननु वस्तुन्यपि विकल्पा दृश्यन्ते । तद्यथा–तमसि दृष्टे एकस्मिन्नेव वस्तुनि ' स्थाणुर्वा, पुरुषो वा ' इति एकस्यैव पुरुषस्य विकल्पो भवत्येव, तथा ' सूर्यः पृथिवीं प्रदक्षिणीकरोति ' ' पृथिवी सूर्यं प्रदक्षिणीकरोति ' इति ज्यौतिषिका विकल्पयन्ति । एवम् आत्मन्यपि 'अस्ति, नास्ति ; एकः, नाना ; गुणवान्, अगुणः ; ज्ञः, चैतन्यरहितः ; सक्रियः, अक्रियः ' इत्येवञ्जातीयका विकल्पा दृष्टा वादिनाम् । तत्र कथमुच्यते वस्तु न विकल्प्यत इति ? तत्राह – ' **विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः, न वस्तुयाथात्म्यं पुरुषबुद्ध्यपेक्षम्, किं तर्हि, वस्तुतन्त्रमेव तत्** ' इति । अयमाशयः– अस्ति वस्त्वपि क्वचिद् विकल्प्यत इति । परं तु विकल्पनाः न वस्तुस्वभावमनुरुध्य भवन्ति, किं तु पुरुषबुद्ध्यपेक्षाः । न हि वस्तुनः स्वभावः, स्वं रूपम्, एकं नाना च – इति युज्यते । 'वस्तुनः स्वभावो विकल्प्यते' इति हि निःस्वभावत्वमेव वस्तुनो ब्रूयाद् वाक्यम् । न हि पुरुषबुद्धिभेदमपेक्ष्य वस्तुनोऽन्यथात्वं संभवति ; सम्भवति ह्यन्यथात्वे वस्त्वेव न भवेदिति । ' उदिते जुहोति,

अनुदिते जुहोति ' इति तु भिन्नशाखानुयायिनां बुद्धिमपेक्ष्य व्यवस्थया होमक्रियाकालविकल्पः । अतो वस्तुनो याथात्म्यज्ञानेन यथावस्त्वेव भाव्यम् । तत्र यदुक्तं पुरुषबुद्ध्यपेक्षया एकस्मिन्नेव वस्तुनि स्थाणुरूपे 'स्थाणुर्वा, पुरुषो वा, अन्यो वा पिशाचादिः' इति विकल्पोऽपि भवतीति, न तत् तत्त्वज्ञानं भवति । कुतः ? तत्त्वं हि नाम तस्य वस्तुनो भावः, स्थाणुत्वमेव । विकल्पस्य तथात्वाभावात् तदनुसारेणाजायमानत्वात्, न तस्य तत्त्वज्ञानत्वम् । तदाह – **'तत्र पुरुषोऽन्यो वा इति मिथ्याज्ञानम्'** इति । अवस्तुतन्त्रत्वात्; पुरुषबुद्ध्यभ्यूहमात्रत्वाच्च इति शेषः । **'स्थाणुरेव' इति** निश्चयस्तु **तत्त्वज्ञानम्, वस्तुतन्त्रत्वात्** । वस्तुस्वभावमनुसृत्य जायमानत्वात् इत्यर्थः । न च वस्तुनः स्वभाव एव नास्तीति कश्चिदङ्गीकरोति, अन्यत्र शून्यवादिनः शुष्कतर्कमात्रावलम्बिनो वैतण्डिकात् इति भावः । तदेवं यत् पुरुषबुद्ध्यपेक्षं वस्तुनि विकल्परूपं ज्ञानम्, तन्न तत्त्वज्ञानम् । वस्तुतत्त्वस्य ज्ञातृबुद्ध्यनपेक्षत्वात् । न हि प्रकाशस्वभावः सन् सविता अन्यबुद्धिमपेक्ष्य निष्प्रकाशो भवतीति । यत्तु वस्तुतत्त्वायत्तं जायमानं ज्ञानम्, तत्तु तत्त्वज्ञानम् इति प्रमाणं भवति । तदाह – **'एवंभूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्'** इति । **तत्रैवं सति,** भूतवस्तुसामान्यविषये यथोक्तनीत्या विकल्पनानां पुरुषबुद्ध्यपेक्षजन्मत्वान्मिथ्याज्ञानत्वे, वस्त्वनुसारिण एव च सम्यग्ज्ञानत्वे च सिद्धे सति, **ब्रह्मज्ञानमपि वस्तुतन्त्रमेव** – इति फलति । **भूतवस्तुविषयत्वात्** । एवं च वस्तुतत्त्वमनपेक्ष्य जायमानस्य ज्ञानस्य अप्रामाण्य-

प्रसङ्गात्, वस्तुतत्त्वसमर्पकानुभवादीन्यपि अवश्यमत्र जिज्ञासायां प्रमाणत्वेनोपादेयानि, न तु धर्मजिज्ञासायामिव केवलं श्रुत्यादय इति सिद्धम् इत्यभिप्रायः । उपासनस्य तु ब्रह्मविषयकस्य ज्ञानशब्दवाच्यस्यापि कर्तव्यत्वाविशेषात् पुरुषाधीनात्मलाभत्वं विधिप्रतिषेधार्हत्वं चेति न वस्तुतन्त्रत्वमस्तीत्यन्यदेतत् । तदेवं यत् पुरस्तात् प्रतिज्ञातं वाक्यार्थविचारणाध्यवसाननिर्वर्त्यापि ब्रह्मावगतिः, वाक्यवत् तर्कमपि तत्सहायकत्वेनात्रापेक्षत इति, तत् सुस्थितं भवति ॥

## ८. ब्रह्मणो वेदान्तातिरिक्तप्रमाणाविषयत्वे युक्तिः

**ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता । न । इन्द्रियाविषयत्वेन संबन्धाग्रहणात् । स्वभावतो विषयविषयाणि इन्द्रियाणि न ब्रह्मविषयाणि । सति हि इन्द्रियविषयत्वे ब्रह्मणः 'इदं ब्रह्मणा संबद्धं कार्यम्' इति गृह्येत ; कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धम्, किम् अन्येन केनचिद् वा संबद्धम् ? – इति न शक्यं निश्चेतुम् । तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि, वेदान्तवाक्यप्रदर्शनार्थम् ॥**

२९. **केवलतर्कशरणानां शङ्का** – एतावता भाष्यग्रन्थसन्दर्भेण सूत्राणां वेदान्तवाक्यसंग्रथनार्थमेव प्रवृत्तिः, वाक्यविचारणा-

ध्यवसाननिर्वर्त्यत्वाद् ब्रह्मावगतेः ; अत एव चात्र जन्मादिसूत्रे संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनाय अनुमानमेवोपन्यस्तमिति यन्मन्यन्ते ईश्वरकारणिनः, तदयुक्तम् – इति च निर्धारितम् । वेदान्तवाक्यविचारप्राधान्येऽपि न तदर्थग्रहणदार्ढ्यार्थतर्कस्य विनिवारणं भवति ; श्रुत्यैव 'मन्तव्यः', 'पण्डितो मेधावी' इति च पुरुषबुद्धिसाहाय्यस्यापि काङ्क्षणात्, ब्रह्मज्ञानस्य चानुभवावसानत्वात् अनुभवतत्सहायकतर्कयोरप्यत्र प्रमाणत्वेनावश्यमपेक्षणाच्च–इति चोक्तम् । भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य वस्तुतन्त्रत्वे अङ्गीकरणीये, क्रियास्विव वस्तुनि विकल्पासंभवाच्च न केवलमिह श्रुत्यादीनामेव प्रामाण्यम्, किं तु अनुभवादीनामपीत्यभ्युच्चय आश्रितः । तत्र श्रुतिसहायत्वेनाश्रितस्य तर्कस्य नानुमानत्वमिष्टम्, किं तु श्रुत्यनुगृहीततदविरोध्यन्यतरतर्कत्वमेव – इत्यजानानः पूर्वपक्षी शङ्कते – **ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता –** इति ॥

अयमत्र शङ्कावादिनोऽभिप्रायः । सूत्राणां वेदान्तवाक्योदाहरणपरत्वम्, अथ च तर्कापेक्षा – इत्येतद् व्याहतं वचनम् । न हि 'वेदान्तैकप्रमाणगम्यं ब्रह्मवस्तु, अपेक्षते चानुभवतत्सहायकानुमाने अपि सहकारिप्रमाणत्वेन' इति वदन् अविरुद्धव्याहारः स्यात् । न च भूतवस्तुत्वाभ्युपगमात् ब्रह्मणा, प्रत्यक्षादिप्रमाणान्तरगम्यत्वमेव युक्तमभ्युपगन्तुम् । न हि 'इत्थम्भूता उत्तराः कुरवः' इत्यागमरूपो वा, 'इह वटे यक्ष इति वदन्ति' इत्यैतिह्यरूपो वा शब्दः प्रत्यक्षादिवत् भूतवस्त्वनुभवस्य संनिकृष्यते । तस्मात् यद्यनुमानस्यापि ब्रह्मणि

प्रमाणत्वमिष्यते, तर्हि शब्दस्यानुवादमात्रत्वं स्यादिति मुधा वेदान्तवाक्यविचारणाप्रयासः । अथ वेदान्तवाक्यैकगम्यमेव ब्रह्मेत्याग्रहः, तदा परित्यक्तव्या वाक्यमिवानुमानमपि प्रमाणमत्रेति प्रत्याशा—इति ॥

३०. **ब्रह्मणो वेदान्तेतरप्रमाणाविषयत्वम्** – तामेताम् आशङ्कां प्रतिवदति– '**न । इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात्**' इत्यादिना । अयमभिप्रायः । न तावत् प्रत्यक्षप्रमाणगम्यत्वं ब्रह्मणः । इन्द्रियाविषयत्वात् । कुत एतत् ? – इत्यत्रोत्तरम् '**स्वभावतो विषयविषयाणीन्द्रियाणि न ब्रह्मविषयाणि**' इति । 'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्' (का. २-१-१) इति श्रुतेः । विषया हि शब्दस्पर्शरूपरसगन्धवत्त्वात् इन्द्रियैर्गृह्यन्ते ब्रह्म तु शब्दस्पर्शादिरहितम्, 'अशब्दमस्पर्शमरूपमव्ययम्' (का. १-३-१५) इत्यादिश्रुतेः । अतोऽपि न प्रत्यक्षविषयत्वं तस्य । तदेवं प्रमाणभूतेन्द्रियस्वभावालोचनया, प्रमेयभूतविषयस्वभावालोचनया च अवगम्यते ब्रह्मणः प्रत्यक्षाविषयत्वम् । अत एवानुमानाविषयत्वमपि तस्य । कथम् ? **सति हि इन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यम् इति गृह्येत** । धूमो हि इन्द्रियविषयवह्निसम्बद्धो महानसादौ गृह्यत इति धूमलक्षणेन लिङ्गेन पर्वतादावपि तदस्तित्वं निश्चीयते । न तु ब्रह्मणा सम्बद्धं किञ्चिल्लोके दृष्टम् । इन्द्रियाविषयत्वाद् ब्रह्मणः । **कार्यमात्रमेव तु गृह्यमाणम्, किं ब्रह्मणा संबद्धम्, किमन्येन केनचिद् वा संबद्धमिति न शक्यं निश्चेतुम्** । कार्यमात्रं जगद् गृह्यते, न तु ब्रह्मणा अनुगतम् । मृदा इव घटः । अतो

लिङ्गाभावात् न शक्यं ब्रह्मैव तत्कारणमिति निश्चेतुम् । न च कार्यत्वमेव भवतु लिङ्गम् इति शङ्क्यम् । कार्यस्य कारणवत्त्वमात्रदृष्टेः, 'अस्ति जगतः कारणं किञ्चित्' इत्येतावन्मात्रम् अनुमीयेत, न तु कारणविशेषः । अत एव हि विप्रवदन्ते वादिनः, प्रधानं परमाणवोऽन्यद् वा कारणमिति—इति भावः । एतेन उपमानादिप्रमाणान्तराविषयत्वमप्युपपादितं वेदितव्यम् । प्रमातुरप्यात्मत्वाच्च ब्रह्मणो न प्रत्यक्षादिविषयत्वमिति मन्तव्यम् । यथा तु विषयत्वाभावेऽपि ब्रह्मणो वेदान्तैकगम्यत्वम्, तथा समन्वयाधिकरणभाष्ये आवेदयिष्यत इत्यविरोधो द्रष्टव्यः । प्रकृतमुपसंहरति—'**तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि, वेदान्तवाक्यप्रदर्शनार्थम्**' – इति ॥

**३१. अनुमानोपन्यासार्थतानिरासभाष्यव्याख्यानम्,**

**एकीयम्**—इह 'जन्मादिसूत्रं नानुमानोपन्यासार्थम्' इति किं विवक्षितं भाष्यकारेण ?—इति विचारणीयम् । तत्र केचिद् व्याचक्षते 'न यथोक्तविशेषणस्य' (भा. ४) इत्यादिना भाष्येण युक्तिरपि ब्रह्मस्वरूपनिर्णयाय अनेनैव सूत्रेण तन्त्रेण आवृत्त्या वा 'जन्मादि अस्य यतः सम्भवति' इति सूत्रितेति दर्शयति—इति । 'नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे' इत्याक्षेपपरिहारत्वेनोपन्यस्तस्य 'न । वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्' इति भाष्यस्य तु, एवमभिप्रायकत्वं ब्रुवते—"सत्यम्, तदेवोपन्यस्तम् उपकरणत्वेन, न तत्र तात्पर्यम् । तात्पर्यं तु वेदान्तवाक्यग्रथने । तदेव प्रपञ्चयति 'वेदान्तवाक्यानि हि' इति" इति । 'तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्' इत्यादिप्रकृतभाष्ये तु

'युक्तिमपि तदुपकरणीभूतां तदर्थानुभवप्रयोजनां सूचयतीत्युक्तम्' इति स्वाभिप्रायेण शेषपूरणं कृत्वा तत्राक्षेपमुत्थापयन्ति 'नन्वेवं सति कथं युक्तिरब्रह्मविषया सती तद्विषयाणां वाक्यानाम् उपकरणं भवति ?' इति । तत्परिहारं चाचक्षते – 'उच्यते । ब्रह्मपरेषु वाक्येषु मृदादिदृष्टान्तैर्युक्तय उपन्यस्यन्ते । ताश्च विधिप्रतिषेधवाक्ययोः प्रवर्तकत्वनिवर्तकत्वाकाङ्क्षितस्तुतिनिन्दार्थवादवत् स्वरूपवाक्यस्य फलपर्यन्ततापेक्षितसम्भावनार्थवादतां प्रतिपद्यमानाः तत्र श्रुतिसाहाय्ये वर्तन्त इत्युच्यते' इति ॥

**३२. यथोक्तव्याख्यानस्य सूत्रभाष्याभ्याम् असङ्गतत्वम्**– तदिदं सूत्रेण भाष्येण चासङ्गतं व्याख्यानम् इति वयं पश्यामः । तत्र सूत्रेणासाङ्गत्यं तावदुपपाद्यते । ब्रह्मजिज्ञासाकर्तव्यतोपन्यासमुखेन ह्यत्र वेदान्तवाक्यमीमांसाप्रारम्भः प्रतिज्ञातः प्रथमसूत्रे । किंलक्षणं पुनस्तद्वेदान्तोदितं ब्रह्म ? – इत्यत इदमुत्थितं सूत्रम् 'जन्माद्यस्य यतः' इति । तथा च भाष्यपातनिका कृता दृश्यते । तत्र कथमिदं कल्प्यते यत् तन्त्रेण, आवृत्त्या वा अत्र युक्तिरपि सूत्रितेति, सूत्राक्षराणां भाष्याक्षराणां वा तत्सूचकानां अदर्शनेऽपि ? – इति प्रष्टव्या जायन्ते भवन्तः । लक्षणद्वारेणैव ब्रह्मस्वरूपस्य सम्भावनोक्ता–इति व्याख्यानं तु प्रागेव (खं. १५) निरस्तम् । न चेदमेव भाष्यं 'न यथोक्तविशेषणस्य' इत्यादि यथोक्तार्थगमकमिति प्रत्यवस्थातव्यम् । तत्रापि मानाभावात् । वाक्यशेषवैरूप्याच्च । न हि यथोक्तविशेषणस्य जगतः प्रधानाद्यजन्यत्वे हेतुरत्रोपन्यस्तो दृश्यते, सूत्रे वा । न च भाष्ये त्वदभिमतविवक्षया

युक्तिरभिहिता—इत्यत्रास्ति किञ्चिद् गमकम्। वाक्यशेषे च 'सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु' इति जन्मादिसूत्रविषयवाक्यम् आगमत्वेनैव निर्दिष्टं लक्ष्यते; 'तदर्थग्रहणदार्ढ्यायानुमानमपि' इति आगमार्थे एव युक्तिसहायः सङ्कीर्त्यते, न तु परमतनिरासे। अतो वाक्यशेषाननुरूपमिदं मतम्। तदेवं सूत्रासङ्गतं व्याख्यानम् इति स्थितम्॥

भाष्यासङ्गतं चेदं व्याख्यानम्। भाष्यकारो हि 'एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः' इति प्रतिज्ञाय 'तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्' इति विस्पष्टम् उपसमहार्षीत्। तेन च भाष्येण न सङ्गच्छते, युक्तिरप्यत्र परदर्शननिरासिका सूत्रितेति भाष्यकृदभिमतमिति व्याख्यानम्॥

व्याख्यातारस्तु 'एतदेवानुमानम्' इति भाष्यटीकार्थम् एवं विवृण्वन्ति—युक्तिसहितागमोऽत्र सूत्रितो नानुमानम्। युक्तिर्हि सम्भावनाबुद्धिमात्रम् उत्पादयति, अनुमानं पुनरर्थं निश्चाययति। व्याप्त्यनुपपत्त्याभास उदाहरणमात्रदर्शनं युक्तिः, अव्यभिचारिणी च व्याप्तिरनुमानम्। तत्र कुलालादिदृष्टान्तैर्न सर्वज्ञेश्वरकारणत्वं निश्चेतुं शक्यते। विपरीतोदाहरणसंभवात्। किं तु, प्रमाणान्तरे सति कुलालादिदृष्टान्तैः सम्भावयितुं शक्यते। अतो युक्तिरेवैषा। तत्राज्ञानादर्थनिश्चायकमनुमानं मन्यन्ते। .... श्रुतिप्रतिपन्नसर्वकारणसर्वज्ञसर्वेश्वरसर्वफलदात्रद्वितीयब्रह्मप्रतिपत्तौ उदाहरणमात्रेण सम्भावनाबुद्धिहेतुत्वाद् युक्तिमात्रमित्यज्ञानात्, निश्चायकमनुमानं मन्यन्ते—इति। एतदपि भाष्या-

क्षराननुगुणं वर्णनम् , भाष्यवाक्यशेषप्रतिलोमं च इति टीकाविमर्शेनैव दर्शितप्रायम् , अतो नात्र किञ्चिदधिकं वक्तव्यमवशिष्यते । न ह्यत्र भाष्यकारेण दृष्टान्तश्रुतिः काचिदुदाहृता, युक्तिमात्रत्वेन स्वीकृता वा । अनुमानोपन्यासाङ्गीकारवाद एव तु निरस्तः कण्ठरवेणेति । तस्माद्भाष्यासङ्गतं टीकागतव्याख्यानमिति यदुक्तं तत्तथैव स्थितम् ॥

३३. **स्वोक्त्यसङ्गतम् एकीयव्याख्यानम्** – स्वोक्त्यापि असङ्गतमिदं व्याख्यानम् । कथम् ? आदौ युक्तिरपि ब्रह्मस्वरूपनिर्णयाय अनेनैव सूत्रेण सूत्रिता इति प्रतिज्ञाय, मध्ये 'न श्रुत्यादय एव ब्रह्मणि प्रमाणम्, किं तु अनुभवादयोऽपि ; अनुभवावसानत्वाद् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' इति भाष्यानुसरणमपि कृत्वा, पुनरुपसंहारे मृदादिदृष्टान्तैर्युक्तय एव उपन्यस्यन्ते । ताश्च स्वरूपवाक्यस्य फलपर्यन्ततापेक्षितसंभावनार्थवादतां प्रतिपद्यमानास्तत्र श्रुतिसाहाय्ये वर्तन्त इति युक्तीनामुपकरणत्वम् उपपादयद्भिः पूर्वापरासाङ्गत्यं प्रख्यापितं भवति । युक्तीनां भूतवस्तुनि ब्रह्मणि अनुभवार्थतालक्षणं फलमङ्गीकृत्यैव तासां परमतनिरासकत्वमात्रेण सम्भावनार्थवादप्रतिपत्तिमात्रेण वा श्रुतिसहायकत्वमुक्त्वा तत्रैव विश्राम्यतां कथं न पूर्वापरासाङ्गत्यं भवेत् ? न हि संभावनाहेतुत्वमात्रेण अनुभवोपकारकत्वमिति । तदेवं सूत्रेण भाष्योक्त्या स्वोक्त्या च असङ्गतत्वात्, न समीचीनमिदम् एकीयं व्याख्यानमित्युत्पश्यामः ॥

३४. **वेदान्तवाक्यानुमानयोर्विषयविभागः** – तस्मात्, 'जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम्'

इति वाक्यस्य यथाश्रुतार्थ एव ग्राह्यः । जन्मादिकारणवाक्यनिर्दिष्टस्य श्रुत्यनुगृहीततर्कत्वम्, अनुभवसंनिकृष्टत्वं च उपपादितमस्माभिः । तदविरोधितर्कश्च लौकिकोऽपेक्ष्यते, अनुभवानुसारित्वाद् ब्रह्मजिज्ञासायाः, अवगत्याख्यानुभवपर्यन्तत्वाच्च ब्रह्मज्ञानस्य–इत्यपि अनुभवद्वयस्वरूपविवेचनेन हृदयंगमितमधस्तात् । एतौ च श्रुत्यनुगृहीततदविरोधितर्कौ न प्रत्यक्षोपजीवकानुमानादिरूपौ, प्रत्यक्षादीनामुपोद्घातभाष्योक्तनीत्या अविद्याख्याध्यासं पुरस्कृत्यैव प्रवृत्तेः परमार्थसाधकत्वाभावादिति न प्रसर्तव्यम् । एवं चानुभवानुसारिश्रौतयुक्तिः, तदुपष्टम्भकलौकिकदृष्टान्तोपन्यासादियुक्तिश्च परम्परया श्रुत्युक्तब्रह्मस्वरूपनिर्धारणेन ब्रह्मावगतिजनने विनियुज्येते, नानुमानादिप्रमाणविधया – इति ध्येयम् । तद्यथा–जगतो विशेषणचतुष्टयनिरूपणं तावत् श्रुत्युपदिष्टं जगतः कार्यत्वं लोकदृष्टविलक्षणम् इत्यवगमयति । ततश्च तत्कारणत्वेनोक्तस्य ब्रह्मणो जगदुपादानत्वं कर्तृत्वं च लोकसिद्धोपादानत्वकर्तृत्वविलक्षणमिति, अत एव च नित्यशुद्धबुद्धमुक्तस्वरूपस्य कूटस्थस्य जगत्कारणत्वं मायिकमेवेति, तच्च ब्रह्मस्वरूपावगमोपायत्वेनैव श्रूयत इति च । एवं लौकिकदृष्टान्तोपस्थापकश्रुतयोऽपि क्वचित् क्वचिदेवांशे दार्ष्टान्तिकसारूप्यं विज्ञाप्य तत्त्वावगमे सहायीभवन्ति ; न पुनर्दृष्टानुसारेण सर्वसारूप्यमनुमापयन्ति, न च स्वरूपवाक्यं प्रति फलपर्यन्ततापेक्षितसंभावनार्थवादतामात्रं प्रतिपद्यन्ते, यथाहुर्व्याख्यानप्रस्थानावलम्बिन इति बोध्यम् । तद्यथा–'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति....' इति पितृवाक्यं श्रुत्वा श्वेतकेतुः पप्रच्छ 'कथं नु भगवः स आदेशो भवति' इति ।

तद्विवक्षुः पिता दृष्टान्तानुपाददे 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६–१–४) इत्यादीन् । अत्र यथा लोके मृदादिकार्यस्य घटशरावादेर्वाङ्मात्रारभ्यत्वहेतोर्वस्तुवृत्तेनाविद्यमानत्वात्, परमार्थेन मृदात्मना विज्ञातेन सर्वमपि तन्मृन्मयं विज्ञातं भवति ; सर्वमपि कार्यं वस्तुतो मृत्तिकैवेति तु सत्यमत्र – इति, एवमेव ब्रह्मव्यतिरेकेण कार्यजातस्यापि जगदाख्यस्य वस्तुवृत्तेनाभावः, वस्तुवृत्तेन ब्रह्मैव तु तदित्येव सत्यम्–इत्येतदंशे तत्त्वावगमे साहाय्यमाचरति दृष्टान्तादानम् । अत्र यद्यपि मृदादिदृष्टान्तादानरूपा युक्तिरब्रह्मविषया, तथापि उपादानकारणाव्यतिरिक्तमुपादेयं कार्यं जन्मस्थितिभङ्गेषु तिसृष्वप्यवस्थासु इति विज्ञापयन्ती जगतः स्वोपादानभूतब्रह्माव्यतिरिक्ततामुपपादयतीति ब्रह्मविषयवाक्यस्य उपकरणं भवति । मृदादिवदेवाचेतनत्वं सावयवत्वं परिणामित्वं च – इत्याद्यंशेऽपि दृष्टान्तदार्ष्टान्तिकसारूप्यं तु न शङ्कनीयम् । 'स बाह्याभ्यन्तरो ह्यजः' (मुं. २–१–२), 'न जायते म्रियते वा कदाचित्' (का. १–२–१८) इत्यादिश्रुतिभ्योऽजत्वावगमात् ब्रह्मणः, 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६–१९) इत्यादिश्रुतिभ्यो निरवयवत्वावगमाच्च–इति सर्वमवदातम् ॥

## ९. सूत्रलिलक्षयिषितवेदान्तवाक्योदाहरणम्

किं पुनस्तद् वेदान्तवाक्यं यत् सूत्रेण इह लिलक्षयिषितम् ? 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो

ब्रह्मेति' इत्युपक्रम्य आह 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्म' (तै. ३-१) इति । तस्य च निर्णयवाक्यम् – 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति' (तै. ३-६) इति । अन्यान्यपि एवञ्जातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि ॥

३५. सूत्रोपात्तलक्षणवाक्यविषये शङ्का – तदेवम्, वेदान्तवाक्यप्रदर्शनार्थमेव सूत्रम्, वाक्यार्थविचारणाध्यवसाननिर्वर्त्यत्वाद् ब्रह्मावगतेः–इत्युपसंहृते आक्षिपति – '**किं पुनस्तद् वेदान्तवाक्यम्**' इत्यादिना । इदं ब्रह्मणो लक्षणार्थत्वेनोदाहृत्य विचारयितुमिष्टं वेदान्तवाक्यं किम् ? न किमपि सम्भावयामस्तादृशं वाक्यम्, यद्विचारणेन ब्रह्मावगतिस्तर्कसाहाय्येन संसिध्येत् । न हि वाक्यमात्रं यथोपवर्णितं वस्तु समर्पयितुमलम् । न ह्यनुष्ठेये असति पदानां संहतिरुपपद्यते । न च पदार्थत्वं समस्ति ब्रह्मणः, पदार्थत्वे हि प्रमाणान्तरविषयत्वं भवेदिति । न चालौकिकं ब्रह्मपदार्थं तर्कोऽप्यनुभावयितुं शक्नुयात् । दृष्टानुसारित्वात् तर्कस्य–इत्यभिप्रायः ॥

३६. **विषयवाक्योदाहरणम्** – सिद्धान्ती स्वहृदयस्थितेष्वेकं प्रदर्शनार्थमुदाहरन्नेव शङ्कां समाधत्ते – 'भृगुर्वै वारुणिः'

इत्यादिना । अत्रादिमसूत्रेण जिज्ञास्यत्वेनाभिसंहितं ब्रह्मैव लिलक्षयिषितं द्वितीयसूत्रेणेति दिदर्शयिषया 'भगुर्वै' इत्यारभ्य 'तद्विजिज्ञासस्व । तद्ब्रह्मेति' इत्येतदन्तं वाक्यं समुदाहृतम् । भृगुर्हि ब्रह्मज्ञानेन परप्राप्तिर्भवतीति, तच्च गुरूपदेशेनैवावगन्तव्यम् — इति च शिष्टप्रवादं श्रुत्वा पितरमुपससार 'अधीहि भगवो ब्रह्म' इति । पिता च वरुणस्तस्मै ब्रह्मोपलब्धिद्वाराणि 'अन्नं प्राणं चक्षुः' इत्यादीन्युक्त्वा ब्रह्मणो लक्षणमुक्तवान् 'यतो वा इमानि भूतानि जायन्ते ....' इत्यादि । ततः परम् उपसञ्जहार स्वोपदेशं 'तद्विजिज्ञासस्व । तद्ब्रह्म' इति ॥

तत्रैवं स्थिते यद् व्याख्यातारः केचिदाहुः — जगज्जन्मादिकारणे एकत्वनानात्वयोरन्यतरावगमे प्रमाणाभावात्, जगतो बुद्धिमत्कारणपूर्वतामात्रे न्यायतः प्रतिपन्ने 'यतो वा इमानि' इत्यादिना कारणस्यैकवचननिर्देशात् तदर्थमात्रस्यैव विधित्सितत्वात्, अर्थात् सर्वज्ञं सर्वशक्ति जगत्कारणम् — इति कारणविशेषो वाक्यादवगम्यते इति ; 'यज्जगत्कारणं तदेकम् इत्यवान्तरवाक्यम्', 'यदेकं कारणं तद् ब्रह्म'—इति वा 'यत् कारणं तदेकं ब्रह्म'—इति वा महावाक्यम् इति च, तन्न श्रुत्यनुसारीति गम्यते । न हि भृगुः स्वयं जगदिदं सकारणकं भवितुमर्हति—इति न्यायतो बुद्ध्वा तत् किमेकं नाना वा ?—इति बुभुत्सुः पितरमुपगतवान् येनेत्थं वाक्यार्थनिर्धारणम् उपपद्येतापि, किं तर्हि, ब्रह्म विज्ञानादात्यन्तिकः पुरुषार्थ इति शिष्टप्रवादं श्रुत्यैव पितरमुपससार । ब्रह्मपदार्थविशेषज्ञानायैव च प्रश्नप्रतिवचने श्रुतौ प्रवर्तिते लक्ष्येते इति । अतो नेयं वाक्यार्थसरणिः ॥

एवं तु वाक्यविचारतो निर्गलितोऽर्थो भवति । ब्रह्मवस्तुनोऽलौकिकत्वेऽपि ब्रह्मशब्दव्युत्पत्त्या नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं किमप्यस्ति वस्तु इति प्रतीयते इत्युक्तं जिज्ञासासूत्रभाष्ये । इह पुनस्तदेव लक्षणवाक्यविमर्शनेनावसीयते इत्याशयेन 'यतो वा' इत्यादिवाक्यम् उदाजहार भगवान् भाष्यकार इति गम्यते । कथम् ? 'यतो वा इमानि भूतानि जायन्ते' इत्यादिलक्षणवाक्यतो हि सृष्टिस्थितिप्रलयेषु यदात्मतां न परित्यजन्ति भूतानि, तद् ब्रह्म—इत्युच्यते । तच्च, इदं तदिति विशेषेण ज्ञातव्यम् इति 'तद्विजिज्ञासस्व' । इत्यनेनोपदिश्यते । तत् पुनः कथं विजिज्ञासितव्यम् ? —इत्याकाङ्क्षानिवारणार्थम् 'अन्नं प्राणं चक्षुः' इत्यादिप्रतिपत्तिद्वारोपदेश उपन्यस्तः । श्रुत्यन्तरे हि 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' (बृ. ४–४–१८) इति ब्रह्मविज्ञानद्वारत्वेन प्राणादयो दर्शिताः । तदिहापि तद् ब्रह्म अन्नप्राणादिद्वारेण विजिज्ञासस्व इति पित्रुपदेशार्थोऽवसीयते । तथा च अध्यात्ममेव किञ्चित्तत्त्वं ब्रह्मशब्दवाच्यमस्ति ; तत् समालोचनेन विजिज्ञासस्व – इत्युक्तं भवति । तदर्थमेव च तपःशब्दवाच्यं बाह्यान्तःकरणसमाधानं साधनतया उपदिष्टं भूयो भूयः 'तपसा ब्रह्म विजिज्ञासस्व' इति, बहिर्विषयापकृष्टचेतसोऽध्यात्मविषयकविज्ञानासंभवात् इत्युपपद्यते । एवं च यत् प्रतिज्ञातं भाष्यकृता अधस्तात् 'अनुभवादयश्च यथासम्भवमिह प्रमाणम् । अनुभवावसानत्वाद् ब्रह्मजिज्ञासायाः' इति, तन्निदर्शितं भवत्येतद्वाक्योदाहरणेन ।

अनुभवानुसारिणा हि तर्केण भृगुर्ब्रह्मावगतिं प्राप्तवानिति वर्ण्यतेऽत्र 'अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते....' इत्यादिवाक्यसन्दर्भेण—इति सर्वमनवद्यम् ॥

३७. **विषयवाक्ये भूतशब्दार्थविवेकः** – अत्र 'यतो वा इमानि भूतानि जायन्ते' इति यद्यपि भूतशब्देन ब्रह्मादिस्तम्बपर्यन्तान्येव भूतानि मुख्यतः परामृश्यन्त इति गम्यते, 'येन जातानि जीवन्ति' इति प्राणधारणकर्मकधातूपादानात्, तेषामेव परब्रह्मानन्यत्वविज्ञानार्थमिह जिज्ञासोपदेशाच्च; तथापि तेषां नामरूपकृतकार्यकरणसङ्घातानुरोधित्वेनैव व्यवहारदृष्ट्या ब्रह्मणः सकाशाद् भेदोपपत्तेः, जिज्ञासुत्वोपपत्तेश्च, आकाशादिभूतानामपि सङ्घातारम्भकाणां ग्रहणं विवक्षणीयम्। एवमेव 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्याद्यानन्दवल्लीस्थसृष्टिवाक्येन साकं भृगुवल्लीवाक्यानामेकवाक्यतोपपत्तेश्च—इत्यतः सकलचेतनाचेतनविशिष्टजगतो जन्माद्यप्यत्रोक्तमेव भवति। अतो 'जन्माद्यस्य यतः' इति सूत्रस्य विषयवाक्यत्वेनास्योदाहरणं नानुपपन्नमिति मन्तव्यम् ॥

३८. **श्रुत्युपात्तनिर्णयवाक्यसार्थक्यम्** – तदेवं सूत्रलिलक्षयिषितं विषयवाक्यं ससम्बन्धमुदाहृत्य ब्रह्मस्वरूपविशेषं दर्शयन्निर्णयवाक्यम् उदाहरति '**तस्य च निर्णयवाक्यम्**' इति पातनिकापूर्वकम्। अत्र **केचित्** प्रधानादिसंशये निर्णयवाक्यम् 'आनन्दाद्ध्येव' इति—इति व्याचक्षते। "निर्णयवाक्यमपि 'आनन्दाद्ध्येव खलु' इति प्रसिद्धावद्योतकेन हिशब्देन संयुक्तम् आनन्दाव-

द्योतकम् उपपद्यते । अनानन्दात्मके हि जगत्कारणे ब्रह्मशब्दप्रयोगो न युज्यते ; न हि तस्योपेक्षणीये विषये स्वार्थप्रक्षेपेण वृत्तिः समञ्जसा " इति च केचिदपरे । तदयुक्तम् । न ह्यत्र 'प्रधानादि जगत्कारणं न वा ?' इति, 'अनानन्दात्मकं ब्रह्मशब्दयोग्यं न वा' इति वा जिज्ञास्यत्वेन प्रकृतं श्रुतौ, सूत्रे वा । श्रुतौ तावत्, भूतानां जन्मादिकारणं ब्रह्म किंरूपमित्यन्नप्राणादिद्वारेण जिज्ञास्यते भृगुणा, तच्च आनन्दात्मकम्, सर्वान्तरं प्रत्यगात्मस्वरूपम् – इति निर्णीयते आनन्दवल्ल्युक्तपञ्चकोश-प्रक्रियया इति तु गम्यते । 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता' (तै. ३–६) इत्यस्य 'यो वेद निहितं गुहायां परमे व्योमन्' (तै. २–१) इत्यनेनैकार्थ्यात् । सूत्रे खल्वपि 'अथातो ब्रह्मजिज्ञासा' इति जिज्ञास्यत्वेन प्रकृतस्य ब्रह्मण एव 'जन्माद्यस्य यतः' इति स्वरूपविशेषसमर्पकत्वेन प्रवृत्तं वाक्यम् इति युक्तम्, न तु 'जगत्कारणम् एकं वा न वा', 'चेतनं वा प्रधानाद्यचेतनं वा' इत्यादिसंशयनिवारणार्थम् इति स्पष्टम् । तस्मात्, 'यज्जगज्जन्मादिकारणं तद् ब्रह्म' इति सामान्येनोक्तलक्षणस्य ब्रह्मणः स्वरूपम् आनन्दरूप-प्रत्यगात्माभिन्नत्वम् – इति निर्णयवाक्यार्थः । 'आनन्दाद्ध्येव' इति तु तत्र तादृशे ब्रह्मणि जगज्जन्मादिहेतुत्वमपि विद्वदनुभवसिद्धमिति द्योत-यितुम् इत्येव युक्तमिति प्रतीमः ॥

३९. आनन्दशब्दार्थविवेकः – अत्रानन्दशब्देन किं विवक्षितमिति चिन्तनीयम् । न हि प्रत्यगात्मस्वरूपे संवेद्यसुखरूपत्वं विद्यते । अतः किंनिमित्तमुपाश्रित्य प्रवृत्तोऽयमानन्दशब्दः ? – इति

विमर्शनीयमेतत्। किञ्च, 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२७) इति ज्ञानशब्दसामानाधिकरण्येनापि प्रयोगादानन्दशब्दस्य ज्ञानानन्दयोः कीदृशः स्यात् सम्बन्धो ब्रह्मणि विद्यमानयोः-इत्येतदपि विवेक्तव्यम् ॥

तत्र **केचिदाहुः**-नित्यनिरतिशयं सुखं ब्रह्मणि स्वसंवेद्यमिति। नैतदस्ति। मुक्तस्य शरीरकरणयोरभावे विज्ञानोत्पत्त्यसम्भवात् तत्रानानन्दस्वरूपत्वप्रसङ्गात् ॥

**अन्ये तु** 'जगज्जन्मादिकारणं ब्रह्म' इत्युक्ते लक्षणस्य ब्रह्मस्वरूपासंस्पर्शात् सोपाधिकानां सर्वज्ञत्वादीनां कस्यचिद् धर्मतया प्रतिपत्तिर्न युक्ता। तत्र 'यत् सुषिरम्, तदाकाशम्', 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यादिवत् स्वरूपलक्षणमेव किञ्चिद् वक्तव्यम्। ब्रह्मशब्देन बृहत्त्वधर्ममात्राभिधानात्, सच्छब्देन महासामान्यमात्राभिधानात्, विज्ञानस्य च सुखदुःखरागद्वेषादिमहासामान्यत्वात्, न 'ब्रह्म'-'सद्',-'विज्ञान'-शब्दाः स्वरूपं कारणस्य समर्पयितुमलम् - इत्याशङ्क्य आनन्द एव हि ब्रह्मत्वसर्वज्ञत्वकारणत्वादिधर्मवत्तया निरुपाधिब्रह्मस्वरूपमिति निर्णीयते-इत्यध्यवसाय, विज्ञानसामान्यालम्बनम् आनन्दविशेषो ब्रह्म- इत्याहुः। ब्रह्मणः सर्वज्ञत्वादिधर्मवत्त्वे विज्ञानसामान्यवत्त्वे च सद्वितीयत्वं स्यात् - इति चाशङ्क्य तेषां धर्माणां दुःखरागादिप्रपञ्चोपाधितया अनिर्वचनीयत्वान्न दोष इति समादधते ॥

तदेतत् सर्वम् अप्रामाणिकं चोद्यमुद्भाव्य कथञ्चित् समाधातुं प्रयतनम्, वृथायासमात्रफलकमिति च वयं प्रतीमः। प्रकृतलक्षणसमर्पके हि श्रुतिसन्दर्भे विज्ञानस्यापि कर्तृत्वाद्युपाधित्वमालक्ष्य

तस्याब्रह्मत्वं विनिश्चित्य सर्वान्तरस्यैवानन्दस्य ब्रह्मत्वेन निर्णयः कृतः । तस्य चानन्दस्य ब्रह्मानन्दवल्लीस्थलक्षणवाक्यगतज्ञानशब्देन सामानाधिकरण्ये स्वीक्रियमाणे न कस्याश्चिद् यथोक्तायाः शङ्काया अवकाशोऽस्ति । न च सच्छब्दस्य महासामान्यमात्रवाचकत्वं शक्यं वक्तुम्, सत्तालक्षणसामान्यस्य द्रव्याद्यनुगतत्वेनानात्मत्वे सति तस्मिन् ब्रह्मत्वशङ्काया एवानुत्थानात् । ‘सदेव सोम्येदमग्र आसीत्, अस्तीत्येवोपलब्धव्यः’ इत्यादिश्रुत्यवगतसत्त्वस्य ब्रह्मस्वरूपमात्रत्वात्, निरस्तसत्ताकस्य ब्रह्मणश्चिन्तयितुमप्यशक्यत्वाच्च, तस्मिन् सामान्यत्वशङ्काया अनवकाशात्, न कथमपि यथोक्तशङ्काया उत्थानं भवति । न च यथोक्तसिद्धान्तो निरपवादः । ‘विज्ञानसामान्यालम्बनम् आनन्दविशेषो ब्रह्म’ इति वदतो हि स एव निरुपाधिकत्वाभ्युपगमो हीयेत । न च विज्ञानस्य सामान्यत्वमस्ति, आनन्दस्य विशेषत्वं वा । अनात्मधर्मत्वादेव सामान्यविशेषयोः । ‘विज्ञानमानन्दं ब्रह्म’ (बृ. ३–९–७) इति तु ब्रह्मस्वरूपान्वाख्यानपरैव श्रुतिरित्यकामैरप्यभ्युपगन्तव्यम् । न चैवं ब्रह्मविज्ञानानन्दशब्दैरभिधेयत्वं दुर्वारं स्यात ब्रह्मणः, तथा च ‘यतो वाचो निवर्तन्ते’ (तै. २–९) इत्यादिश्रुतिविरोधः—इति शङ्कनीयम् । उक्तपरिहारत्वात् । अविद्याकल्पितनामरूपबीजव्याकरणापेक्षयैव ब्रह्मणो जगत्कारणत्वं ब्रह्मविज्ञानानन्दादिशब्दनिर्देश्यत्वं चाभ्युपगम्यते । निर्विशेषतत्त्वाधिगमोपायत्वेनैव चेदं कारणत्वं शब्दवाच्यत्वं चाध्यारोप्यते । तथैव हि ब्रह्मजिज्ञासा अवकल्पत इति । अपोद्यते तु जिज्ञासान्ते कारणत्वमिव शब्दवाच्यत्व-

मपि–इति (खं. १७, १८) उक्तपरिहारमेतच्चोद्यम् । अपवादावस्थामेव त्वपेक्ष्य 'यतो वाचो निवर्तन्ते' (तै. २–९) इत्यादिश्रुतिप्रवृत्तिरित्यदोषः । तथा हि बृहदारण्यकभाष्यम् –

"अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानन्दं ब्रह्म', 'विज्ञानघन एव', 'ब्रह्म', 'आत्मा' इत्येवमादिशब्दैः । यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषम्, तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम् । तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण 'नेति नेति' इति निर्देशः ॥"

बृ. २–३–६, पा. ७५५–७५६.

इति । अपि च यदापि ज्ञानादिशब्दैर्विधिमुखेन निर्देश इव, तदापि न साक्षात्तत्तच्छब्दवाच्यत्वं विवक्ष्यते, निरस्तसमस्तशब्दविशेषे वस्तुनि कथमपि शब्दप्रवृत्त्यनुपपत्तेः । अत एव हि तैत्तिरीयभाष्यं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति लक्षणवाक्यार्थव्याख्यात् –

"तस्मादेव च न ज्ञानशब्दवाच्यमपि तद् ब्रह्म । तथापि तदाभासवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते, न तूच्यते । शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात् । तथा सत्यशब्देनापि । सर्वविशेषप्रत्यस्तमितरूपत्वाद् ब्रह्मणः । बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते । 'सत्यं ब्रह्म' इति । न तु सत्यशब्दवाच्यमेव ब्रह्म । एवं सत्यादिशब्दा इतरेतरसन्निधानात् अन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात् तन्निवर्तका ब्रह्मणो लक्षणार्थाश्च भवन्तीत्यतः सिद्धं 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह', 'अनिरुक्तेऽनिलयने' इति चावाच्यत्वम्, नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः ॥"

तै. भा. २–१, पा. २८५.

इति । अत्र 'लक्ष्यते' इत्यत्रापि न निर्भरः । वाच्यार्थस्वीकारेऽनिष्टापत्तिर्हि लक्षणाश्रयणे बीजम् । अत्र तु वाच्यत्वसम्भव एव नास्तीति

कुतः स्याल्लक्षणाकाङ्क्षेति ? केनचिदपि शब्देनावाच्यं वस्तु, अथ च लक्षणावृत्त्या शब्देन बोध्यत इति हि विप्रतिषिद्धम् । अतोऽत्र सत्यादिशब्दलक्ष्यत्वमध्यारोप्यते ब्रह्मणि तदस्तित्वाधिगमाय, शब्दवाच्यत्वबुद्धिवारणाय, न तु लक्ष्यत्वमेव तात्पर्येणावधार्यते । 'यतो वाचो निवर्तन्ते' (तै. २-९) इति श्रुत्या अविशेषेण सर्वथापि शब्दप्रवृत्तिनिषेधात् तत्र । एवमेव हि 'अवाक्यार्थत्वं ब्रह्मणः' इति भाष्यवाक्यं सार्थकं भवतीति । नन्वेवं लक्षणवाक्यमिदम् इति वाचोयुक्तिरनर्थकैव स्यात्, तथा च 'शून्यमेव ब्रह्म' इत्यनिष्टापत्तिरपि इति चेत् । न । ब्रह्मणः सर्वथापि परागर्थधर्मराहित्यविज्ञापनेन प्रत्यक्प्रावण्यसंपादनेन सार्थकत्वात् । वाक्यशेषेण च 'तस्माद्वा एतस्मादात्मनः' इति वेदितुः प्रत्यगात्मत्वेनोपदेशात् नित्यनिरस्तसमस्तविशेषं 'सर्वप्रत्यगात्मभूतं ब्रह्म' इत्यप्रत्याख्येयास्तित्वज्ञापनेन सर्वदोषनिवारणाच्च निरपवादं लक्षणवाक्यत्वमित्यलमतिविस्तरेण ॥

यथैव ज्ञानशब्दो ब्रह्मस्वरूपान्वाख्यानपरः, एवं सच्छब्दानन्दशब्दावपीति बोध्यम् । तथा हि **छान्दोग्यभाष्यम्** –

> "'सत्' इति अस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः"
>
> छां. भा. ६-२-१, पा. ५०६.

इति । अत्र **तैत्तिरीयके** सत्यज्ञानशब्दाभ्यां निर्दिष्टमेव निर्विशेषं वस्तु सच्छब्देन निर्दिष्टमिति स्पष्टम् । उक्तं हि तत्रापि

> "सन्मात्रत्वं च सत्यत्वम् । 'तत् सत्यम्' इति श्रुत्यन्तरात्"

इति । एवमानन्दशब्दोऽपि निर्विशेषस्वरूपसमर्पकः । तदेवं सद्-ब्रह्म ज्ञान-विज्ञानानन्दादिशब्दाः प्रसिद्धलौकिकार्थवाचका अपि वेदान्तैकावगम्ये परमार्थवस्तुनि सामान्यविशेषभावमनाश्रित्यैव, काञ्चन शब्दवृत्तिमनपेक्ष्य च नित्यनिरस्तसमस्तविशेषस्वरूपमात्रसमर्पकत्वेन प्रयुज्यन्ते श्रुतिषु । तत्तच्छब्दलक्ष्यत्वं तु क्वचिदध्यारोप्यते तत्त्वोपदेष्टृभिराचार्यैः, तत्र शब्दवाच्यत्वभ्रमवारणाय, न तु शब्दलक्ष्यार्थत्वमप्यभिप्रेत्य । सर्वथापि तु शब्दव्यापाराविषयत्वमागमयितुं 'यतो वाचो निवर्तन्ते' (तै. २-९), 'स एष नेतिनेत्यात्मा' (बृ. ३-३-६) इत्येवमादयो निषेधश्रुतयः प्रवृत्ता इति सर्वमनाकुलम् ॥

इदं त्वत्रावधेयम् । न सर्वत्रापि ब्रह्मानन्दशब्दयोः सामानाधिकरण्योपलब्धिमात्रेण निर्विशेषमेव वस्तु निर्दिदिक्षितमिति नियन्तुं शक्यते । श्रुतिलिङ्गवाक्यप्रकरणादिसमालोचनयैव निर्धारणीयत्वात् ब्रह्मानन्दादिशब्दार्थविशेषस्य । तद्यथा – (१) 'सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह' (तै. २-१) इतिवाक्येन ब्रह्मविदः परमपुरुषार्थप्राप्तिः पूर्वं प्रतिज्ञातैव व्याचिख्यासिता यस्मात्, तस्मात् निर्विशेषमेव वस्तु ब्रह्मशब्दार्थ इति निश्चीयते । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन' (तै. २-४) इत्यस्य तु पूर्वप्रतिज्ञातमनोमयब्रह्मविषयत्वात्, ब्रह्मशब्दः, आनन्दशब्दो वा न निर्विशेषब्रह्मनिर्देशको भवितुमर्हति । मनोमयस्य वाङ्मनसागोचरत्ववचनं तु एकस्मिन्नेव कर्मकर्तृत्वं न सङ्गच्छत इति कृत्वा ।

आनन्दश्च तत्र वेदात्मनो हिरण्यगर्भस्यैवेति प्रत्येतव्यः, य उदर्के 'स एको ब्रह्मण आनन्दः' (तै. ३–९) इति पराम्रक्ष्यते, यं च भाष्यकारा विशिंषन्ति 'यत्रैते आनन्दभेदा एकतां गच्छन्ति । धर्मश्च तन्निमित्तो ज्ञानं च तद्विषयकम् । अकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भो ब्रह्मा तस्यैष आनन्दः' (तै.भा. पा. ३०६) इति । धर्मज्ञानाद्युत्कर्षनिमित्त एव ह्यानन्दो निर्दिष्टस्तत्रेति स्पष्टम् । तस्य च यावत्कल्पभावित्वात्, आपेक्षितनित्यत्वमपेक्ष्य 'न बिभेति कदाचन' इति विनाशभयप्रतिषेधः क्रियते मनोमयब्रह्मवाक्ये । अत एव ह्युत्तरत्र भाष्यकारैरपि लिखितं ब्रह्मस्वरूपानन्दनिर्दिदिक्षुभिः 'तस्य, अकामहतत्वप्रकर्षतश्च उपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रा एकदेशः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरात्, '.... स एष आनन्दः, परमानन्दः, स्वाभाविकः, अद्वैतत्वात् । आनन्दानन्दिनोश्च विभागोऽत्र ॥'(पा. ३०७) इति । 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै. २–९) इत्यनुवाके पुनः आत्यन्तिक एवानन्दो निर्विशेषात्मस्वरूपभूतश्च निर्दिदिक्षितः, भयहेतोरपि प्रतिषेधात् ; ब्रह्म च निर्विशेषवस्तुस्वरूपमेव निर्दिष्टं तत्रेति गम्यते ; 'ब्रह्मविदाप्नोति परम्' इत्युपक्रान्ताया एव ब्रह्मविद्यायाः फलस्योपसञ्जिहीर्षितत्वात् । तथा हि भाष्यम् 'तस्मात् ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि यस्मात् प्रत्ययाविषयात् अनभिधेयात् अदृश्या(श्यत्वा?)दिविशेषणात्, सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते । तं ब्रह्मण आनन्दं ........

विषयविषयिसंबन्धविनिर्मुक्तं स्वाभाविकं नित्यमविभक्तं परमानन्दं यथोक्तेन विधिना विद्वान् न बिभेति कुतश्चन । निमित्ताभावात्' (तै. भा. २-९, पा. ३११) इति । एवं प्रकृते भृगुवरुणसंवादेऽपि-इति बोद्धव्यम् ॥

तदेवम् 'आनन्दो ब्रह्मेति व्यजानात्' इति ब्रह्मस्वरूपान्वाख्यानपरं निर्णयवाक्यमिति साधूक्तमिति स्थितम् ॥

४०. **जगत्कारणवाक्यानि सर्वाण्यप्यत्र लिलक्षयिषितान्येव** – तैत्तिरीयवाक्यमुदाहृतमत्र, जगज्जन्मस्थितिप्रलयानां तत्र स्फुटमुल्लेखनात्, 'तद्विजिज्ञासस्व' इति जिज्ञास्यब्रह्मलक्षणसमर्पकत्वेन स्पष्टमेव उभयाधिकरणसंस्पर्शित्वाच्च वाक्यस्य । श्रुत्यन्तरेष्वपि यत्र यत्र जगज्जन्मादिकारणत्वेनोपदिश्यते ब्रह्म, तज्जन्माद्यन्यतममात्रकारणत्वेन वा, तत् सर्वमपि वाक्यजातम् इह विषयवाक्यत्वेनोदाहर्तव्यमेव । तत्र जन्माद्यन्यतममात्रकारणवचनव्यक्तेः, अवशिष्टोपलक्षणत्वस्य पूर्वापरवाक्यार्थपर्यालोचनया अवगम्यमानत्वात् । सर्वत्र ह्यस्मिन् शास्त्रे सूत्रैर्विचार्यत्वेनोपप्रदर्शितवाक्यार्थपरिशीलनन्यायानां तत्तज्जातीयसर्ववाक्यार्थनिर्णायकत्वेनैव विनियोगोऽभीष्टः-इत्यभिप्रेत्याह '**अन्यान्यप्येवञ्जातीयकानि**' इत्यादि ॥

तत्र निदर्शनत्वेन कतिचिद् वाक्यानीहोदाहरिष्यामः । छान्दोग्ये 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६-८-४) इति तेजोऽबन्नजन्मकारणस्य सद्ब्रह्मणः सर्वप्रजाजन्मादिकारणत्वमाह । तथा बृहदारण्यके 'कस्मान्मूलात् प्ररोहति' (बृ. ३-९-६), 'को न्वेनं जनयेत् पुनः' (बृ. ३-९-७) इति प्रश्नद्वयापाकरणाय

जगन्मूलस्वरूपविशेषं 'विज्ञानमानन्दं ब्रह्म' (बृ. ३–९–२८) इति निर्णयवाक्यमुपन्यस्तम् । एवमाथर्वणे 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' (मुं. १–१–९), 'एतस्माज्जायते प्राणः' (मुं. २–१–६), 'तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' (मुं. २–१–१) इति च जगत्प्रभवप्रलयौ श्रूयेते अक्षरसंज्ञकाद् ब्रह्मणः । एवं 'स प्राणमसृजत प्राणाच्छ्रद्धाम्', 'इमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' (प्र. ६–४, ५) इति च कलारूपजगतः सृष्ट्यस्तमयौ परमपुरुषाद् भवत इत्युक्तम् । एतेषां सर्वेषामपि वाक्यानाम् एकजातीयत्वं नाम इदमेव हि यत् सर्वत्रापि नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्म जगत्कारणत्वेन समर्पितमस्तीति । अतः साधुसूत्रितमिदं यत् 'जन्माद्यस्य यतः, तद्ब्रह्म – इत्येतत् सर्ववेदान्तसिद्धमिति' इत्यभिप्रायः ॥

ननु यथोदाहृतेषु वाक्येषु 'भूतानि', 'प्रजाः', 'खं वायुः', 'भावाः', 'षोडशकलाः' इति च जगदेकदेशभूतभूतादीनामेवोत्पत्त्यादि प्रदर्श्यते न पुनर्जगत्सामान्यस्य । प्रतिज्ञातं तु सूत्रे 'जन्माद्यस्य यतः' इति प्रत्यक्षसंनिधापितस्य जगत्सामान्यस्य जन्मस्थितिभङ्गम् । व्याख्यातं च भवद्भिरपि (खं. ६) 'षष्ठी जन्मादिसंबन्धार्था' इति भाष्यार्थतत्त्वविवेचनावसरे 'लोकसिद्धतत्तद्भावगतजन्मादिव्यतिरेकेणैव जगज्जन्मादीनामत्र प्रतिपिपादयिषितत्वात्' इति । विशदीकृतं च पुनरप्येतत् (खं. ८) 'नामरूपाभ्यां व्याकृतस्य जगतः फेनस्येव सलिलतो

यतो जन्मस्थितिभङ्गं भवति तद् ब्रह्म ' इति । तत् कथमिह पूर्वापर-सङ्गतिः ? — इति चेत् । नायं दोषः । ' यतो वा इमानि भूतानि ' इति श्रुतौ सकलचेतनाचेतनविशिष्टजगत एव जन्मादेर्विवक्षितत्वोप-पादनेन (खं. ३७) कृतसमाधानत्वात् शङ्कायाः । छान्दोग्ये ' इमाः सर्वाः प्रजाः ' इति जायमानजगतः सर्वस्यापि जन्मादिविवक्षितमिति ' ऐतदात्म्यमिदं सर्वम् ' (छां. ६–८–७....) इत्यभ्यासेन ज्ञापनात्, मुण्डकेऽपि ' पुरुष एवेदं विश्वम् ' (मुं. २–१–१०), ' ब्रह्मैवेदं विश्वम् ' (२–२–११) इति चावधारणदर्शनात् । प्रश्नोपनिषद्यपि ' एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठते ' (४–७), ' विज्ञानात्मा सह सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति ' ( प्र. ४–१०) इति कृत्स्नजगत्प्रलयस्यै-वोपसंहारे दर्शनात् । ' तन्नामरूपाभ्यामेव व्याक्रियत ' (बृ. १-४-७) इत्यव्याकृतव्याकरणं परमेश्वरकर्तृकमेवेति ' सत्येव परमेश्वरे व्याकर्तरि सौकर्यापेक्षया कर्मकर्तरि लकारः, कर्मण्येव वा कर्तारमपेक्ष्य ' (सू.भा. १–४–१५) इति च भाष्यकारेण उपपादयिष्यमाणत्वात् । ' इदं सर्वमसृजत ' (तै. २–६) इत्यादिस्थलेषु प्रत्यक्षेणैव जगत्सामान्यसृष्टि-कर्तृत्वस्य श्रूयमाणत्वाच्च सर्वमेतत् सङ्गतमित्यनवद्यम् ॥

---

# अथ जन्माद्यधिकरणे परिशिष्टचिन्ता

## १. अधिकरणभाष्यार्थसारः

४१. **अधिकरणे विचारविषयः** – जिज्ञासासूत्राधिकरणे इवात्रापि विषयाद्यङ्गानि विभज्य विचार्यन्ते । तत्र 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्मेति' (तै. ३–१) इत्यादिवेदान्तवाक्यान्यस्य **विषयः** ॥

यद्यपि सूत्रे वेदान्तवाक्यविचारश्चिकीर्षित इत्यत्र गमकं किञ्चिन्नोपलभ्यते ; सूत्राक्षराणि तु 'जन्मादि अस्य यस्माद् भवति तद् ब्रह्म' इति बोधनेनैवोपक्षीणानि लक्ष्यन्ते, तथापि '**शास्त्रयोनित्वात्**' (१–१–३) इति समनन्तरोत्तरसूत्रे स्फुटतरं सूच्यमाणं शास्त्रप्रमाणकत्वं मनसि कृत्वैव इदं सूत्रं प्रवृत्तमिति गम्यते । अन्यथा हि शास्त्रादौ सूत्रितो ब्रह्मजिज्ञासाकर्तव्यत्वोपदेशो व्यर्थ एव स्यात् । ब्रह्मशब्दस्य लोकसिद्धब्राह्मणाद्यर्थकत्वे तादृशार्थस्य ज्ञातत्वात्, अलौकिकार्थत्वे च तल्लक्षणादिज्ञानद्वाराभावात् जिज्ञासाया अशक्यकरणत्वम् आपद्येतेति । अतः शास्त्रसूत्रितजिज्ञासाकर्तव्यताया उपपादकत्वेन यथा वाक्यविचारो नान्तरीयकत्वेन प्राप्तः, एवमत्रापि ब्रह्मस्वरूपं जिज्ञासुना वाक्यविचार एव कर्तव्यतया प्राप्नोति । तदेतत् सूत्रार्थगतशङ्कासमाधानोपन्यास-

ध्याजेन स्पष्टतरमाह भाष्यकारः 'वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते । वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः । नानुमानादिप्रमाणान्तरनिर्वृत्ता' इति, 'तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम्' इति च । तस्मादवगम्यते 'यतो वा इमानि भूतानि जायन्ते' इत्यादिजगज्जन्मादिकारणब्रह्मवाक्यान्येवात्र विषयीकृत्य विचारयिषितानि — इति ॥

४२. अत्र संशयः — यथोदाहृतं वाक्यं ब्रह्मस्वरूपमवबोधयति, न वा इति । कुतः पुनः श्रुतिवाक्ये अबोधकत्वशङ्का ? उच्यते । कृत्स्नस्य जगतो जन्मन एव तावत् अस्मदादिभिर्जगदन्तर्भूतैरशक्योपलम्भनत्वात् । लोके च कार्यजगज्जन्मादिकारणस्यैकस्य वस्तुनोऽदृष्टत्वात्, यथोक्तलक्षणे असम्भावितत्वशङ्का समुदेति । 'जगतो जन्मादि यतः तद् ब्रह्म' इत्युक्ते तावन्मात्रेण ब्रह्मस्वरूपज्ञानानुदयात् नेदं लक्षणं भवितुमर्हतीति भाति । निर्दोषश्रुत्युपदिष्टत्वात् इदं लक्षणं भवेदित्यपि भाति । अतः संशयो जायते, किमत्र युक्ततरमिति ॥

४३. पूर्वः पक्षः — तत्र तावत् प्राप्नोति नेदं ब्रह्मणो लक्षणं भवितुमर्हति । एतादृशकारणत्वस्य कस्मिंश्चिदेकस्मिन्नेव वस्तुन्यसंभवात् । न हि लोके कुलालादिकर्तृकं घटादिकं तस्मिन्नेव स्थितिं लभते । लीयते वा ; न च मृदादितो जातं घटादिकं मृत्कर्तृकं भवति । ब्रह्म तु 'बहु स्यां प्रजायेय' इत्यालोच्य सर्वमिदं बभूव—इति श्रूयते ।

न च लोके मृदाद्युपादानकारणं बहु स्यामित्यालोचनक्षमं दृष्टम्, न च कुलालादिः कर्ता आलोचनसमर्थो घटादिरूपेण जायमानो दृष्टः। अत एकस्मिन्नेव कारणे अभिन्ननिमित्तोपादानत्वस्यादृष्टत्वात् असंभावितमिदं कस्यचिल्लक्षणमिति । कथञ्चित् संभवदपीदं लक्षणं न ब्रह्मणः स्वरूपं समर्पयितुमलम् । जगज्जन्मादेर्जगन्मात्राश्रितत्वात्, ब्रह्मणः स्वरूपमीदृशमिति विशिष्याज्ञापनाच्चेति ॥

४४. **एकीयमतेन सिद्धान्तः – तत्रैके** आहुः–पुरुषमतिप्रभवत्वेन सम्भावितदोषस्य अनुमानस्य अपौरुषेयत्वेनापास्तदोषागमानुग्राहकतर्कत्वात्, अतीन्द्रियेऽर्थे स्वतोऽप्रामाण्यात्, आगमिकोभयहेतुत्वे सुखादिदृष्टान्तेन सम्भावनामात्रहेतुत्वात् – एकतरहेतुत्वानभ्युपगमेन – वस्तुनोऽपरिच्छेदात् लक्ष्यस्य ब्रह्मत्वसिद्धेः, जगन्निमित्तोपादानं सच्चिदानन्दं ब्रह्म–इति लक्षयति वाक्यम् इति ॥

तन्न समीचीनं लक्ष्यते । यतोऽत्र श्रुत्यनुमानयोरेकत्र ब्रह्मणि प्रवृत्तिरेव न विवक्षितेति भाष्यकारैः स्पष्टमुक्तमिति तेन विरोधः स्यात्, अनुमानस्याप्यत्र लब्धप्रसरत्वं कल्पयताम् । यत्र चानुमानस्यावकाशः, तत्रागमविषयत्वमेव नास्तीति किमर्थं श्रुत्यनुमानयोर्विरोधे श्रुतेरपौरुषेयत्वेन प्राबल्यमिति साधयितुमायास आश्रीयत इति न विद्मः । अपि चात्र कीदृशं ब्रह्म जिज्ञास्यम् ? – इत्याकाङ्क्षायाः श्रुतिसिद्धस्वरूपम् – इत्युत्तरेणैव शक्यपरिहारत्वे को वावसरो लक्ष्यस्य ब्रह्मत्वसाधकानुमानस्येत्येतदपि न ज्ञायते । न च जगज्जन्मादिकारणस्य सम्भावनामात्रहेतुत्वं तर्कस्येति वाच्यम् । श्रुत्युपन्यस्तस्य जगज्जन्मादिकारणत्वस्य

सम्भावनार्थत्वे गमकाभावात् । न च लक्ष्यब्रह्मस्वरूपसिद्ध्यर्थमपेक्षितमिदमिति वाच्यम्; 'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुत्यैव स्वरूपस्याप्यावेदनात् । तस्मात्, अस्थाने अनुमानं प्रवेश्य तद्गतशङ्कापरिहाराश्रयणमिदम् इत्यस्मन्मतिः ॥

अपरे तु – यद् यावदनुभूयते तत् सर्वं परिमितम् अविशुद्धम् अबुद्धम्, विध्वंसि; न तेनोपलब्धेन तद्विरुद्धस्य नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुम्, न हि जातु कश्चित् कृतकत्वेन नित्यं लक्षयति । न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते । तस्यानुपलब्धचरत्वात् । प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम् । एवं च न शङ्करोऽप्यत्र प्रक्रमते, अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्य अवाक्यार्थत्वात् । तस्मात्, लक्षणाभावात् न ब्रह्म जिज्ञासितव्यम् – इत्याक्षेपाभिप्रायं वर्णयित्वा सिद्धान्तमुपन्यस्यन्ति – मा भूदनुभूयमानं जगत् तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणम् । तदुत्पत्त्या तु भविष्यति, देशान्तरप्राप्तिरिव सवितुर्व्रज्यायाः – इति ॥

एतदपि न भाष्यकारहृदयमिति प्रतिभाति नः । किं कारणम्? सूत्रं तावत् वेदान्तवाक्यकुसुमग्रथनाय प्रवृत्तम् इत्याह भाष्यकृत् । वाक्यं च तेन लिलक्षयिषितमुदाहरति 'यतो वा इमानि भूतानि' इत्यादि । तत्र तु वाक्ये वरुणस्तावन्न प्राह जगदुत्पत्त्या लक्षितं ब्रह्म विजानीहि इति । न च भृगुरवगच्छति स ब्रह्म जगदुत्पत्तिलिङ्गेन, सवितुर्देशान्तरप्राप्त्या इव तद्व्रज्याम् । पिता हि अन्नं प्राणं चक्षुः – इत्यादीनि ब्रह्मोपलब्धौ द्वाराण्युक्त्वैव ब्रह्मणो लक्षणं प्रोवाच । भृगुश्च

जगज्जन्मादिकारणत्वरूपं लक्षणं कुत्र दृश्यत इत्यन्नादिद्वाराण्याश्रित्य मनःसमाधानपूर्वकमन्विष्यन् अन्नप्राणमनोविज्ञानेषु लक्षणं साकल्येनापश्यन् सर्वान्तरमानन्दं ब्रह्म विज्ञातवान् इति स्थितिः । तत्र कुत एव प्रसङ्गो ब्रह्मणः सकाशादुत्पत्त्या तल्लक्षणं भविष्यति जगत् सवितृव्रज्यादिदृष्टान्तबलेनेत्यनुमानस्य ? न ह्यत्रानुमानविधया लक्षणेन लक्ष्यमनुमित्सितमिति । तस्मान्नायं सिद्धान्तपन्थाः इति ॥

४५. **अथ भाष्यकारसम्मतः सिद्धान्तः** – यत् तावदुच्यते पूर्वपक्षिणा एकस्मिन्नेव कारणे अभिन्ननिमित्तोपादानत्वस्य अदृष्टत्वात्, असंभावितमिदं लक्षणमिति । नायं दोषः । श्रुत्येकसमधिगम्यस्यास्य जगत्कारणत्वस्य युक्त्या प्रत्याख्यानासम्भवात् । श्रुत्यैव च 'यथोर्णनाभिः सृजते गृह्णते च' (मुं. १–१–७) इति चेतनस्यैकस्य लूताकीटस्य तन्तून् प्रत्यभिन्ननिमित्तोपादानत्वनिदर्शनपूर्वकं स्वोक्तलक्षणस्य सम्भावितत्वात् । नन्वेवमपि न ब्रह्मणः स्वरूपविशेषं समर्पयितुं समर्थमिदं लक्षणवाक्यम् । जगज्जन्मादेर्जगन्मात्राश्रितत्वात्, 'ब्रह्मणः स्वरूपमीदृशम्' इति विशिष्यज्ञापनाच्च वाक्येन--इत्युक्तम् । सत्यमुक्तम् । न तु साधूक्तं तत् । श्रुत्यैव 'अन्नं प्राणम्' इत्यादिना ब्रह्मोपलब्धिद्वारविमर्शपूर्वकं स्वरूपविशेषस्यापि प्रदर्शितत्वात्, एवं हि विज्ञायते – भृगुः समाहितमनाः पित्रुपदिष्टानि द्वाराणि विमृशन्, अन्नप्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यन् शनैःशनैरन्तरनुप्रविश्य 'आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति'

(तै. ३. ६) इति यथोक्तलक्षणस्य लक्ष्ये ब्रह्मणि समन्वयपूर्वकं निर्णिनाय इति ॥

यत्तूच्यते जगज्जन्मादेर्जगन्मात्रनिष्ठत्वमिति तत्तथैवास्तु, न नः किञ्चिच्छिद्यते । न हि वयं जगज्जन्माद्येव ब्रह्मलक्षणमिति ब्रूमः, किं तर्हि जगज्जन्मादिकारणत्वमिति । न च जगत्कारणत्वम्, आनन्दस्वरूपत्वं चेति लक्षणद्वयमत्रेष्टम् । जगत्कारणत्वमित्थञ्जातीयकमत्राभीष्टमिति सामान्येन निर्दिश्य हि तस्य आनन्दस्वरूपे ब्रह्मणि समन्वयोऽत्र निर्धारितः । न चेदं लक्षणं तार्किकसम्मतमेवोरीकृतम्, येन लक्ष्यलक्षणभेदोऽपि शङ्क्येत । जगज्जन्मादिविकल्पास्पदत्वमात्रं हि तज्जन्मादिकारणवाचोयुक्त्या विवक्ष्यत इति । तस्मात्, यथावर्णित एवात्र सिद्धान्त इत्यलमतिविस्तरेण ॥

## २. जगत्कारणसतत्त्वविमर्शः

**४६. एकीयमतेन सूत्रस्थलक्षणवाक्यविभागः, तद्विमर्शश्च—**

अथेदं विचार्यते शास्त्रार्थविवेकप्रतिपत्तये—कथम्भूतं ब्रह्मणो लक्षणं समर्पितमस्मिन् सूत्रे ? इति । तत्रैके ब्रुवते 'जन्माद्यस्य' इतीदमुपलक्षणम् । जन्मादि हि प्रपञ्चधर्मत्वात्, पृथग्भूतमेव तत् कारणमुपलक्षयति न विशेषणत्वेन । अस्य चोपलक्षणत्वादेव ब्रह्मसंस्पर्शाभावात् 'यतः' इत्यनेन 'सर्वज्ञं सर्वशक्तिसमन्वितं परमानन्दं ब्रह्म' इति

ब्रह्मस्वरूपं पृथग् लक्षितमिति । एतद्विवरणकृतश्चाहुः उपलक्षणत्वेऽपि नाद्वितीयस्वरूपलक्षणविरोधः । 'यद् रजतमित्यभात् सा शुक्तिः' इतिवन्मिथ्याभूतेनापि – प्रपञ्चकारणत्वेनोपलक्षणयोगात् । असाधारणसंबन्धो हि लक्षणनिमित्तम्, न लक्षणसत्यत्वम् । काकादीनाम् असंबद्धानां गृहोपलक्षणत्वदर्शनात् – इति ॥

वयं तु पश्यामः सूत्रेण श्रुत्यनुगमेनैव ब्रह्ममीमांसारम्भप्रत्यभिज्ञानात्, 'शास्त्रयोनित्वात्', 'तत्तु समन्वयात्' इति च श्रुतिवाक्यानामेव ब्रह्मणि प्रमाणत्वेन साधयिष्यमाणत्वात्, नायं लक्षणविभागः साधुरिति । न हि सूत्रकृत् स्वयं श्रुतिनिरपेक्षो ब्रह्म लक्षयितुं प्रावर्तिष्टात्र । न च शक्यते केनचित् श्रुत्यालम्बनमन्तरेण जगतो जन्मादि तत्कारणत्वं वा ब्रह्मणः प्रत्यक्षादिभिः प्रमाणैरवधारयितुं येन जगज्जन्मादेरुपलक्षणत्वं स्वीक्रियेतापि काकादेरिव । अत एव हि यास्कपरिपठितानामपि भावविकाराणां सूत्रागृहीतत्वमाचचक्षे भाष्यकारः, तेषां स्थितिकाले एव सम्भाव्यमानत्वात्, प्रमाणान्तरगोचरत्वमेवेत्यतो मूलकारणाद् ब्रह्मणो यादृशं जगज्जन्मादि श्रुतिनिर्दिष्टं नैव तादृशं यास्कोक्तजन्मादि – इति मन्यमानः । ननु च पृथिव्यप्तेजआदीनामपि जन्मविनाशौ प्रमाणान्तरेणैव दिदर्शयिषन्ति केचित् । कथम् ? तेजसस्तावत्, अरणिनिर्मथनादिषु दृश्यते जन्म, इन्धनक्षये विनाशः । अपामपि चन्द्रकान्तादिषु जन्म, क्रमेण च शोषः । पृथिव्या अपि, अवयवसंयोगविभागदर्शनात् तन्निमित्तौ जन्मविनाशौ अनुमीयेते ; दृश्येते च अद्याप्यवयवसंयोग विभागकृतौ पृथिव्येकदेशस्य जन्मविनाशौ । वाय्वाकाशकालदिशामपि

'यावद् विकारं तु विभागो लोकवत्' (वे. सू. २–३–७) इति वक्ष्यमाणेन न्यायेन स्त एव जन्मविनाशौ–इति। उपबृंहयन्ति चैतदपरे युक्त्युदाहरणेन – 'पृथिव्यप्तेजोवायवो विवादपदानि जन्मविनाशवन्तः, पृथिव्यप्तेजोवायुबुद्धिगोचरत्वात्, एकदेशपृथिव्यप्तेजोवायुवत्–इति। न। उक्तदोषतादवस्थ्यात्। तथा हि – किमिदं युक्तिमात्रं जगतो जन्मादिसंभावनाय प्रदर्शितम्, आहोस्वित् अनुमानमेव तन्निश्चायनाय? इति प्रष्टव्यास्ते। तत्र उभयथापि जगज्जन्मादिकारणत्वं ब्रह्मणि प्रमाणैरुपपादयितुम् अशक्यमेव। यतो ब्रह्म प्रत्यक्षाद्यगोचरम्, प्रत्यक्षादिप्रमाणानि च प्रमातृप्रमाणप्रमेयलक्षणजगदन्तःपातीन्येवेति न स्वोत्पत्त्यादिविषयीकरणे समर्थानि – इत्युक्तो दोषस्तदवस्थः। अतो न जगज्जन्मादिसिद्धिः श्रुतिमन्तरेण। अतः श्रुत्यनुगमेनैव लक्षणसूत्रं प्रवृत्तमित्यकामैरप्युपादेयम्। ततश्चोपलक्षणत्वादिविभागानुपपत्तिरिति॥

**४७. मतान्तरेण लक्षणसूत्रव्याख्यानम्, तद्विमर्शश्च–** एतेन 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इति नैयायिकमतेन ब्रह्मलक्षणमाक्षिप्य समाहितमस्मिन् सूत्रे, प्रमाणाक्षेपपरिहारस्तूत्तरसूत्रे – इत्यपि निरस्तं वेदितव्यम्। सर्वोऽपि हि लौकिको वैदिकश्च व्यवहारोऽविद्यापुरस्सर एवेत्युपपादितम् अध्यासभाष्ये। तथा च लक्षणप्रमाणव्यवहारोऽप्यविद्यापुरःसर एवेत्यायाति। तथा चाविद्यामाश्रित्य प्रवृत्तेन लक्षणेन वा प्रमाणेन वा न पारमार्थिकब्रह्मवस्तुसिद्धिराकाङ्क्षणीया भवति, ब्रह्मवस्तुसिद्ध्याश्रयैव हि लक्षणस्य प्रमाणस्य वा जीवितसिद्धिरिति। न च सर्वस्याप्यात्मभूतं सर्वस्मादपि व्यवहारात् प्रागेव स्वयंसिद्धं

सत् स्वसिद्धौ किमपि लक्षणादि समपेक्षते लौकिकप्रमेयपदार्थवत् इति युक्तम् । न च निर्धर्मकेऽद्वितीये ब्रह्मवस्तुनि धर्माः केचन समवयन्ति, येन तत् असाधारणधर्मैरितरव्यावर्तकैर्लक्षितं भवेत् । तस्मात्, व्यर्थ-प्रयासमिदं तार्किकक्षुण्णलक्षणप्रमाणपदार्थपरीक्षाप्रक्रियामार्गानुसरणम् इति वयमुत्पश्यामः ॥

४८. **श्रुत्यनुगमेन सूत्रार्थप्रदर्शनम्** – कथं तर्हि जगज्जन्मादिकारणत्वं लक्षणमिति श्रुत्यनुगमेनापि सङ्गच्छते ? न हि श्रुत्यापि 'यतो वा इमानि भूतानि जायन्ते' इत्यादिना प्रसिद्धवदुपादातुं शक्यं जगज्जन्मादि–इति चेत् । अत्रोच्यते – स्थावरजङ्गमलक्षणानि तावद् भूतानि अन्नादेव जायन्ते, जातान्यन्नेनैव वर्धन्ते, अन्नमेव च जीवनान्ते प्रयन्त्यभिसंविशन्ति च – इति प्रसिद्धमेतत् । एवं प्राण-मनोविज्ञानानि च, उत्तरोत्तरं पूर्वपूर्वव्यापकानि सूक्ष्मतराणि प्रत्यगात्म-भूतानि च – इत्यात्मत्वाभिमानार्हाणि इति श्रुत्युक्तदिशा समालोचयतः स्वसंविद्विषयाणि भवन्ति । विज्ञानस्यापि तु व्यापकं ततोऽपि सूक्ष्मतरं तत्साक्षिभूतं सर्वान्तरतमं सुखदुःखोपघातशङ्कानास्पदं नित्यतृप्तम् आनन्दशब्दगम्यम् आत्मतत्त्वं केनाप्यपरिच्छिन्नत्वात् अद्वितीयं ब्रह्म – इति भृगुवत् तपसा समाहितमनसोऽन्यस्यापि अनुभवमारोक्ष्यति । तदेवम् अन्नादिलक्षणब्रह्मोपलब्धिद्वारविमर्शनेन, पूर्वपूर्वम् उत्तरस्मि-न्नुत्तरस्मिन् विद्यया प्रविलाप्य अन्ते आनन्दात्मानं विज्ञातवतः आनन्दात्मनः सकाशादेव सर्वभूतानां जन्म, रज्ज्वादिसकाशादिव सर्पादीनाम्, तेनैव च तेषां स्थितिः, तस्मिन्नेव च तेषां विलयः–इति

तदात्मत्वानुभवः सञ्जायेत । तदास्पदत्वादेव भूतशब्दितानां सर्वेषां विकल्पानाम् । अपि च जाग्रदवस्थायां व्याकृतस्य प्रपञ्चस्य आत्मन्येवावस्थितस्य सुषुप्तावस्थायाम् अव्याकृतात्मना आत्मन्येव संवेशनम् सर्वानुभवसिद्धम्, सुषुप्तादुत्थाने पुनरपि तस्मादेव जन्मापीत्यतः जगज्जन्मस्थितिप्रलया आत्मत एवेति श्रुत्युक्तम् अपलपितुमशक्यम् । एवमेव हि 'अनुभवानुसारी श्रुत्यनुगृहीतस्तर्कः' इति यदवोचाम, तदपि सङ्गच्छते । तदेवं श्रुत्युक्तं जगज्जन्मस्थितिभङ्गं सर्वस्य जगतो ब्रह्मात्मतां गमयतीत्यतः श्रुत्यनुसारेणैव ब्रह्मस्वरूपसमर्पकं लक्षणमुपस्थापयति सूत्रकृदिति सर्वमनवद्यम् ॥

**४९. निर्विशेषस्य ब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणमिति कथम् ?** – अथ कथं निर्विशेषस्य लक्षणमिदं स्यादिति विचारणीयम् । न हि निर्धर्मकस्य ब्रह्मणः कारणत्वं नाम धर्मो भवितुमर्हतीति । अत्रापि व्याख्यानप्रस्थानीया वदन्ति – देवदत्तगृहस्य काकाधिकरणत्वं नाम धर्मस्तावत् न लक्ष्यभूते गृहेऽन्तर्भवति । तथा हि सति काकविगमे गृहैकदेशभङ्गबुद्धिः स्यात् । अतः परिशेषात् लक्षणान्तर्गतं काकाधिकरणत्वमिति वक्तव्यम् । तथैवेहापि कारणत्वं लक्षणान्तर्गतम्, न लक्ष्यब्रह्मान्तर्गतम् । न हि नानाविधकार्यक्रियावेशात्मकत्वं तत्प्रसवशक्त्यात्मकत्वं वा जिज्ञास्यविशुद्धब्रह्मान्तर्गतं भवितुमर्हतीति ॥

नेयं साध्वी कल्पना इत्यस्मन्मतिः । कुतः ? जगज्जन्मादिकारणत्वस्य उपलक्षणत्वायोगादेव । न हि जगज्जन्मादिकारणत्वं ब्रह्मण्युपलक्ष्य प्रणीतमिदं सूत्रम्, किं तु श्रुत्यनुगमात् इत्यवोचाम, श्रुतिश्च

जगतो ब्रह्मात्मतां ज्ञापयितुं प्रवृत्ता–इति च । तथा हि श्रुत्यन्तरं 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छां. ३–१४–१) इति ब्रह्मजत्वादिहेतोर्जगद् ब्रह्मैवेति निश्चाययति । ननु नानाविधकार्य-क्रियावेशात्मकत्वं तत्प्रसवशक्त्यात्मकत्वं वा जिज्ञास्यविशुद्धब्रह्मान्तर्गतं भवितुं नार्हतीत्युक्तम् । बाढम्, अत एव प्रकृतसूत्रोक्तं कारणत्वमपि पूर्वसूत्रोक्तजिज्ञास्यत्ववत् अध्यारोपापवादन्यायेनैवोपस्थापितमित्यवसीयते। न हि विशुद्धे निर्विशेषे ब्रह्मणि जिज्ञासुजिज्ञासाजिज्ञास्यत्वविभागोऽस्ति परमार्थतः । 'यत्तदद्रेश्यमग्राह्यम्' (मुं. १–१–६) इत्यादिश्रुतेः । एवम् इहापि कार्यकारणविभागमविद्याविद्यमानम् उररीकृत्यैव ब्रह्मणि कारणत्वमध्यारोप्यते कारणस्वरूपनिर्धारणानन्तरं कारणत्वमप्यपोद्यते । कार्यस्य कारणानन्यत्वं हि वक्ष्यति 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (२–१–१४) इति । अतो न कश्चिद् विरोधः ॥

५०. **मायासतत्त्वे एकीयमतम्** – अत एवेदं मायिकं ब्रह्मणो जगज्जन्मादिकारणत्वम् (खं. १६) इत्यवोचाम । अथ केयं माया या सर्वमिदमुपपादयतीति ? अत्र चोद्यमुद्भाव्य समादधुः केचित् । कथम् ? ननु भूतभौतिकमूलकारणं न ब्रह्मेति प्रतिपत्तुं युक्तम् । मायाया अपि मूलकारणत्वात् । 'मायां तु प्रकृतिम्' (श्वे. ४–१०) इति श्रुतेः । 'प्रक्रियते अनया' इति प्रकृतिः – इति करणमात्रं माया इति चेत् । न । प्रकृतिशब्दस्य उपादाने रूढत्वाद् व्युत्पादनायोगाद् । 'आत्मन आकाशः' (तै. २–१) इति प्रकृत्यन्तरश्रवणाद् व्युत्पाद्यते इति चेत् । न । तुल्यश्रुतित्वात् मायाप्रकृतित्वविरोधात्, निमित्तेऽपि

पञ्चमीप्रयोगात्। दृश्यमानजाड्यानुसारेण च मायोपादानत्वनियमोपपत्तेः। 'इन्द्रो मायाभिः' (बृ. २-५-१९) इति तृतीयैव श्रूयते इति चेत्। सत्यम्, आत्मनो बहुत्वापत्तौ करणता भवति, प्रपञ्चोपादानत्वे का हानिः? निरपेक्षप्रकृतिद्वयानुपपत्तिः—इति चेत्। तर्हि परस्पर-विशिष्टतया द्विसूत्ररज्जुवत् प्रकृतिता स्यात्। अतो जगत्कारणे ब्रह्मणि मायाया अपि ब्रह्मत्वं लक्षितं स्यात्। 'माया' इति प्रज्ञा अभिधीयते, सा च ब्रह्मचैतन्यमेवेत्यविरोधः – इति चेत्। न। अन्वयव्यतिरेक-विरोधात्। परिदृश्यमानहस्त्यश्वरथादौ प्रतिपन्नोपाधौ बाधिते च वृद्धव्यवहारे अन्वयव्यतिरेकाभ्यां मायाशब्दः प्रयुज्यमानो दृश्यते। लोकसंवेदनविरोधाच्च। न हि प्रज्ञातिशयवन्तं मायाविनं वदन्ति, गर्हन्ति च विदुषि मायाशब्दप्रयोगम्। बुद्धिविषयत्वान्मायाशब्दस्य न ब्रह्मचैतन्यप्रज्ञायां प्रसङ्गः। स्वप्नादिविविधमायाकारप्रतिभासनाद् वा बुद्धेः कार्यवाचिनो मायाशब्दस्य उपचारात् कारणे प्रयोग इत्यनवद्यम्। अपि च 'भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे. १-१०), 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (गी. ७-१४), 'मायया अपहृतज्ञाना आसुरं भावमाश्रिताः' (गी. ७-१५) इति निवर्त्यत्व-कर्तव्यत्वगुणमयत्वज्ञानावरणत्वलिङ्गाच्च न ब्रह्मचैतन्यं माया। बुद्धिरेव माया—इति चेत्। न। दृश्यमानगन्धर्वनगरादौ मायाशब्दप्रयोगात्, मन्त्रौषधादौ तदप्रयोगात्। तथापि जडात्मिका मायाशक्तिः पारमार्थिकी – इति चेत्। न। 'नासदासीन्नो सदासीत्' (ऋ. १०-११-१२९-१) इति जगत्प्रागवस्थाया सदसद्विलक्षणानिर्वचनीयत्वश्रवणात्। लोकेषु च

हस्त्यश्वरथादिषु व्यभिचारिषु मिथ्यावस्तुमात्रे अनुयायिनि मायाशब्द-प्रयोगात् । 'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥' (वि. पु. ५–१७–१४) इति मायाविद्ययोः सामानाधिकरण्याच्च । तस्मात् अनिर्वचनीयमायाविषयत्वं प्राप्तम् – इति चोद्यानुवादः ॥

अथ तत्र समाधानम् । "त्रैविध्यमत्र संभवति – रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणमिति वा, 'देवात्मशक्तिं स्वगुणैर्निगूढाम् '(श्वे. १–३) इति श्रुतेर्मायाशक्तिमत् कारणम् इति वा, जगदुपादानमायाश्रयतया ब्रह्म कारणम् इति वा । तत्र विशिष्टपक्षे, तथैव ब्रह्मत्वेन उपलक्षितस्य ज्ञानानन्दादिस्वरूपलक्षणेन मायानिष्कर्षात् लक्षणद्वयेन विशुद्धब्रह्मसिद्धिः । उत्तरपक्षयोस्तु मायाया ब्रह्मपरतन्त्रत्वात् तत्कार्यमपि ब्रह्मपरतन्त्रं भवति । यथा अंशुतन्त्रतन्त्वारब्धोऽपि पटोंऽशुतन्त्रः प्रतीयते । ततश्च उत्पद्यमानकार्यस्य यदाश्रयोपाधि ज्ञानानन्दलक्षणं च तद् ब्रह्म–इति शुद्धब्रह्मलाभः " इति ॥

तत्रैव वादिविप्रतिपत्तीः स्वमतं च दर्शयन्ति त एव । "तत्र (१) बिम्बस्थानीयं ब्रह्म मायाशक्तिमत् कारणम् जीवाश्च प्रत्येकम् अविद्यानुबद्धा इति केचित् । (२) मायाविद्याप्रतिबिम्बितं ब्रह्म जगत्कारणम्, विशुद्धं ब्रह्म अमृतत्वालम्बनम्, जीवाश्च अविद्याबद्धाः – इत्यन्ये । (३) जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण ब्रह्म आविर्भावयन्ति । सादृश्याच्च प्रपञ्चैकतावभासः नैकैरवगतद्वितीयचन्द्र-वत् । स्वरूपापेक्षया च ब्रह्म सर्वजगत्कारणम् – इत्यपरे ।

(४) ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्तते स्वप्नादिवत् – इति मतान्तरम् । तस्मात्, ब्रह्मैव स्वमायया अविद्यया विवर्तते इति ॥

५१. **एकीयस्य मायावादस्य निराकरणम्** – तदेतदेकीयं मतं सुगमा(खं.५)प्रदर्शितमूलाविद्यानिरासयुक्तिभिरेव निरस्तं वेदितव्यम् । जगदुपादानत्वेन स्वीकृता मायैव हि मूलाविद्येति व्यपदिश्यते एतैर्वादिभिः, सैवोपादानं भाष्योपात्ताध्यासलक्षणाविद्यायाः इति च । तत्र तावत् रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणम् इति, मायाशक्तिमद् ब्रह्म कारणमिति, मायाश्रयतया ब्रह्म कारणम् इति वा विकल्पने हेतुं न पश्यामः । न हि दृष्टान्तोपात्तसूत्रद्वयवद् ब्रह्ममाययोः समानसत्ताकत्वम् उत्प्रेक्षितुमपि शक्यते, येन कारणद्वयवत्त्वं जगतः कल्प्येतापि । “ ‘शक्तिः’–इति च आत्मपरतन्त्रतया आत्मनः सर्वकार्योपादानत्वस्य निर्वोढृत्वमाह ” इति खलु तेषां व्याख्यानम् । तत्र शक्तिशक्तिमतोरग्न्यौष्ण्ययोरिवैकत्वे ब्रह्मण एव कारणत्वम् इत्युक्तं भवति ; तदा 'मायाश्रयम्' इति रिक्तं वचः । ननु च 'अविद्या', 'माया', 'मिथ्याज्ञानम्' इति च पर्यायाः अनादिमिथ्याज्ञानसंबन्धोऽप्यात्मनि अज्ञानवत् काल्पनिकत्वात् आकाशकार्ष्ण्यवत् आत्मनः कूटस्थतां न विहन्ति – इत्यसन्मतम् ; अतो नैष दोष इति चेत्, एवं तर्हि मिथ्याज्ञानशब्दितमायोपादानकोऽध्यासः ' इति वाचोयुक्त्या किं विवक्ष्यत इति वक्तव्यम् । न हि मिथ्याज्ञानशब्दिता माया कल्पिता, आत्मन्यध्यस्ता ; तादृशी च सा अध्यासोपादानम् – इत्यर्थवत् स्याद् वचः । निमित्तोपादानादिव्यवहारः सर्वोऽप्याध्यासिक

इति प्रतिज्ञाय, पुनरप्यध्यासस्योपादानं माया – इति वचनं हि व्याहतम् । न ह्यध्यासे 'कार्यम्', 'कारणम्' इति वा विकल्पनं युक्तिमत् इति । एवं मायाविद्यादिशब्दशब्दितप्रकृतौ प्रतिबिम्बितं ब्रह्म जगत्कारणम्–इति वाक्यं जरद्गवादिवाक्यसदृशमेव स्यात् । न हि 'अध्यस्तरजते प्रतिबिम्बिता शुक्तिः' इत्यर्थवत् स्याद् वाक्यमिति । तथा 'जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण ब्रह्माविर्भावयन्ति' इत्यप्यसमञ्जसम् । जीवत्वमेव हि तावद् ब्रह्मण्यध्यस्तम् । तत्र जीवाः प्रपञ्चाकारेण ब्रह्माविर्भावयन्ति इति तादृशमेवोक्तं भवेत् यादृशमुक्तं भवति स्थाणावध्यस्तः पुरुषः स्थाणुमन्यथाभावयतीति । तथा 'ब्रह्मैव स्वमायया अविद्यया जगदाकारेण विवर्तते' इत्यपि न क्षोदक्षमम् । 'ब्रह्मण्यध्यस्तया प्रकृत्यपराभिधानया अविद्यया अन्यथा विभाव्यते ब्रह्म' इति विवक्षितमिति चेत् । न तर्हि प्रकृत्युपादानकोऽध्यासः । अध्यासो हि नाम अतस्मिंस्तद्बुद्धिः । अप्रकृतिलक्षणे हि ब्रह्मणि प्रकृतिरध्यस्यते, कल्प्यते, इति ब्रवीषि ; तत्र तथा कल्पिता प्रकृतिः स्वकल्पकबुद्धेरुपादानमिति किमुक्तं स्यात् ? न हि शुक्तिरजतं रजतबुद्धेरुपादानमिष्यते विवेकिभिरिति ॥

अपि च ब्रह्मज्ञानेन मिथ्याज्ञानलक्षणाविद्यापबाधनं परमपुरुषार्थहेतुत्वेन प्रदर्शयितुं प्रवृत्तः सूत्रकारः प्रत्यज्ञास्त 'अथातो ब्रह्मजिज्ञासा' इतीत्युभयसंमतमेतत् । स चैवं प्रतिजानानो 'जन्माद्यस्य यतः' इति वास्तविकं कार्यकारणभावम् अङ्गीकृत्य ब्रह्मलक्षणसूत्रणे समुद्यत इत्येतद् भवतामपि न सम्मतम् । 'किं तर्हि सृष्टेः प्रयोजनम् ?'

इति प्रश्नमुत्थाप्य 'प्रत्यक्षादिसिद्धप्रपञ्चस्य ब्रह्मण्येवोत्पत्तिविनाशवत्तया अन्यत्राभावमुपवर्ण्य तत्रापि प्रतिषिध्य मिथ्यात्वापादनेन प्रमाणान्तराविरुद्धतया अद्वितीयब्रह्मसिद्धिः प्रयोजनम्' इति प्रश्नापाकरणात् । ननु सृष्टिरपि स्वरूपेण न बाध्यते, किं तु परमार्थसत्यत्वांशेन इत्यस्माकं मतम् । स्यादेतद् भवतां मतम्; न तु श्रुतेः सूत्रकारस्य वा सम्मतं तत् । कथमेतत् ? श्रुतौ तावत् 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयम्' (छां. ६–४–१) इति सृष्टस्याप्यग्न्यादेर्वाचारम्भणत्वोपदेशेनासत्त्वप्रतिज्ञानात् । 'ब्रह्मैवेदं विश्वम्' (मुं. २–२–११) इति च परिदृश्यमानस्य प्रपञ्चस्य कृत्स्नस्यापि ब्रह्ममात्रत्वेनावधारणाच्च न सृष्टिश्रुतिः प्रपञ्चस्य मिथ्यात्वावधारणमात्रप्रयोजना इत्यवगम्यते । सूत्रे च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे. सू. २–१–१४) इति ब्रह्मानन्यत्वमेव प्रपञ्चस्य सूत्रकाराभिमतम् इत्यवसीयते । न तु मिथ्यासृष्टिपरत्वमपि श्रुतीनामिति ॥

अपि च भाष्यकाराभिप्रायविरुद्धं चेदं मतम् । 'सर्वज्ञस्येश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चस्य बीजभूते सर्वज्ञस्येश्वरस्य **माया, शक्तिः, प्रकृतिः,** – इति च श्रुतिस्मृत्योरभिलप्येते' (सू. भा. २–१–१४, पा. २०१), 'न चेयं परमार्थविषया सृष्टिश्रुतिः, अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्' (सू. भा. २–१–३३, पा. २१७) इत्यादिस्थलेषु मायायाः, अव्याकृतनामरूपप्रकृत्यादिशब्दवाच्यायाः, अविद्याकल्पितत्वम् उद्घोषयति भगवान् । तेन च विरुध्यते मायाविद्ययोरेकत्वोक्तिः ॥

ननु 'विश्वमायानिवृत्तिः', 'तरत्यविद्यां विततां .... योगी मायाम्' (वि. पु.) इति श्रुतिस्मृत्योः सम्यग्ज्ञाननिवर्त्याविद्यायां मायाशब्दप्रयोगात्, मायाविद्ययोः सामानाधिकरण्याच्च तयोरेकत्वमवगम्यते। न। उक्तभाष्यानुरोधेन विद्यया अविद्यानिवृत्तौ अविद्याकल्पितमायाया अपि निवृत्तेरुपपन्नत्वात्। अध्यासरूपाविद्याया अपि नामरूपपक्षत्वात् 'अविद्यां मायाम्' इति प्रयोगोपपत्तेर्यथोक्तोदाहरणयोर्भेदपक्षेऽपि सुव्याख्यानत्वात्। ननु च 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' (वे.सू. ३–२–३) इति **सूत्रकारेण** स्वप्ने मायाशब्दः प्रयुक्तः, **भाष्यकारेण** च 'अविद्या माया', 'अविद्यात्मिका मायाशक्तिः' – इति तत्र तत्र निर्देशः कृतः। **टीकाकारेण** च 'अविद्या', 'माया', 'अक्षरम्'–इत्युक्तम्। **ब्रह्मसिद्धिकारेण** च एवमेव इयम् 'अविद्या', 'माया', 'मिथ्याप्रत्ययः' – इत्युक्तम्। तस्माद् एकमेव वस्तु 'माया' 'अविद्या'–इति च विक्षेपशक्तिप्राधान्येन, आच्छादनप्राधान्येन च, तद्वैपरीत्येन वा व्यवह्रियते – इत्यङ्गीकार्यम् इति युक्तमुत्पश्याम इति चेत्। अत्र ब्रूमः – न तावत् शास्त्रकारव्यवहारमात्रं वस्तुस्थितिम् अन्यथयितुं प्रभवेत्। न च प्रकृतविषये तादृशव्यवहारोऽस्ति। तथा हि **सूत्रकारस्तावत्** स्वप्ने सृष्टिर्मायामात्रम्, तत्र दृश्यमानानां रथाद्याभासानां परमार्थवस्तुधर्मेणानभिव्यक्तस्वरूपत्वात् इत्याह, न पुनः पारिभाषिकमायाया अविद्यात्वम्। **भाष्यकारोऽपि** (सू.भा. १–३–१९) परमात्मा एक एव सन्नपि – लोके मायया मायाविवत् – अविद्यया अनेकधा विभाव्यत इत्याह, न त्वेवाविद्यायां मायाशब्दं

क्वचिदपि प्रयुङ्क्ते । 'अविद्यात्मिका मायाशक्तिः' इति तु नैवास्ति भाष्ये प्रयोगः ; 'अविद्यात्मिका बीजशक्तिः' (सू. भा. १–४–३) इति तु अविद्याकल्पिता, अव्यक्तापराभिधाना अव्याकृतनामरूपशक्तिः – इत्यभिप्रायकं भाष्यम् । अविद्याकृताविद्यात्मकेति वचनव्यक्त्योः अविद्याकल्पितेत्यस्य पर्यायतया तदनन्यत्वाधिकरणभाष्ये प्रयोगदर्शनात् । अत एव हि वाक्यशेषेऽत्र बीजशक्तिः 'परमेश्वराश्रया मायामयी महासुप्तिः' इति वर्णिता । अविद्याकृतो हि नामरूपोपाधिः परमेश्वराश्रयः–इति । स च मायामयः, न वस्तुसन् ; अविद्याकल्पितत्वादेवेत्यभिप्रायः । तदेवं नास्ति भाष्ये क्वचिदपि मायाविद्यैक्यवादः । टीकाकारोक्तिस्तु साध्यपक्षनिक्षिप्तविचारानुसारिणीत्यतो नोदाहरणम् । ब्रह्मसिद्धिकारः पुनः प्रक्रियान्तरप्रस्थापयितेत्यतो भाष्यकारीयैः सर्वेषु स्थलेषु नैकान्तेनानुसरणीयः । न च सोऽपि मायाविद्यैक्यवादी न हि प्रकृतिरेवाविद्येति तस्यापि मतिः । अग्रहणविपर्ययलक्षणाम् अविद्याद्वयं हि सदसद्विलक्षणत्वेनानिर्वचनीयमित्युपपादयितुमाह "एवमेवेयम् 'अविद्या', 'माया', 'मिथ्यावभासः', इत्युच्यते" इति "तस्मान्नाविद्या सती, नाप्यसती, अत एव चास्या निवृत्तिरदृढस्वभावायाः, मायामात्रत्वात्" (ब्र. सि. 9) इति च । न च मूलाविद्यावादी स इत्यकिञ्चित्करं तद्वाक्योदाहरणमिति ॥

यत्पुनर्वादिविप्रतिपत्तिप्रपञ्चनम् 'बिम्बस्थानीयं ब्रह्म मायाशक्तिमत् कारणम्, जीवाश्च प्रत्येकम् अविद्यानुबद्धाः' इत्यादि तत् सर्वथापि भाष्यानुसारिभिरुपेक्ष्यम् । 'वस्तुनि क्रियास्विव विकल्पानुपपत्तेः' इति

भाष्यादर्शितपरिभाषाया अप्रत्याख्येयत्वात् । यदपि मायाब्रह्मणोर्जगत्कारणत्वे त्रैविध्येन विकल्पनम् 'रज्ज्वाः संयुक्तस्य सूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणम्' इत्यादिप्रकारैः, तदपि प्रत्युक्तमेवास्माभिरित्यलमतिविस्तरेण ॥

**५२. सिद्धान्ते ब्रह्मण एव जगत्कारणत्वोपपत्तिः –** ननु, अध्यासलक्षणाविद्यावादिनोऽपि जगतो मायाकारणकत्वं दुरपह्नवम् । 'मायां तु प्रकृतिं विद्यात्' (श्वे. ४–१०), 'अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥' (गी. ८–१८), 'एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥' (गी. ७–६) इत्यादिश्रुतिस्मृतिभ्यः । आह च **गीताभाष्यकारः** 'प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणम्' (गी. भा. ७–६) इति । अतः कथमिदं व्याख्यानप्रस्थानप्रत्याख्यानं शोभत इति ?

न । उक्तोत्तरत्वात् । अविद्याकल्पितैव प्रकृतिः, अव्याकृतनामरूपलक्षणा मायाशब्दव्यपदेश्या ; ते च नामरूपे सर्वज्ञस्येश्वरस्य आत्मभूते इव कल्पिते तत्त्वान्यत्वाभ्याम् अनिर्वचनीये आश्रित्यैव ईश्वरस्य कारणत्वव्यवहारो मायिनः, न तु परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपस्य कारणत्वं कार्यत्वं वा – इत्युक्तोत्तरमिदं चोद्यम् । ब्रह्मात्मभावप्रतिपादनपरा हि सर्वा सृष्टिश्रुतिः, न परमार्थविषया । यथोक्तमभियुक्तैः 'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥' (गौ. का. ३–१५) इति । तस्मात्, मायिकरूपविशेषेणैव ब्रह्म जगज्जन्मादिकारणमिति

व्यपदिश्यते, न तु स्वेन पारमार्थिकेन रूपेण । 'अपूर्वमनपरम्' (बृ. वा. २-५-१९) इति श्रुतेः । तदाह भाष्यकारः 'अविद्या-कल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतम्, अपरिणतम् अवतिष्ठते ॥' (सू. भा. २-१-२७, पा. २१३) इति । वस्तुतः कार्यकारणभावरहितमेव ब्रह्म अध्यारोपदृष्ट्या कारणत्वेनानूद्य, उप-देशान्ते कारणत्वमपोद्य ब्रह्मतत्त्वं प्रतिबोधयितुं प्रवृत्ता वेदान्ताः — इत्येतद् वार्तिककारैरपि सुस्पष्टमुक्तम् 'अकारणं सदज्ञानात् कारणत्वं यथैत्यजम् । सर्वकारकतामेवं क्रियातत्फलतामपि ॥ साध्यसाधनतां तस्मादज्ञानैकव्यपाश्रयाम् । उच्चैरनूद्य तत्तत्त्वं वेदान्ताः प्रत्यपीपदन् ॥ अकारणमकार्यं च कार्यकारणतामगात् । मोहादेव ततः शास्त्रं तदुच्छित्तौ प्रवर्तते ॥' (बृ. वा. १-२, १२८, १२९, १३०) इति । न चैवं जिज्ञास्यत्वेन प्रतिज्ञातस्य शुद्धब्रह्मणो नेदं लक्षणं स्यादित्यनिष्टप्रसक्तिः । जिज्ञास्यत्वव्यवहारस्यापि अध्यारोपदृष्ट्यैवाङ्गीकारात् । परिशुद्धे हि ब्रह्मणि तत्त्वतो विज्ञाते न जिज्ञास्यत्वं न वा जगज्जन्मादिकारणत्वम् । सर्वव्यवहाराणामपि तदन्तत्वात् । तदेवं स्थिते ब्रह्मणो मायिकेन रूप-भेदेन कारणत्वे, मायायाश्च ब्रह्मत्वेन तदन्यत्वेन वा अनिर्वचनीयत्वे, यन्मायायाः कारणत्वमुक्तं क्वचित् श्रुतौ स्मृतौ वा, तदविद्याकल्पितरूप-भेदवतो ब्रह्मण एवोक्तं भवति । तदेवं श्रुतौ, सूत्रे, तद्भाष्ये च यज्जगज्जन्मादिकथनं तत् सृष्ट्यादिकालत्रयेऽपि जगतो ब्रह्मात्मत्वाव-

धारणार्थम् इति सिद्धम् । अतो मूलाविद्यासंज्ञितमायायाः स्वातन्त्र्येण जगत्कारणत्वमातस्थुषां व्याख्यानप्रस्थानस्य, ब्रह्मणो मायया जगज्जन्मादिकारणत्वं स्वीकुर्वतः श्रौतप्रस्थानात् सुमहद् वैषम्यम् इति स्थितम् । स्थिते चैवं सूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणम्, मायाशक्तिमद् ब्रह्म कारणम्, मायाश्रयं ब्रह्म कारणम् इति वा निर्बन्धो निरर्थकः । ब्रह्माधीनसत्ताका हि माया, न तया सद्वितीयं ब्रह्मेति । तस्मात् अध्यारोपितरूपभेदेन ब्रह्मैव जगज्जन्मादिकारणमिति यथा व्याख्यात एव सूत्रार्थो ज्ञेयः ॥

**५३. सिद्धान्ते व्यावहारिककार्यकारणभावोपगमः कथम् ?** – अत्राह – यद्येकान्तेनैव कार्यकारणभावो निषेद्धुमिष्टः श्रुतिसूत्रयोः, किमर्थं तत्प्रतिकूलतया सृष्टिः श्राव्यते ' आत्मन आकाशः सम्भूतः ' (तै. २–१), ' इदं सर्वमसृजत .... सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च ' (तै. २–६) इत्यादिना ? सूत्र्यते च ' आत्मकृतेः परिणामात् ' (वे.सू. १-४-२६), ' भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ' (वे. सू. २–१–१३) इत्यादिना ? न हि निर्विकारस्य चेतनाचेतनरूपजगदाकारेण परिणामो लोकदृष्ट्याप्यसम्भाव्यमानः श्रुत्या प्रमाणभूतया स्वेनैव समुपदिश्यते, पश्चाच्चापोद्यते स्वेनैव–इति युक्तं कल्पयितुम् । नापि भगवता सूत्रकारेण अविद्यमानो ब्रह्मपरिणामः स्वेनैव संसूत्र्य तदनु 'तदनन्यत्वम्' (वे. सू. २–१–१४) इति स्वेनैव प्रतिषिध्यत इति युक्तम् ।

'प्रक्षालनाद् हि पङ्कस्य दूरादस्पर्शनं वरम्' इति हि न्यायः। अतः कथञ्चित् सृष्टिपरत्वमपि श्रुतीनां सूत्राणां चोपपादनीयम्। तस्मात्, सृष्टिश्रुतिर्मायाविशिष्टाद् ब्रह्मणः सकाशान्मिथ्याजगत्सृष्टिमाचष्टे; 'आनन्दो ब्रह्मेति व्यजानात्' (तै. ३-६) इत्याद्या तु शुद्धानन्दलक्षणब्रह्मस्वरूपसमर्पिका-इति व्याख्यानमेव साधु लक्ष्यत इति चेत्।

अत्र ब्रूमः। नैवं शक्यं विज्ञातुम्। सृष्टिश्रुतीनामन्यपरत्वस्य प्रतिष्ठापितत्वात्। या पुनरुदाहृता परिणामश्रुतिः, यच्च ब्रह्मपरिणामप्रापकं सूत्रम्, तत्र व्यवहारदृष्ट्या प्राप्तस्यैव परिणामस्योपन्यासः प्रयोजनान्तरमुद्दिश्य-इति न दोषः। लोको हि उपलब्धेः समर्थक्रियाकारित्वाच्च बाह्यवस्तूनामस्तित्वेऽभिनिविशते। कार्यकारणभावोऽपि वस्तुसत्त्वेनेत्यभिमन्यते; तथा प्रमाणप्रमेयव्यवहारः, क्रियाकारकफलभेदव्यवहारः संसारानुभवश्च – इत्येतत् सर्वं परमार्थसत्यमेवेति दृढाग्रहं धत्ते। तदीदृगविद्यावस्थायां वर्तमानानां कर्मफलार्थिनां मुमुक्षूणां च कृते जन्मान्तरलोकान्तरसंबन्ध्यात्मास्तित्वम्, फलसाधनानि, दुरितक्षयार्थानि च कर्माणि, जन्मान्तरेष्टानिष्टप्राप्तिपरिहारोपायविशेषम्, ब्रह्मणो जगज्जन्मादिहेतुत्वम्, ब्रह्मण उपास्यत्वम्, जीवानां चोपासकत्वम्, अभ्युदयक्रममुक्त्यर्थान्युपासनानि च-इत्येतत् सर्वम् उपदिशति श्रुतिः। वेदान्तवृद्धाश्च तदनुसारेणैवोपदिशन्ति, अधिकारतारतम्यमपेक्ष्य विनेयानाम्। यथाहुः **संप्रदायविदः** –

उपलम्भात् समाचारादस्तिवस्तुत्ववादिनाम्।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा॥ गौ. का. ४-४२.

आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ गौ. का. ३–१६.

इति च । सर्वमिदमध्यारोपदृष्ट्यैव मन्दमध्यमाधिकार्यनुग्रहार्थम् । उत्तमाधिकारिणां तु, अजाद्वयात्मतत्त्वमेवोपदिश्यते श्रुतौ सद्योमुक्तिफलकज्ञानोदयार्थम् । सूत्रकारोऽपि एतामेव साम्प्रदायिकीं सरणिमनुरुन्द्धे । उक्तं हि भाष्यकृतापि –

(१) "अस्तिवस्तुस्वभाव इत्येवंवदनशीलानां दृढाग्रहवतां श्रद्धानानां मन्दविवेकिनां अर्थोपायत्वेन सा देशिता जातिः । तां गृह्णन्तु तावत् , वेदान्ताभ्यासिनां तु स्वयमेवाजाद्वयात्मविषयो विवेको भविष्यतीति ; न तु परमार्थबुद्ध्या । ते हि श्रोत्रियाः स्थूलबुद्धित्वात् , अजातेः अजातिवस्तुनः सदा त्रस्यन्ति आत्मनाशं मन्यमाना अविवेकिनः – इत्यर्थः " ॥ गौ. का. भा. ४–४२, पा. २४०.

(२) "उपासना उपदिष्टेयं तदर्थम् मन्दमध्यमदृष्ट्याश्रमाद्यर्थम्, कर्माणि च । न चात्मा एक एवाद्वितीय इति निश्चितोत्तमदृष्ट्यर्थम् ॥
गौ. का. भा. ३–१६, पा. २१५.

इति । अपवाददृष्ट्या तु द्वैतवस्तुसद्भावो नैवेष्यते वेदान्तिभिः । अजाद्वितीयकूटस्थचैतन्यमात्रं परमार्थतत्त्वम् इति स्वीकारात् –

(३) उपलम्भात् समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात् समाचारादस्ति वस्तु तथोच्यते ॥
जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् ॥
गौ. का. ४–४४, ४५.

इति । भाष्यकारश्च सूत्रकाराशयम् एवमेवाभिवर्णयति स्म –

(४) अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं 'स्याल्लोकवत्' इति परिहारोऽभिहितः । न त्वयं विभागः परमार्थतोऽस्ति; यस्मात् तयोः कार्यकारणयोरनन्यत्वम् अवगम्यते । कार्यम् आकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म ; तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेण अभावः कार्यस्यावगम्यते ॥ सू. भा. २-१-१४, पा. १९६.

(५) सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वम् इत्याह ; व्यवहाराभिप्रायेण तु 'स्याल्लोकवत्' इति महासमुद्रस्थानीयतां ब्रह्मणः कथयति । अप्रत्याख्यायैव च कार्यप्रपञ्चं परिणामप्रक्रियां च आश्रयते सगुणेषूपासनेषु उपयोक्ष्यत इति ॥ सू.भा. २-१-१४, पा. २०२.

इति । तदेवं मन्दमध्यमदृष्टीनामधिकारिणां कृते जात्याद्युपदेशकश्रुतीनाम् अध्यारोपापवादप्रक्रियामवलम्ब्यैव प्रवृत्तिः, न तु तात्पर्येणेति सर्वमनाकुलम् ॥

## ५४. सर्वज्ञानन्दादिशब्दभाक्त्वमपि ब्रह्मणो न स्वतः –

एतेन सर्वज्ञत्वसर्वशक्तित्वादीनामपि अविद्याकल्पितमायिकरूपभेदविषयत्वमुक्तं वेदितव्यम् । यत्तु केचित् सर्वस्य कर्तृत्वादेव वर्तमानस्वकार्यसर्वविषयज्ञता तावत् सिद्धा । एवं तत्तत्काले अतीतसर्वविषयावगमात् अनुभूतविषयाऽसंप्रमोषा स्मृतिः स्वमायापरिणामोपाधिरनावरणत्वात् सर्वविषया कल्प्यते । तथा सृष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वात् आगामिसर्वविषयज्ञानं स्वमायापरिणामोपाधि कल्प्यत इति युक्ता सर्वज्ञता । 'यः सर्वज्ञः सर्ववित्' (मुं. १-१-९) इति च जगत्कारणे सर्वज्ञपदप्रयोगात् सर्वविषयज्ञानं प्रमीयत इति श्रुतियुक्तिभ्यां युक्ता सर्वज्ञता – इति वर्णयन्ति । सर्वज्ञत्व-

सर्वशक्तित्वयोः सर्वोपाधिकधर्मत्वात् निरुपाधिकब्रह्मस्वरूपकथनमन्तरेण कस्यचिद् धर्मतया प्रतिपत्तिर्न युक्ता–इति च शङ्कित्वा परिहारमाहुः– आनन्दत्वस्यैव निरुपाधिकस्वरूपलक्षणत्वमिति ॥

तत्र मायोपाधिकं सर्वावभासनक्षमं ज्ञानस्वरूपमेव सर्वज्ञ-शब्देन लक्ष्यत इति यद्यभिप्रायः, अस्त्वेवम् । परं कर्तृत्वादेव स्वकार्यसर्वविषयकज्ञानात् सर्वज्ञत्वं मायापरिणामोपाधिकसर्वविषयक-स्मृतिश्च – इत्यादिकम् अनुमातुं न युज्यते कुलालादिदृष्टान्तेन । दृष्टान्तवदेव सशरीरत्वादीनामपि अभ्युपगन्तव्यत्वप्रसङ्गात् **पत्यधि-करणन्यायेन** । न च श्रुतिबलेनाभ्युपगतस्य सम्भावनार्थत्वाद् युक्तेः, किमपि दूषणं न प्रादुःष्यात् इति वाच्यम् । तथा हि 'पश्यत्यचक्षुः स शृणोत्यकर्णः' (श्वे. ३–१९) इति श्रुत्यनुसारेण ब्रह्मणो नित्यज्ञानस्वरूपत्वस्यैवाभ्युपगन्तव्यतया नातीतविषयकस्मृत्यादि-कल्पनादिप्रयास आहूतव्यः । न चैतत् सर्वज्ञत्वादिकं निरुपाधिक-स्वरूपलक्षणमिति वक्तुं शक्यम् । सर्वावभासनक्षमत्वेन ज्ञानस्यौपाधि-कत्वध्रौव्यात् । ननु "असत्यपि कर्मणि 'सविता प्रकाशते' इति कर्तृत्वव्यपदेशदर्शनात्" (सू. भा. १–१–५, पा. २७) इति भाष्योक्तनीत्या असत्यपि ज्ञानविषये विज्ञप्तिमात्रं सर्वज्ञशब्देन विवक्ष्यत इत्यदोषः – इति चेत्, तर्हि निरुपाधिकत्वद्योतनाय 'सर्वं च तत् ज्ञं च' सर्वज्ञम् इत्येवम् अद्वितीयस्यैव सर्वज्ञत्वमुपपादनीयम्, न पुनः 'सर्वावभासनक्षमज्ञानत्वात्' इति विषयोपाधिकम् । अतः 'सर्वज्ञम्' 'सर्वशक्तिः'–इति च न निरुपाधिकस्वरूपलक्षणं विवक्षितम्–इत्येव युक्तम् । कारणत्वव्यपदेशात् । "तदेवम्, अविद्यात्मकोपाध्यपेक्षमेव

ईश्वरस्य ईश्वरत्वं, सर्वज्ञत्वं, सर्वशक्तित्वं च । न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते ।" (सू. भा. २-१-१४, पा. २०१) इति भाष्ये स्पष्टोल्लेखनाच्च इत्यवधेयम् ॥

यत्पुनः केचिदाहुः – 'प्रकृष्टप्रकाशश्चन्द्रः', 'अयं घटः' इत्यादिवाक्यानां स्वरूपमात्रपरत्ववत् 'विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतयः स्वरूपमेव ब्रह्मणः समर्पयन्ति । न हि 'चन्द्रः' इत्यनेन 'घटः' इत्यनेन वा पदेन, प्रकृतिप्रत्यययोरर्थं विदित्वा पदस्य विशिष्टार्थबोधकत्वं प्रतियन्ति वाक्यार्थप्रतिपत्तारः, किं तर्हि तात्पर्यवशात् चन्द्रघटस्वरूपमात्रबोधकत्वम् इति सर्वानुभवसिद्धमेतत् । न च चन्द्रघटादीनां प्रकृष्टप्रकाशवत्त्वकम्बुग्रीवाद्याकारविशिष्टत्वादि तत्र शब्दप्रतिपाद्यम् । प्रत्यक्षसिद्धत्वात् तस्य । न च नामनामिसंसर्गः प्रतिपाद्यः । तथा प्रतिपत्त्यभावात् श्रोतुः । पारिशेष्यात् तात्पर्यवशेन विशेष्यमात्रं वाक्यगम्यं वस्तु । तथा प्रकृतेऽपि 'विज्ञानमानन्दं ब्रह्म' इति ब्रह्मणः स्वरूपमात्रसमर्पकं लक्षणवाक्यमिति ॥

तत्र प्रकृष्टप्रकाशवद्वस्तुव्यतिरेकेण चन्द्रपदवाच्यं वस्तु, कम्बुग्रीवादिमद्वस्तुव्यतिरेकेण च घटपदवाच्यं वस्तु वाक्येन समर्प्यते, श्रोत्रा च तदेव बुध्यते इति यद्यभिप्रायः, सोऽनुभवविसंवादी । कथम् ? 'अस्मिन्नाकाशे कश्चन्द्रः ?', 'अत्र को घटः ?' इति वा प्रश्नोत्तरत्वेन हि वाक्यं समुत्थितम् । तत्र अस्ति कश्चित् पदार्थश्चन्द्रशब्दवाच्यः, घटशब्दवाच्यो वा इति वृद्धेभ्यः श्रुतवतः खलु

एवंविधः प्रश्नः सम्भवति । तस्य च प्रकृष्टप्रकाशवत्, कम्बुग्रीवादिमद् वा वस्तु निर्दिश्य उत्तरवाक्यमुच्चरितम् इति स्थितिः । तत्र प्रकृष्टप्रकाशवत्पदार्थादेः प्रत्यक्षसिद्धत्वेऽपि तदनूद्य चन्द्रादिशब्द-वाच्यवस्तुनश्चन्द्रादिशब्दवाच्यत्वं चन्द्रादिवस्तुरूपं वा प्रतिबोध्यते इति प्रकृष्टप्रकाशवत्त्वरूपं विशेषणांशं प्रविहाय, चन्द्रशब्दवाच्यं वस्तु किमन्यत् तत्र विशेष्यस्वरूपमात्रं विवक्षितं स्यादिति न तर्कितुं शक्नुमो वयम् । अथापि स्यादाग्रहः – अस्त्येव यत्किञ्चित् स्वं रूपं चन्द्रस्य घटस्य च विशेषणातिरिक्तमनिर्वचनीयमिति, अस्तु तर्हि तथैव दार्ष्टान्तिकेऽपि विज्ञानानन्दादिशब्दवाच्यं यत्किञ्चित् स्वं रूपं ब्रह्मणः । तत्तु विज्ञानानन्दादिरूपलक्षणोपाधिद्वारकत्वं न व्यभिचरति । ततश्च 'विज्ञानमानन्दं ब्रह्म' इत्यादिकमपि सर्वज्ञत्वादिवत् सोपाधिकरूपमेव लक्षयेत्, न निरुपाधिकं शुद्धं तत्त्वस्वरूपम् – इति प्राप्नोति । न हि निरुपाधिके स्वरूपे समस्ति किञ्चिदपि शब्दप्रवृत्तिनिमित्तमिति । अत एव हेतोः सत्यज्ञानविज्ञानानन्दब्रह्मात्मादिशब्दा अपि अविद्याकल्पित-नामरूपाद्युपाधिद्वारेणैव ब्रह्मवस्तु निर्दिशन्तीति बोध्यम् । स्वतस्तु 'नेति नेति'(बृ. २–३–६), 'अस्थूलमनणु' (बृ. ३–८–८) इत्येवम् अध्यारोपितपरप्रतिषेधेनैव निर्देश्यं तत् । तथा हि **बृहदारण्यकभाष्ये** स्पष्टमुक्तम् "अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञान-मानन्दं ब्रह्म', 'विज्ञानघन एव', 'ब्रह्म', 'आत्मा'–इत्येवमादिशब्दैः" (बृ. भा. २–३–६, पा. ७५५–७५६) इति । तस्मात्, असन्नयं विवेको यत् सर्वज्ञत्वादिकं सोपाधिकलक्षणम्, आनन्दादिकं तु

निरुपाधिकलक्षणम्—इति । अथ स्यात् — सत्यज्ञानानन्दादिशब्दाः निरुपाधिकब्रह्मस्वरूपस्य न वाचकाः किं तर्हि लक्षणया तन्निर्दिशन्ति । तथा च न विरुद्धं तेषां स्वरूपलक्षणत्वम् । उक्तं हि तैत्तिरीयभाष्ये 'एवं सत्यादिशब्दा इतरेतरसंनिधानात् अन्योन्यनियम्यनियामकाः सन्तः, सत्यादिशब्दवाच्यात् तन्निवर्तका ब्रह्मणो लक्षणार्थाश्च भवन्ति' (तै. भा. २-१, पा. २८५) इति । एवं तर्हि सर्वज्ञसर्वशक्त्यादिशब्दा अपि तथैवेति न तेषु सोपाधिकधर्मवाचकत्वशङ्का आनेतव्या भवतीति स्थितम् ॥

तदेवं निर्विशेषमेव सत्, नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति ब्रह्म अविद्याकृतरूपभेदेनैव जगत्कारणम् इति सिद्धम् ॥

# ३. अनिर्वचनीयजगज्जन्मादिसतत्त्वम्

५५. **ब्रह्मकार्ययाथात्म्यज्ञापका दृष्टान्ताः** — नित्यप्रत्यस्तमितसर्वविशेषमेवाद्वितीयं ब्रह्म अविद्याकल्पितनामरूपलक्षणरूपभेदेन जगत्कारणव्यपदेशभाग् भवतीत्युपपादितम्, तदवस्थायां च सद्ब्रह्मात्मविज्ञानानन्दादिशब्दैर्निर्दिश्यते इति च । तत्र नामरूपयोरविद्याप्रत्युपस्थापितत्वात्, यद्यपि जन्मस्थितिप्रलयेषु तिसृष्वप्यवस्थासु ब्रह्मानन्यत्वमेव परमार्थतः 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११) इत्यादिश्रुतिभ्यः, तथापि स्वेन अविद्याकल्पितमायारूपेण तयोर्ब्रह्मणः सकाशाद् उत्पत्तिस्थितिप्रलया भवन्तीत्युपदिश्यते वेदान्तेषु आत्मैकत्वप्रत्ययदार्ढ्याय । तथा यद्यपि सर्वेषां जीवानां नित्यं ब्रह्मानन्यत्वमेव,

'तत्त्वमसि' (छां. ६–८–७) इत्यादिश्रुतिभ्यः, तथापि अविद्याकल्पित-नामरूपकृतकार्यकरणसङ्घातलक्षणोपाध्यनुरोधिमायारूपेण तेषामपि ब्रह्मणः सकाशादुत्पत्त्यादयः श्रूयन्ते आत्मैकत्वप्रत्ययदार्ढ्यायैव, न तु परमार्थत एव तेषां जन्मस्थित्यप्ययाः सन्ति नामरूपात्मकस्य जगतः जीवानां वा नामरूपकृतकार्यकरणसङ्घातानुरोधिनः । 'स बाह्याभ्यन्तरो ह्यजः' (मुं. २–१–२) इत्यादिभ्यो ब्रह्मणः कूटस्थनित्यतावादिभ्यः श्रुतिभ्यः ; "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' (बृ. ४–४–२२) इत्यादिभ्यश्च जीवानां नित्यमेवाजाद्वयब्रह्मात्मतां वदन्तीभ्यः ॥

तदेवं तत्र तत्र श्रूयमाणाः, भूतभौतिकपदार्थानां जीवानां चोत्पत्तिस्थितिप्रलयाः अविद्याविजृम्भितं मायामात्रमित्यजानतां प्रतिबोधनाय श्रुतिषु मृल्लोहविस्फुलिङ्गादिदृष्टान्ताः प्रणीताः, कथं नाम कार्यत्वेन श्रूयमाणस्य सर्वस्यापि विकल्पनामात्रत्वम्, कारणात्मनैव च कार्यस्य सत्यत्वम्, अत एव च कारणविज्ञानेनैव सर्वस्यापि कार्यस्य विज्ञातत्वम्, वस्तुतः कार्यकारणभावस्य मायामात्रत्वं च जिज्ञासुहृदयमागच्छेत् इति । तद्यथा – 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् 'यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद् – वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्' (छां. ६–१–५) इति चैवमादिना मृल्लोहादिविकाराणां नामधेयमात्रत्वाद् विकल्पत्वम्, मृल्लोहाद्यात्मनैव सत्यत्वम्, मृल्लोहादिविज्ञानेनैव च विज्ञातत्वं चाह । 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः....

सर्वे एत आत्मानो व्युच्चरन्ति' (बृ. मा. २-१-२३), 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' (मुं. २-१-१) इति च जीवात्मनाम् अग्निविस्फुलिङ्गवत् कारणेनैकत्वमाह । तत्र दृष्टान्ते विवक्षितांशम् आत्मैकत्वम्, कार्यस्य मायामात्रत्वं चाबुध्यमानानाम्, वास्तव एव प्रकृतिविकृतिभाव इत्यभिनिविशमानानां व्युत्पादनाय सृष्टिवाक्यस्यात्मैकत्वबुद्ध्युपायत्वं कार्यस्य मिथ्यात्वं च ज्ञापयितुं रज्जुसर्पादिदृष्टान्ताः प्रकल्पिता अभियुक्तैः, कार्यकारणभावश्च सुस्पष्टं प्रत्याख्यातः । तद्यथा – 'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥' (गौ.का-(३-१५), 'अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता । सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते । रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥' (गौ. का. २-१७, १८), 'स्वप्नमाये यथादृष्टे गन्धर्वनगरं यथा । तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥' (गौ. का. २-३१), 'स्वतो वा परतो वाऽपि न किञ्चिद् वस्तु जायते । सदसत्सदसद्वापि न किञ्चिद् वस्तु जायते ॥' (गौ. का. ४-२२), 'नास्त्यसद्धेतुकमसत् सदसद्धेतुकं तथा । सच्च सद्धेतुकं नास्ति सद्धेतुकमसत् कुतः ॥' (गौ.का. ४-४०) इति । एतच्च सर्वम् इहापि भाष्ये स्फुटीभविष्यति ॥

५६. **अनिर्वचनीयवस्तूत्पत्तिवादः, तद्दूषणं च** – तत्रैवं कार्यस्य प्रतीतितो मायामयत्वं स्वभावतश्च कारणानन्यत्वं च विज्ञाप्य

आत्मैकत्वप्रतिपत्तिदृढीकरणाय श्रीगौडपादभाष्यकारादिभिः समुपात्तान् शुक्तिरजतरज्जुसर्पादिदृष्टान्तान्, अन्यथैव व्याचचक्षिरे केचित् । कथम् ? शुक्तिरजतप्रतिभासस्थले किल न रजततत्सम्भिन्नशुक्तिविषयम् एकं ज्ञानं समस्ति, किं तु अविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यते इति । कथं तर्हि ज्ञानस्यैकत्वानुभव इति ? तत्राहुः । विषयावच्छिन्नं हि फलम् अवभासते, न ज्ञानावच्छिन्नम् । विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतया एकतामापन्नः । तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमपि एकमित्युपचर्यते । भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावात्, इदं ज्ञानसमवायिमिथ्यात्वम् अनिर्वचनीयार्थतामेव गमयति । यस्माच्च ख्यात्यन्तरवादेषु प्रमाणविरुद्धं बहु कल्पनीयम् अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्यात्वं नाम एकः स्वभावः, 'नास्ति रजतम्, मिथ्यैव रजतमभात्' इत्यनुभवसिद्धः समाश्रयणीयः । अविद्योपादानकल्पनायाश्च अन्वयव्यतिरेकसिद्धत्वात् – इति ॥

तदिदं मतं मूलाविद्योपादानकाध्यासवाददूषणेनैव दूषितं वेदितव्यम् । तत्र सर्वस्यापि व्यवहारस्य अध्यासलक्षणाविद्याप्रत्युपस्थापितत्वे सिद्धे, कार्यकारणव्यवहारस्य तादृशव्यवहारान्तर्गतस्यैव स्वातन्त्र्यं प्रकल्प्य, सर्वव्यवहारनिर्वोढुरप्यध्यासस्य कार्यत्वमनुभवविरुद्धं समाश्रित्य तदुपादानकारणत्वेनाविद्याकल्पनम् अन्याय्यमिति स्पष्टमेव । विस्तरस्तु सुगमादिषु द्रष्टव्यः । अथाभ्युपगम्यापि मूलाविद्योपादानकाध्यास-

वादम्, अनिर्वचनीयरजताद्युत्पत्तिवादे दोषं निर्दिशामः । तत्र मृल्लोहादिदृष्टान्तेष्वाशङ्क्यमानपरिणामवादमेव वेषान्तरेण कल्पयतां कथं न घट्टकुटीप्रभातम्? कथं वा विकारस्य वाचारम्भणत्वं वदन्त्या श्रुत्या, रज्जुसर्पादीनां विकल्पमात्रत्वं वदद्भिर्वेदान्तवृद्धैश्चाविरोधः? कथंतरां रज्जुसर्पादीनां मनोविकल्पनामात्रत्वमास्थाय तदुत्पत्तिप्रलयादिकं 'न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा', इत्यादिवाक्यैर्व्यासेधद्भिः (गौ.का.भा. २–३२, पा. २०४), 'रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते' (छां. भा. ६–२–३, पा. ५००) इति रज्जुसर्पबुद्धेः रज्जुमात्रविषयत्वम् ब्रुवद्भिः, 'प्रत्येत्येव हि केवलं न तु तत्र रजतमस्ति' (सू. भा. ४–१–६, पा. ४६७) इति शुक्तिरजतस्यात्यन्ताभावं शुक्तौ कण्ठरवेणोद्घोषयद्भिश्च भाष्यकारैरविरोधः? कथंतमां च शुक्तिरजतद्विचन्द्रादीनामुत्पत्तिविनाशौ सर्वलोकाप्रसिद्धौ स्वात्यन्तरनिरासमात्रेण प्रकल्पयतां लोकानुभवाविरोधः? कथञ्च सर्वथाप्यप्रसिद्धस्य विवादपदापादितस्य दृष्टान्तत्वेनानयनम्?–इत्यादिप्रश्नपारम्परी दुरुत्तरैव वादेऽस्मिन्। तस्मात्, श्रुत्यभियुक्तोक्तिविरुद्धत्वात्, युक्त्यनुभवविरुद्धत्वात् अप्रसिद्धेनाप्रसिद्धं साधयितुं प्रवर्तमानत्वाच्च सर्वथा त्याज्योऽयमनिर्वचनीयपदार्थोत्पत्तिवाद इत्यलमतिप्रपञ्चेन ॥

**५७. नामरूपयोरनिर्वचनीयत्वं कीदृशम्?**– तदेवं जगतो ब्रह्मणः सकाशादुत्पत्त्यादिः श्रूयमाणो मायिको विकल्प एव, रज्जुसर्पाद्युत्पत्त्यादिवत्; आत्मैव तु परमार्थसन् इति स्थितम् । तत्रात्मनि विकल्प्यमानस्य नामरूपात्मकस्य जगतः सर्वविकल्पास्पदीभूतेन ब्रह्मणा

को वा संबन्धः ? – इति विमर्शे यथोदाहृतसलिलफेनदृष्टान्तन्यायेन प्रतीयमाने ते नामरूपे न ब्रह्मणोऽन्ये, न वा तदेव । अत एव तत्त्वान्यत्वाभ्यामनिर्वचनीये इति वर्ण्येते भाष्यकारादिभिः । व्याख्यानप्रस्थानानुयायिभिस्तु यथैव शुक्तिरजतादिकं न सत्, नासत्, नापि सदसत् ; न शुक्त्यादेर्भिन्नम्, नाभिन्नम्, न भिन्नाभिन्नम् ; न सांशम्, न निरंशम्, नाप्युभयात्मकम् - इति अनिर्वाच्यम, एवमेव नामरूपात्मकं जगदपि अनिर्वाच्यमेव इत्यास्थीयते । तेष्वेव केचिदपरे सर्वथापि निर्वक्तुमशक्यमनात्मवस्तु इति प्रतिज्ञाय प्रावादुककल्पितानि पदार्थनिर्वचनानि खण्डयित्वा, खण्डनयुक्त्यसहत्वमेवानिर्वचनीयत्वम् – इति मन्यन्ते स्म ॥

तत्र शुक्तित्वादिरूपेणानिश्चितस्य शुक्त्यादेरेव रजतादिरूपेण विकल्प्यमानत्वे अनुभवतः सिद्धे रजतादिविकल्पानां सत्त्वासत्त्वादिशङ्का नैवोत्तिष्ठतीति तेषां सत्त्वादिप्रकारकत्वखण्डनम् आयासमात्रम् इति यद्यपि अनुभवमात्रशरणानां भायादेव, तथापि तद्दृष्टान्तेन नामरूपविकाराणामपि तथैवाचिन्त्यत्वोपपादने वादिप्रकल्पितरीत्या शुक्तिरजतादीनामप्यचिन्त्यत्वोपपादनमुपायो भवतीति न तत् पराणुद्यते । तथा ह्यभियुक्ता अलातदृष्टान्तमुपन्यस्याहुः – 'अलाते स्पन्दमाने वै नाभासा अन्यतो भुवः । न ततोऽन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥ न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः । विज्ञानेऽपि तथैव स्यादाभासस्याविशेषतः ॥' (गौ. का. ४–४९, ५०) इति । न चैवमनिर्वचनीयोत्पत्त्यादिनिषेधे जगज्जन्माद्यपि निषिद्धमेव स्यात्–इति प्रकृतसूत्रा-

प्रवृत्तिरेव प्रसज्येतेति मूले कुठारपातन्याय आपतेदिति शङ्क्यम् । मायाजातिवादस्याङ्गीकृतत्वात् । तर्हि शुक्तिरजताद्युत्पत्तिरपि तथैवास्तु, कस्तत्र प्रद्वेषो भवतामिति चेत् । न । भावानवबोधात् । न हि वयं शुक्तिरेव मायया रजतादिरूपेण जायत इति वादं व्यासेधामो येनेत्थं प्रत्युत्थानं शोभेत, अपि तु मूलाविद्यापरिणामेनानिर्वचनीयाध्यासरजताद्युत्पत्तिः–इति वादम् । न हि मूलाविद्यानामकं परमात्मन्यध्यस्तनामरूपलक्षणप्रकृतिव्यतिरेकेणास्ति किञ्चिदन्यत् – इत्यसकृदवोचाम । अतो यत्किञ्चिदेतत् । किञ्च, शुक्त्यादिदृष्टान्ते लौकिकसद्वस्तु शुक्त्यादि, अत्यन्तासत् तुच्छम्–इति विभागः शक्य आस्थातुम् इति शुक्तिरजतस्य सदसदादिविलक्षणत्वेन अनिर्वचनीयत्वमुपपाद्येतापि ; दार्ष्टान्तिके पुनः परमार्थसद्वस्तु ब्रह्म, तद्व्यतिरिक्तत्वेन विकल्प्यमानमन्यत् सर्वमप्यसदेव; तस्मिंश्चासति तुच्छमप्यन्तर्गतम्, न त्वनात्मनो व्यतिरिक्तं तुच्छं नाम किञ्चित् चिन्तयितुमपि शक्यम्, येन सत्त्वासत्त्वादिप्रतिषेधेन पारिभाषिकमनिर्वचनीयत्वं जगतः सिध्येत्–इति वैषम्यम् । अत एव हि श्रुत्यापि 'सत्यं चानृतं च सत्यमभवत्' (तै. २–६) इति परमार्थसत्यब्रह्मकार्यस्य सत्यानृतविभागेन द्वैराश्यमेव ब्रूते । अतः कथं न वैषम्यं दृष्टान्तदार्ष्टान्तिकयोरितीदं परिशीलनीयं संविदनुसारिभिः ॥

अथ सर्वथाप्यशक्यनिर्वचनीयत्वेन वादिकल्पितवस्तुविभागलक्षणप्रमाणादिनिर्वचनं खण्डयतां तत एव चानात्मवस्तुनोऽनिर्वचनीयत्वमाकाङ्क्षमाणानां मतं यद्यपि निर्दुष्टमेव, ब्रह्मव्यतिरिक्तस्य सर्वस्याप्यचिन्त्यत्वख्यापनात् । तथापि स्वाभ्युपगतायाम् अनिर्वचनीयाविद्यायां

लक्षणप्रमाणाद्यानयनं खण्डनयुक्तिसहमित्यभिनिवेशस्तु न मर्षणीयः अविद्याया इव तल्लक्षणादीनामपि तुल्यन्यायेनाशक्यनिर्वचनत्वादेवेति न पृथग्वक्तव्यम् ॥

सर्वथापि तु नामरूपात्मकजगतोऽनिर्वचनीयत्वप्रदर्शनमात्रम् अद्वैतार्थस्य जिज्ञासुजनानुभवारूढत्वकरणे न पर्याप्तम् इति त्वस्मदभिप्रायः । अद्वैतं हि नाम सर्वथाप्यविद्यातत्कार्याविरहं वस्तुतत्त्वम् । अनिर्वचनीयप्रतिभासस्य चानिवारणीयमविद्याकार्यत्वमिति । **भाष्यकारीया** तु नामरूपयोरात्मत्वतदन्यत्वाभ्यामनिर्वचनीयत्ववाचोयुक्तिः, परमार्थतस्तयोरप्यात्मानन्यत्वस्थापनार्थैवेति न दोषभागिनी । तथा हि **बृहदारण्यकभाष्यवचनम्** – 'यदा तु परमार्थदृष्ट्या परमात्मतत्वात् श्रुत्यनुसारिभिः अन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवद् वस्त्वन्तरे तत्त्वतो न स्तः, सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते ; यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनादिस्वरूपवदेव स्वेन रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सत, नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते नामरूपोपाधिदृष्टिरेव भवति स्वाभाविकी, तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारः' (बृ. ३–५–१, पा. ८११) इति ॥

तस्मात्, अविद्याविकल्पितशुक्तिरजतादिरूपं विकल्पास्पदशुक्त्यादित्वतदन्यत्वाभ्यामनिर्वचनीयं प्रतीतवेषदृष्ट्या, शुक्त्याद्यनन्यदेव तु वस्तुदृष्ट्या, एवं नामरूपात्मकं जगदपि ब्रह्मणोऽन्यत्वेनानन्यत्वेन

या अनिर्वचनीयं प्रतीतवेषेण जन्मादिव्यवहारभाक्, ब्रह्मैव तु नित्यं तद् वस्तुस्वरूपदृष्ट्या इत्येव वरम् अनिर्वचनीयवादो गृहीतः – इति सुधीभिराकलनीयम् ॥

# ४. अभिनववेदान्तिसम्मतपरिणामवादपरीक्षा

५८. **अभिनववेदान्तिकल्पना** – अत्राहुः केचित् । नेयं मायापरिणामादिकल्पना आश्रयितव्या । श्रुतिसूत्रबाह्यत्वात् । न हि श्रुतिरस्ति अविद्याकल्पितमायिकरूपभेदेन ब्रह्म जगदात्मना परिणमते इति ; ब्रह्मैव तु 'सच्च त्यच्चाभवत्' इति वचनमस्ति । तस्मादेवं कल्प्यताम् – नामरूपविभागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थम् ; जगतस्तदापत्तिरेव प्रलयः । नामरूपविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यावस्थम् ; ब्रह्मणस्तथाविधस्थूलभाव एव च सृष्टिः । एवम् ईश्वरशरीरतया तत्प्रकारभूतत्वाच्चिदचितोः, प्रकृतिपुरुषप्रकारसंस्थिते परमात्मनि प्रकारभूतप्रकृत्यंशे विकारः, प्रकार्यंशे चाविकारः ; प्रकारभूतजीवांशे तद्धर्मभूतज्ञानसङ्कोचविकासौ सर्वे च अपुरुषार्थाः, प्रकार्यंशे च नित्यनिरवद्यता–इत्येवंविधाभिन्ननिमित्तोपादानकारणताभ्युपगमे न कोऽपि दोषः प्रादुःष्यात् इति ॥

अत्राभिधीयते । यद्यपि 'इन्द्रो मायाभिः' (बृ. २–५–१९), 'अजायमानो बहुधा विजायते' (तै. आ. ३–१३–३८) इत्यादिश्रुतिरुदाहृतैव प्राक्, अविद्याकल्पितमायापरिणामवादोपष्टम्भकः, सूत्रं

चास्त्येव तत्र 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे.सू. २–१–१४) इति । न चास्ति श्रुतिः सूत्रं वा 'चिदचित्प्रकारकं ब्रह्म कार्यात्मना परिणमते' इत्यस्मिन्नर्थे, न चायं वादः कैश्चिदपि प्राचीनैरुपस्थापितः परामृष्टो वा भगवत्पादादिभिः, तत्पूर्वतनैर्वा, तथाप्यभ्युपगम्य ब्रूमः – तदेतदयुक्तं वादिनां कल्पनमिति । कुतः ? यदि हि ब्रह्मणोऽपृथग्भूतौ तत्संसक्तौ च चिदचिदंशौ, तर्हि तद्गता दोषा विकाराः, अनित्यतादिलक्षणाः ब्रह्मण्येव अभ्युपगताः स्युः । अथ, ब्रह्मणः समस्तचिदचिद्विलक्षणतया तन्नियामकतया च निर्विकारतैवेत्यदोषः – इति मनीषा ; तर्हि सृष्टिप्रलयौ चिदचितोरेव, न तु तद्विलक्षणब्रह्मणः इति प्राप्नोति तथा च जगज्जन्मादिकारणत्वं परित्यक्तव्यं स्यात् इति ॥

५९. **पूर्वपक्षिवेदान्तिभिः स्वपक्षविशदीकरणम् –** ननु कथमस्मदुक्तम् अपरिभावयन्नेव युक्तियुक्तमपि पक्षं दूषयति भवान् ? लोके हि देवमनुष्यादिशब्दवाच्यस्य सशरीरस्यात्मनः 'मनुष्यः, बालः, युवा, स्थविरः' इति नानावस्थाप्राप्तावपि बालत्वयुवत्वस्थविरत्वादयः शरीरगता दोषाः नात्मानं स्पृशन्ति, आत्मगताश्च ज्ञानसुखादयो न शरीरम्–इति दृष्टम् । अतः कार्यावस्थं कारणावस्थं च ब्रह्म प्रत्यगात्मशरीरतया तदात्मभूतम् इति गुणदोषव्यवस्था । ब्रह्मोपादानत्वेऽपि सङ्घातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासङ्करोऽप्युपपन्नतरः । यथा शुक्लकृष्णरक्ततन्तुसङ्घातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसम्बन्धः इति कार्यावस्थायामपि न सर्वत्र वर्णसङ्करः, तथा चिदचिदीश्वरसङ्घातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्व-

भोग्यत्वनियन्तृत्वाद्यसङ्करः। तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित् संहतानां कारणत्वं कार्यत्वं च; इह तु चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात्, तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्यः–इति विशेषः। स्वभावभेदस्तदसङ्करश्च तत्र चात्र च तुल्यः। एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशोऽपि स्वरूपान्यथाभावाभावात् अविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुनः आत्मतयाऽवस्थानात् कार्यत्वमप्युपपन्नतरम्। अवस्थान्तरापत्तिरेव हि कार्यता। निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणासंबन्धात उपपद्यन्ते। "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः" (छां. ८–१–५) इति हेयगुणान् प्रतिषिध्य 'सत्यकामः सत्यसङ्कल्पः' इति कल्याणगुणान् विदधती इयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति॥

तदेवं चिदचिदीश्वराणां स्वभावभेदं स्वरूपभेदं च वदन्तीनाम्, कार्यकारणभावं कार्यकारणयोरनन्यत्वं च वदन्तीनां सर्वासां श्रुतीनाम् अविरोधः, चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावम्, शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिम्, कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः श्रुतिभिरेव ज्ञायते। चिदचिदीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारणभावप्रतिपादनं कार्यकारणयोरैक्यप्रतिपादनं च ह्यविरुद्धम्। अतो न कथञ्चिदपि कञ्चिदपि दोषमिहासञ्जयितुं शक्नुयुः श्रुतिप्रमाणका इति चेत्॥

६०. **चिदचिच्छरीरकब्रह्मवादपरिशीलनम्** – अत्राभिदध्महे । न श्रुतिप्रमाणकोऽयं वादः । तथा हि 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृतः' (बृ. ३–७–३) इत्यारभ्य सूत्रनियन्तारम् अन्तर्यामिणं ब्रूहीति उद्दालकेन पृष्टो हि याज्ञवल्क्यः 'स त आत्मा अन्तर्याम्यमृतः' इति प्रतिपर्यायं ब्रवीति । तन्मध्ये पठितमस्तीदमपि वाक्यम् 'य आत्मनि तिष्ठन्' (बृ. मा. ३–७–३०) इत्यादि । अत्र च 'य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति' (बृ. ३–७–१) इत्युपक्रमसामर्थ्यात् अन्तर्यामिगतोऽयं प्रश्नोत्तरसमुदायः, न तु चिदचिदीश्वरसंबन्धमेव साक्षादधिकृत्य प्रवृत्तः – इति गम्यते । तत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च अन्तरवस्थितः परमात्मैव, स च सर्वस्यात्मा – इतीयदर्थप्रतिपादनेनोपक्षीणं वाक्यमिति नैतत् शरीरशरीरिभावविधानेऽपि तात्पर्यवत् इत्यवसीयते । अतश्च नैतद्बलेन सर्वत्र चिदचितोरीश्वरस्य च शरीरशरीरिभावो वा तत्स्वरूपस्वभावभेदो वा विवक्ष्यत इत्यवगन्तुं शक्यम् । नापि युक्तिमानयं वादः । न हि शरीरशरीरिदृष्टान्तेन शरीरधर्मा नात्मानं स्पृशन्ति, आत्मधर्माश्च शरीरं न स्पृशन्ति – इत्यवसातुं शक्यम् । यतो न धर्माधर्मकर्ता जीवः शरीरसम्बन्धमन्तरेण कर्म कर्तुं तत्फलं भोक्तुं वा क्षमः । शरीरकृते हि पुण्यपापे अवश्यं शरीरिणमात्मानं संसृजन्तीत्यभ्युपेयम् । अन्यथा संसारगतय एव विचित्राः शास्त्रोक्ता न स्युर्जीवानाम् । किञ्च 'न ह वै

सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति'(छां.८-१२-१)इति ब्रुवती श्रुतिः शरीरकृतमेव शरीरिणः प्रियाप्रियरूपफलभोगे निमित्तम् इति दर्शयति। तथा च चिदचितोः शरीरभूतयोर्दोषा अवश्यं शरीरिणं परमात्मानं संस्पृशेयुर्यदि शरीरात्मभावलक्षणो लोकसिद्ध एव सम्बन्धोऽत्र विवक्षितः। अथ मतम् – परमपुरुषनियाम्यत्वेन तदपृथक्स्थितिरेवात्र विवक्षिता चिदचितोस्तच्छरीरत्ववाचोयुक्त्या, न लोकसिद्धशरीरत्वमिति, नैव तर्हि समस्ति दृष्टान्तो लोकसिद्धः। न चेदं युक्तं वचः 'सशरीरस्यात्मनः शरीरगता दोषा न भवन्ति, आत्मगताश्च ज्ञानसुखादयो न शरीरस्य' इति; यत्कारणम्, ज्ञानसुखादयोऽपि सूक्ष्मशरीरस्यैव धर्माः, नात्मनः 'इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत् क्षेत्रं समासेन सविकारमुदाहृतम्' (गी. १३–६) इति भगवद्वचनप्रामाण्यात्। किञ्च, न वस्तुतः शरीरशरीरिणोरपृथक्स्थितिः कल्पयितुं शक्यते। न ह्यात्मनो निरवयवस्यासङ्गस्य शरीरेण संयोगलक्षणः संबन्धः शक्योपपादनः, नापि समवायलक्षणः। शरीरशरीरिणोर्विषयविषयिणोः कार्यकारणभावानुपपत्तेः, गुणगुणिभावानुपपत्तेश्च। दृष्टश्च प्रतिदिनं स्वप्नावस्थायां शरीरिणो जाग्रच्छरीरेण वियोगः, अन्येन च शरीराभासेन संयोगः। तदिह दृष्टान्त एव तावदसिद्धः; कुतः पुनस्तदाश्रयेण परमात्मशरीरत्वं चिदचितोः सिद्ध्येदिति कैव तथा परमात्मनश्चिदचितोश्चापृथक्स्थितेः ? अपि च लोकदृष्टकार्यकारणभावस्य कालापेक्षास्तीति, कारणं पूर्वकालस्थितम्, कार्यं च तदुत्तरकाले लप्स्यमानात्मभावम्। अत्र पुनः कालस्यापि परमेश्वरात् सृष्टिमाहुः श्रुतयः। 'सर्वे निमेषा

जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम् ॥' (ना. २) इति विविधविशेषाकारेण भासमानस्य कालस्यापि परमपुरुषादेव जायमानत्वेन विज्ञानात् । तत्र कालस्यैव तावत् कारणावस्था कार्यावस्था वा न शक्यचिन्तना लोकदृष्ट्या, प्रागेव न ब्रह्मणः – इति किमिदमुच्यते ब्रह्मणः कारणावस्था, कार्यावस्था – इति च ? तस्मात् दुःसंभाव्यमिदं यदुच्यते चिदचिदीश्वराणां शरीरात्मभावेन प्रकारप्रकारिभावः, कार्य-कारणयोरैक्यं च श्रुतिभिरेव प्रतिपन्नमिति ?

**६१. चिदचिच्छरीरकब्रह्मवादे ब्रह्मलक्षणासम्भवः –** किञ्चान्यत्, 'जन्माद्यस्य यतः' इति प्रकृतसूत्रे किंस्वरूपं ब्रह्म कथं लिलक्षयिषितमिति वक्तव्यम् । ननु जगज्जन्मादिकारणस्य ब्रह्मणः सकलेतरव्यावृत्तं स्वरूपमभिधीयते 'सत्यं ज्ञानमनन्तं ब्रह्म' इति । तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माऽऽह ; तेन विकारास्पदम् अचेतनम्, तत्संसृष्टश्चेतनश्च व्यावृत्तः । ज्ञानपदं नित्यसङ्कुचितज्ञानैकाकारमाह ; तेन कदाचित्सङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः । अनन्तपदं देशकाल-वस्तुपरिच्छेदरहितं स्वरूपमाह ; सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम् । तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः, नातिशय-स्वरूपगुणा नित्या व्यावृत्ताः, विशेषणानां व्यावर्तकत्वात् । ततः 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यनेन वाक्येन जगज्जन्मादिना अवगत-स्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयम् इति लक्ष्यते इति नान्यो-न्याश्रयणम् । अथवा जगत्सृष्टिस्थितिप्रलयैरुपलक्षणभूतैर्ब्रह्म प्रतिपत्तुं

शक्यते । 'यन्मूलाः जगज्जन्मस्थितिलयाः, तद् ब्रह्म' इति जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्म – इति लक्षयन्ति । जगन्निमित्तोपादानताक्षिप्तसर्वज्ञत्वसत्यसङ्कल्पत्वविचित्रशक्तित्वाद्याकार-बृहत्त्वेन प्रतिपन्नं ब्रह्म – इति च जन्मादीनां तथाप्रतिपन्नस्य लक्षणत्वेन नाकारान्तराप्रतिपत्तिरूपा अनुपपत्तिः – इति चेत् ॥

अत्राभिधीयते – चिदचिद्व्यतिरिक्तं चेतनं वस्तु यथावर्णित-रूपं मनसा चिन्तयितुमपि न शक्यते । चिदचितोः परस्परव्यावृत्त-स्वरूपयोः सकाशाद् विलक्षणस्य प्रकारान्तरविशिष्टस्य तत्त्वस्य अत्यन्ताप्रसिद्धत्वात् । जगज्जन्मादीनि हि तावत्, जगत एव विशेषणानि न ब्रह्मणः । देशकालादिविशिष्टजगतः कृत्स्नस्य जन्माद्येव तावन्न मनसा चिन्तयितुं शक्यम्, प्रागेव न तत्कारणत्वादिविशिष्टं तत्त्वम् । तादृशतत्त्वस्य सत्यज्ञानादिस्वरूपत्वम्, तद्गुणाश्च किं लोक-सिद्धसजातीयाः, किं वा तद्विसदृशाः ? – इति विकल्पने उभयथापि ब्रह्मस्वरूपसिद्धिः, तद्गुणसिद्धिर्वा न हृदयमागच्छेल्लोकस्य । लोक-सिद्धसजातीयत्वे हि प्रसिद्धचित्स्वरूपत्वमेवेति न ब्रह्मस्वरूपत्वम्, तद्वैसादृश्ये तु अत्यन्तालौकिकत्वाद् वस्तुनः कथं तत्र सत्यज्ञानादि-स्वरूपत्वम्, कथं वा सर्वज्ञत्वादिगुणविशिष्टत्वम् इति दुरूहं स्यादिति । तादृशब्रह्मणो देशकालादिविशिष्टजगद्व्यतिरिक्तस्य जगज्जन्मादिकारणत्व-मपि दुरूहमेवेत्युपपादितम् । चिदचिद्विशिष्टत्वमेव तावद्दुरूहं ब्रह्मणि, शरीरशरीरिभावकल्पनाया दुरुपपादत्वात् इत्युक्तम् । शरीरभूत-चिदचितोः कार्यकारणावस्थाभेदभाक्त्वे कथञ्चित् कल्पितेऽपि नित्यैक-

स्वरूपत्वेन प्रतिज्ञातस्य ब्रह्मणोऽवस्थाभेदः कथम् ? कथं च तादृशस्य जगदुपादानत्वमिति तु सुतरां दुरुपपादम् । न च श्रुतिप्रामाण्यात् सर्वमिदमुपपन्नम् इति प्रत्यवस्थेयम् । श्रुतेरपि शब्दरूपायाः यथोपवर्णितालौकिकवस्तुप्रतिपादने सामर्थ्यानवगमात् । तस्मान्नायं सूत्रार्थः, न वा श्रुत्यर्थः—इत्यलमतिप्रपञ्चेन ॥

यथा तु – समस्तचिदचिद्विभक्तजगद्विकल्पस्य परमात्मन्येवावभासात् तत्रैव लब्धस्थितिकत्वात्, तत्रैव प्रविलयाच्च सर्वदापि परमार्थाव्यतिरिक्तत्वमेव, ब्रह्म च तादृशविकल्पास्पदं आनन्दस्वरूपम्—इति भगवत्पादीया प्रक्रिया श्रुतिसूत्रयुक्त्यनुभवसंमता, तथा प्रतिपादितमेव ग्रन्थशरीरे इतीह विरम्यते ॥

# ५. ईश्वरशब्दार्थनिरूपणम्

६२. **ब्रह्मणि ईश्वरशब्दप्रयोगः कथम् ?** – अथैतदधिकरणभाष्ये ब्रह्मणि ईश्वरशब्दप्रयोग उपलभ्यते 'न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणम् ईश्वरं मुक्त्वा अन्यतः प्रधानादचेतनात्, अणुभ्यः, अभावात्, संसारिणो वा उत्पत्त्यादि सम्भावयितुं शक्यम्' इति । तत्र ईश्वरशब्देन किमभिप्रेतम् ? – इति विचारणीयम् । 'अथातो ब्रह्मजिज्ञासा' इति हि ब्रह्मजिज्ञासा कर्तव्यत्वेनोपदिष्टा पूर्वस्मिन् अधिकरणे । अत्र च 'किंलक्षणं पुनस्तद् ब्रह्म ? – इत्यत आह भगवान् सूत्रकारः' इति पातनिकां कृत्वैव जन्मादिसूत्रं व्याचष्टे भाष्यकर्ता ।

अतो जिज्ञास्यतया विवक्षितस्यैवेदं लक्षणमिति तावद् युक्तं प्रतिपत्तुम् । तत्र निर्विशेषं तत्त्वं जिज्ञास्यमित्येव तावत् कथम् ? – इत्याक्षेपः पूर्वाधिकरणभाष्यतत्त्वविवेचन्यां समाहितः । अथ, निर्विशेषस्य लक्षणं वक्तीदं सूत्रम् इति कथं न व्याहतं वचः ? कथं च तादृशब्रह्मणो जगज्जन्मादिकारणत्वं सङ्गच्छते ? – इति चोद्यद्वयम् अपनीतमेतावता ग्रन्थसन्दर्भेण । अथेदानीं शङ्का नः सञ्जायते कथं नु निर्विशेषे ब्रह्मणि ईश्वरशब्दप्रवृत्तिरिति ? किञ्च, पूर्वाधिकरणभाष्येऽपि ब्रह्मास्तित्वे शङ्कामुद्भाव्य तत्परिहारसन्दर्भे उक्तम् ' अस्ति तावद् ब्रह्म नित्यशुद्ध-बुद्धमुक्तस्वभावम्, सर्वज्ञम्, सर्वशक्तिसमन्वितम् ' इति । पुनश्च ब्रह्म सर्वस्यात्मेति प्रतिज्ञाय तद्विशेषं प्रति विप्रतिपत्तिपूगोपन्यासावसरे ' अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् ' इतीश्वरास्तित्ववादिपक्षमुपन्यस्य ' आत्मा स भोक्तुरित्यपरे ' इति स्वमतमुपक्षिप्तम् । तथा च सर्वस्यात्मा सर्वज्ञः सर्वशक्तिमानीश्वर एव ब्रह्मशब्द-वाच्यः–इत्युक्तं भवति । अत्रापि पुनस्तस्यैव ब्रह्मणो लक्षणकथनं प्रतिज्ञाय सर्वज्ञः सर्वशक्तिश्च ईश्वर एव जगज्जन्मादिकारणं ब्रह्मेत्युच्यते । तत्रैवं सति कथं निर्विशेषवस्तुनि सूत्रमिदं प्रमाणमिति वक्तुं पार्यते ?– इति ॥

६३. **व्याख्यानप्रस्थानीयमतभेदाः, तत्रेश्वरकारणवाद-स्यैवात्र विमर्शनीयत्वं च** – अत्र व्याख्यानप्रस्थानभेदानाश्रित्य वादिनो विकल्पयन्ति । कथम् ? (१) शुद्धमेव जगदुपादानकारणं ब्रह्म जन्मादिसूत्रतद्भाष्ययोर्विवक्षितम् । उपादानत्वस्य ज्ञेयब्रह्मलक्षण-

त्वोक्तेः । 'आत्मन आकाशः सम्भूतः' इत्यादिकारणवाक्येषु शबलवाचिनाम् आत्मादिशब्दानां शुद्धे लक्षणैव—इत्येके ; (२) सर्वज्ञत्वाद्युक्तेर्मायाशबलमीश्वररूपमेव ब्रह्म कारणम्—इत्यन्ये ; (३) आकाशादिकस्य जगतः स्वाश्रितमायापरिणामत्वेऽपि अन्तःकरणादिकं प्रति जीवेश्वरौ उभावप्युपादानम्—इत्येके ; (४) व्यावहारिकप्रपञ्चस्य ब्रह्म उपादानम्, प्रातिभासिकस्य तु जीवः—इत्येके ; (५) सर्वं जगत् सेश्वरम् एकजीवकल्पितम्—इत्यन्ये ; (६) मायैव कारणम् ; (७) ईश्वरो माया चेत्युभयं कारणम्—इति च पक्षान्तरमाश्रिताः, केचित् ; (८) ब्रह्ममात्रमुपादानम्, माया तु द्वारकारणम् ; (९) ब्रह्मैव कारणम्, माया तु सहकारिणी—इत्यपि विकल्पयन्ति केचित् ॥

तत्र 'यतो वा इमानि भूतानि जायन्ते' (तै. ३–१), 'अहमादिश्च मध्यं च भूतानामन्त एव च' (गी. १०–२०) इत्यादिश्रुतिस्मृतिभ्यः 'जन्माद्यस्य यतः' (वे. सू. १–१–२) इति सूत्रात्, 'परस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्यादा' (सू. भा. १–१–२२, पा. ४७), 'सर्ववेदान्तेषु सृष्टिस्थितिसंहारकारणत्वेन ब्रह्मणः प्रसिद्धत्वात्' (सू. भा. १–२–९, पा. ७०) इत्यसकृद् ब्रह्मण्येव जगत्कारणत्वोल्लेखिभाष्याच्च ब्रह्मेतरकारणत्वजगद्वादिनां पक्षा उपेक्ष्या इति स्पष्टमेव । तस्मिन् ईश्वरत्वशब्दव्यपदेश्यत्वं तु कथम् ? – इत्येव त्विदानीं विमर्ष्टव्यम् ॥

६४. **सगुणेश्वरकारणत्ववादिनां मतम्** – तत्रैके मन्यन्ते- सर्वज्ञत्वादिविशिष्टो मायाशबल एव ईश्वरोऽत्र जगत्कारणत्वेनाभिमतः ;

ईश्वरगतमपि कारणत्वं तदनुगतम् अखण्डचैतन्यं शाखाचन्द्रमसमिव तटस्थतया उपलक्षयितुं शक्नोतीति तस्य ज्ञेयब्रह्मलक्षणत्वोक्तिरिति। एवं च निर्गुणसगुणयोर्मध्ये सगुणेश्वरस्यैव मुख्यवृत्तेन लक्षणमिदम् इति तैरुक्तं भवति। एतमेव विवेकं मनसि कृत्वा स्यात् केचित् विद्यया निवर्तित-जीवभावः किम् ईश्वरभावमापद्यते। किं वा शुद्धचैतन्यरूपेणैवावतिष्ठते? इति संशयमुत्थाप्य निर्णयमकार्षुः—प्रतिबिम्बो जीवः, बिम्बस्थानीय ईश्वरः, उभयानुस्यूतं शुद्धचैतन्यम् – इति जीवेश्वरशुद्धचैतन्यस्वरूप-विवेके स्थिते, मुक्तस्य यावत् सर्वमुक्ति सर्वज्ञत्व-सर्वकर्तृत्व-सर्वेश्वरत्व-सत्यकामत्वादिगुणकपरमेश्वरभावापत्तिरिष्यते। यथा अनेकेषु दर्पणेषु एकस्य मुखस्य प्रतिबिम्बे सति, एकदर्पणापनये तत्प्रतिबिम्बो बिम्बभावे-नावतिष्ठते। न तु मुखमात्ररूपेण, तदानीमपि दर्पणान्तरसंनिधान-प्रयुक्तस्य मुखे बिम्बत्वस्यानपायात्, तथा एकस्य ब्रह्मचैतन्यस्य अनेके-षूपाधिषु प्रतिबिम्बे सति, एकस्मिन् प्रतिबिम्बे विद्योदये सति, तेन तदुपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावेनावस्थानावश्यंभावात्। न च मुक्तस्याविद्याऽभावात् सत्यकामत्वादिगुणविशिष्टसर्वेश्वरत्वानुप-पत्तिः। तदविद्याभावेऽपि तदानीं बद्धपुरुषान्तराविद्यासत्त्वात्। न हीश्वरस्य ईश्वरत्वं सत्यकामादिगुणवैशिष्ट्यं च स्वाविद्याकृतम्; तस्य निरञ्जनत्वात्, किं तु बद्धपुरुषाविद्याकृतमेव तत्सर्वमेष्टव्यम् इति। अस्य च पक्षस्य श्रुतिसूत्रभाष्यानुगुण्यं साधयितुं दहराधिकरणे 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' (वे. सू. १–३–१९) इति सूत्रोदाहृतं प्रजापतिवाक्यं सत्यसङ्कल्पत्वादिगुणाष्टकयुक्तात्मनिरूपणपरम्, तद्भाष्यं

च निर्दिश्य प्राहुः – तद्वाक्ये चतुर्थपर्याये प्रतिपाद्यस्य मुक्तस्य ईश्वरभावापत्तिं स्पष्टमाह **सूत्रकारः**; तदभावे मुक्तेऽपि सत्यसङ्कल्पत्वाद्ययोगात्, अनुक्रान्तस्य गुणाष्टकस्य ईश्वरादन्यत्रापि भावे कृतशङ्कापरिहारालाभाच्च–इति युक्तिमुपन्यस्यन्तः। **भाष्यकारवचनं** च स्वमते प्रमाणयन्ति स्म ' तस्मात्, यदविद्याप्रत्युपस्थापितम् अपारमार्थिकं जैवं रूपं कर्तृत्वभोक्तृत्वरागद्वेषादिदोषकलुषितम् अनेकानर्थयोगि, तद्विलयनेन तद्विपरीतम्, अपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपाद्यते ' (सू.भा. १–३–१९, पा. ११५) इति। एवम् अंशाधिकरण (वे. सू. २–३–४३....५३)–सन्ध्याधिकरण (वे. सू. ३–२–१.... ६) – ब्राह्माधिकरण (वे.सू. ४–४–५....७)भाष्यवाक्यान्यप्युदाहृत्य मुक्तस्येश्वरभावमनुमन्यते स्म भाष्यकारः–इति स्वमतमुपोद्बलयाञ्चक्रुः ॥

६५. **सगुणेश्वरकारणवादस्य दूषणम्** – नायं वादः श्रुतिसूत्रभाष्यसंमतः, युक्त्यनुभवानुगुणो वा – इति त्वस्माकं मतिः। तथा हि। यत्तावदुच्यते ईश्वरस्यैव जगत्कारणत्वं मुख्यम्, ईश्वरगतमपि कारणत्वं तदनुगतम् अखण्डचैतन्यं शाखाचन्द्रमसमिव तटस्थतया उपलक्षयतीति तस्य ज्ञेयब्रह्मलक्षणत्वोपपत्तिरिति। न तत्र श्रुतिसूत्रभाष्येषु क्वचिदपि मानं पश्यामः। **श्रुतयस्तावत्**, निषिद्धसर्वविशेषस्यैव हि जगत्कारणतां जगत्प्रशास्तृत्वं चोल्लिख्य ब्रुवन्ति। तद्यथा ' यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ' (मुं. १–१–६) इत्याथर्वणे दृश्यत्वादिविशेषनिषेधेन निर्दिष्टस्यैवाक्षरस्य भूतयोनित्वं

श्रूयते 'तथाऽक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' (मुं. २-१-१) इति च तस्मिन्नेवाक्षरे भावानामप्ययः। बृहदारण्यके च 'एतद् वै तदक्षरं गार्गि ब्राह्मणा वदन्त्यस्थूलमनण्वह्रस्वम्' (बृ. ३-८-८) इत्यादिना प्रतिषिद्धसर्वविशेषस्यैव प्रशासने जगतः स्थितिरुच्यते 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यारभ्य 'एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः' (बृ. ३-८-९) इत्यन्तेन वाक्येन। न च विधिमुखेन ब्रह्मोपदिशन्त्योऽपि श्रुतयः 'आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।' (तै. ३-६) इत्यादयः सगुणेश्वरस्यैव जगत्कारणत्वं वदन्तीत्यत्र किञ्चिद्गमकमस्ति। परमेव खलु ब्रह्म तत्र विजिज्ञासितं विज्ञातं चेति प्रश्नप्रतिवचनरूपप्रकरणेन, उपसंहारवचनेन चावगम्यते इति। भाष्यकारः खल्वपि अद्वितीयब्रह्मण एव जगत्कारणत्वमभिप्रेतं सूत्रकारस्येति सुस्पष्टमाह 'चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते' (सू. भा. २-१-२४, पा. २१०) इति पूर्वपक्षमनुवदन्; 'चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवत्, देवादिवच्च अनपेक्ष्य बाह्यसाधनं स्वयं परिणममानं जगतः कारणमिति स्थितम्' (सू. भा. २-१-२६, पा. २१२) इति च सिद्धान्तमनुवदन् – इति॥

६६. **मुक्तस्य सगुणेश्वरभावापत्तिरित्यपि न सम्यक्** – यत् पुनरुच्यते 'मुक्तस्य यावत् सर्वमुक्ति सर्वज्ञत्व-सर्वकर्तृत्व-सर्वेश्वरत्व-सत्यकामत्वादिगुणपरमेश्वरभावापत्तिरिष्यते' इति, तदपि श्रुतिसूत्रभाष्य-

प्रतिकूलं युक्त्यनुभवापेतं च – इत्येव प्रतिभाति नः । यत्कारणं 'ब्रह्मविदाप्नोति परम्' (तै. २–१), 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति' (मुं. ३–२–७), 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९) इत्याद्याः श्रुतयः ब्रह्मज्ञानेन परब्रह्मावाप्तिम् अवधारयन्त्यो न मुख्यार्था भवेयुर्मुक्तस्य सगुणपरमेश्वर-भावापत्तिम् इच्छतां मते । न च यथोपवर्णितो ब्रह्मेश्वरविवेकः कृतः क्वचिदपि वेदान्तेषु । प्रत्युत निर्गुण एव तु ब्रह्मणि पतीश्वरादिशब्दाः प्रयुक्ताः समुपलभ्यन्ते वस्तुप्रतिपादनवाक्यशेषेण, तेनैव च रूपेण मुक्तस्याप्यवस्थानमुद्घोषयन्ति श्रुतयः । 'यदैतमनुपश्यत्यात्मानं देव-मञ्जसा । **ईशानं** भूतभव्यस्य न ततो विजुगुप्सते' (बृ. ४–४–१५), 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते सर्वस्य वशी **सर्वस्येशानः सर्वस्याधिपतिः**·····**एष सर्वेश्वर** एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकाना-मसम्भेदाय' (बृ. ४–४–२२), 'य इमं मध्वदं वेद आत्मानं जीव-मन्तिकात् । **ईशानं भूतभव्यस्य** न ततो विजुगुप्सते' (का. २-१-५) इत्याद्याः । एवं सर्वज्ञत्वमपि न ब्रह्मणः सगुणत्वे लिङ्गं भवति । अदृश्यत्वादिविशेषणैर्विशिष्टस्यैवाक्षरस्य सर्वज्ञत्वेनापि वर्णनाच्छ्रुतौ 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' (मुं. १–१–९) इति ॥

यच्चेदं युक्तिग्रहणम् जीवस्य ईश्वरप्रतिबिम्बत्वात्, एकस्मिन् प्रतिबिम्बे विद्योदये सति तेन तदुपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावे-नावस्थानावश्यंभावः ; तदानीं बद्धपुरुषान्तराविद्यासत्त्वात् इत्यादि ।

तदप्यशुद्धम् । न हि जीवस्य ईश्वरप्रतिबिम्बत्वं कुत्रापि श्रुतौ समुपदिष्टमस्ति । न चाविद्यायां चेतनस्य प्रतिबिम्बोदय इति युक्तिमद् वचः ; अविद्याया दर्पणादिवत् स्वच्छद्रव्यत्वाभावात् कस्या अप्यविद्यायाः प्रतिबिम्बग्राहित्वानवक्लृप्तेः । न च 'उपाधिना क्रियते भेदरूपः', 'दृश्यते जलचन्द्रवत्' – इति वचनमत्र प्रमाणम् । तस्य दृष्टान्तमात्रसमर्पणात् । भाष्ये तथैवोपवर्णितत्वाच्च 'जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यत –इत्येवं जलधर्मानुयायि भवति, न तु परमार्थस्य सूर्यस्य तथात्वमस्ति । एवं परमार्थतोऽविकृतमेकरूपमपि सद् ब्रह्म देहाद्युपाध्यन्तर्भावाद् भजत इवोपाधिधर्मान् वृद्धिह्रासादीन्'(सू.भा.३–२–२०, पा. ३५९) इति । न चैतावता अविद्याभेदः, तस्मिन् जीवस्य तथ्यत एव ईश्वरप्रतिबिम्बत्वं च शक्यकल्पनम् । किञ्च यदि नाम जीवाविद्याकृतम् ईश्वरस्य ईश्वरत्वं सत्यकामादिगुणवैशिष्ट्यं चेत्यभ्युपगम्यते, तथापि विद्यया अविद्यापगमे तावतैव स्वप्नादुत्थित इव स्वं परमार्थरूपं विजानीयात, न तु ईश्वरभावेन जीवेभ्यः पृथगवतिष्ठेत । न च स्वाविद्याकल्पिता जीवाः पृथगवशिष्येरन् येन तदविद्याकृतं पारमेश्वरं रूपमवशिष्यत इति सम्भाव्येतापि । किञ्च, मुक्तश्चेत् ईश्वरभावेनाऽवतिष्ठते न त्वद्वितीयनिर्विशेषचैतन्यात्मना, कस्याविद्या तमीश्वरभावं जनयेत्? न तावन्मुक्तस्याविद्या समस्ति, न चान्याश्रया अविद्या अन्यस्मिन् कमप्यतिशयम् आधातुं प्रभवेदिति साम्प्रतम् । अतिप्रसङ्गात् । अथाविद्यापनयेऽप्यस्ति जीवान्तरगर्भितः प्रपञ्चः पूर्ववत्, जीवान्तराविद्याकृतश्च ईश्वरस्य सगुणेश्वरत्वमिति ; ततो

जीवान्तराविद्याकृतः संसारोऽप्यस्तु मुक्तस्य, कस्तं निवारयेत् ? अपि च, ईश्वरस्य 'ईश्वरोऽहम्' इत्यभिमानोऽस्ति वा, न वा ? अस्ति चेत्, तस्याप्यविद्याकृतत्वाविशेषात् ईश्वरस्याप्यविद्यावत्त्वादनीश्वरत्वप्रसङ्गः । अथ बद्धपुरुषाविद्याकृतस्तादृशाभिमानः, न कश्चिन्नाबद्धः पुरुषान्तरतदविद्यानामनन्तत्वात्–इत्यनिष्टप्रसक्तिर्दुर्वारा । अथ स्यात्, ईश्वरस्य आत्मनः शुद्धचैतन्यभावज्ञानं सदा अस्त्येवेति न तत्र बद्धजीवाविद्यानाशापेक्षा इति । न तर्हि मुक्तस्य ईश्वरभावापत्तिवाचोयुक्त्या किमप्युक्तं भवति । तस्येश्वरत्वादेवात्मनः शुद्धचैतन्यभावज्ञानस्य स्वत एव सिद्धौ स्वमुक्तिं प्रति बद्धजीवान्तराविद्यानाशापेक्षणाभावात् । किञ्चान्यत्, जीवनानात्वम्, जीवाश्रिताविद्यानानात्वं चापि अविद्याकृतं वा न वा ? न तावत् स्वाभाविकं तदित्यभ्युपगम्यते ; न चान्योऽस्ति तादृशश्चेतनः, यदविद्याकृतं तत् कल्प्येत – इति पुनरप्यसामञ्जस्यमेव । तदेवं सर्वथापि युक्त्याघातासहमेतत्कल्पनम् ॥

६७. प्रजापतिवाक्यस्यैदम्पर्यम् – यच्चाप्युदाह्रियते प्रजापतिवाक्यं दहराधिकरणस्थसूत्रोदाहृतम्, सूत्रभाष्यं च सर्वमुक्तिपर्यन्तं सगुणेश्वरभावापत्तिरेव मुक्तस्येत्यस्मिन्नर्थे, तदपि भवतां प्रतिकूलमेवेति मन्महे । श्रुतिः खलु प्रजापतिवेषधारिणी अवस्थात्रयस्थमात्मस्वरूपं निरूप्य प्रतिपर्यायमाह–' एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म ' इति । तत्र यद्यवस्थात्रयेऽप्येक एवात्मा स्थितः, स च ' अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः ' (छां. ६–७–१) इति प्रजापतिनोक्तरूपः परमार्थत एव,

तच्च रूपं सगुणम्, न सुषुप्तौ तावत् तत्सद्भावः शङ्कितुं शक्यः। तत्र हि जीवः किञ्चिदपि न जानाति; यदनुवदति स्म श्रुतिरिन्द्रवाचा 'नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि' (छां.८-११-२) इति। तादृशस्य तस्यैवात्मनः सगुणेश्वररूपत्वं प्रजापतिनोक्तमपि कथं नामेन्द्रः प्रतीयात् तथ्यमिति? श्रुतिस्तु तत्रापि 'शान्तहृदयः प्रवव्राज' (छां. ८–११–१) इतीन्द्रस्य मनःसमाधानप्राप्तिं जगौ – इत्यदो न सगुणरूपं भवितुमर्हतीत्यकामैरप्यभ्युपगन्तव्यम्। चतुर्थपर्याये तु 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८–१२–१) इति शरीरादिसर्वोपाधिरहितमेव रूपमुपदिष्टम्; तत्र का वार्ता सगुणेश्वरभावस्येति? अथ सूत्रेऽपि खलु 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' (वे. सू. १–३–१९) इति प्रजापतिवाक्ये आविर्भूतस्वरूपो जीवो विवक्षितः, न तु अविद्याकल्पितसंसारिस्वरूपः–इत्युच्यते। यदेव तस्य स्वरूपम्, तदेवात्र दहरवाक्येऽपि समाहितसर्वकाममुपास्यत्वेन विवक्षितमित्युक्तम्, कुतः शङ्का प्रजापतिवाक्ये सगुणेश्वरभावस्य? भाष्यकारोऽपि खलु–"अक्षिलक्षितं द्रष्टारं निर्दिश्योदशरावब्राह्मणेनैनं शरीरात्मताया व्युत्थाप्य 'एतं त्वेव ते' इति पुनःपुनस्तमेव व्याख्येयत्वेनाकृष्य स्वप्नसुषुप्तोपन्यासक्रमेण 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म, तद्रूपतया एनं व्याचष्टे, न जैवेन रूपेण। यत् परं ज्योतिरुपसंपत्तव्यं श्रुतम्, तत् परं ब्रह्म; तच्च अपहतपाप्मत्वादिधर्मकम्, तदेव च जीवस्य पारमार्थिकं स्वरूपम्। 'तत्त्वमसि' इत्यादिशास्त्रेभ्यः; नेतरदुपाधिकल्पितम्" (सू. भा. १–३–१९, पा. ११२) इत्याह। अत्र जैवं रूपं कल्पितम्, अपहत-

पाप्मत्वादिधर्मकं तु स्वरूपं विद्यया प्राप्तव्यम्—इत्युच्यत इति स्पष्टम् । तत्र कथङ्कारं तदेव स्वरूपं स्वाभाविकं सत् बद्धजीवाविद्याकृतमित्युच्येत श्रुतियुक्त्यनुभवानुसारिभिः ? तस्मात् यदुदाहृतं भाष्यवचनम् 'तस्मात्, अविद्याप्रत्युपस्थापितम् अपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादि-कलुषितम् अनेकानर्थयोगि, तद्विलयनेन तद्विपरीतम् अपहतपाप्मत्वादि-गुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते सर्पादिविलयनेनेव रज्ज्वादि' (सू.भा. १-३-१९, पा. ११५) इति, तदनेनैकार्थ्यमापादयितव्यम्—जैवं रूपं सर्पादिस्थानीयम्, तदविद्यया प्रविलाप्य पारमार्थिकम् 'अपहतपाप्मादिधर्मकं स्वरूपं प्रतिपत्तव्यमिति । न पुनः 'सगुणरूप-मविद्याकल्पितं प्रतिपत्तव्यम्' इति श्रुतिसूत्रस्वोक्तिविरुद्धोऽर्थो भाष्य-काराभिप्रायत्वेन कल्पनीयः ॥

न च 'अपहतपाप्मत्वादिगुणकम्' (सू.भा. पा. ११५) इति गुणशब्दोपादानमात्रेण सगुणं रूपमिदमुपात्तं भाष्यकारेणेति भ्रमितव्यम्, श्रुतिसूत्रभाष्यैकवाक्यतामप्यविगणय्य । न हि सूत्रे भाष्ये वा गुण-धर्मशब्दौ सर्वत्र गुणगुणिभावं धर्मधर्मिभावं वा विवक्षित्वैव प्रयुज्येते इति नियमोऽस्ति । न हि 'अदृश्यत्वादिगुणको धर्मोक्तेः' (वे. सू. १-२-२१) इति सूत्रणात् अदृश्यत्वादिगुणकमेव निर्विशेषमप्यक्षरम् इति, 'परमेश्वरस्य हि धर्म इहोच्यमानो दृश्यते' (सू. भा. १-२-२१, पा. ८३) इति भाष्यात् सर्वज्ञत्वम् अक्षरस्य धर्म एवेति वा कल्प्येत अमूढैः । न हि निर्विशेषं च गुणगुणिभावधर्मधर्मिभाववच्च अक्षरम् – इति विप्रतिषिद्धमुच्येत भगवता सूत्रकारेण भाष्यकारेण वा – इति । एवम् 'आनन्दादयः प्रधानस्य' (वे. सू. ३-३-११) इति सूत्रे

प्रयोगो दृश्यते, 'ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषु आनन्दरूपत्वम्, विज्ञानघनत्वम्, सर्वगतत्वम्, सर्वात्मत्वम्—इत्येवञ्जातीयका ब्रह्मणो धर्माः श्रूयन्ते' इति च तद्भाष्ये (पा. ६८४) धर्मशब्द उपात्तः ... वस्तुत एव ब्रह्मणि धर्मिणि आनन्दादयो धर्मा एव विद्यन्ते इति न ... कैश्चिदपि निर्विशेषब्रह्माभ्युपगन्तृभिर्वेदान्तिभिः कल्प्येतेति। तस्मात् शब्दविकल्पजा एवैतादृशाः प्रयोगाः इति सन्तोष्टव्यम्, न तु गुणशब्दलोभेन सिद्धान्तपरित्यागः कर्तव्यः सुधीभिः॥

## ६८. सिद्धान्ते ब्रह्मणि कारणत्वेश्वरत्वादिकल्पनप्रकारः—

ननु कथं नाम भवन्मतेऽपि निर्विशेषस्याक्षराख्यस्य परब्रह्मणो जगज्जन्मादिकारणत्वम्, अपहतपाप्मत्वादिगुणकत्वम्, ईश्वरत्वम्, सर्वज्ञत्वादिकं वा घटते? न ह्यजाद्वयस्य परमार्थतत्त्वस्यैवैतत् सर्वमिति युज्यते। चोदयन्ति हि प्रस्थानान्तरीयाः— "ये तु निर्विशेषवस्तु जिज्ञास्यम् इति वदन्ति, तन्मते 'ब्रह्मजिज्ञासा', 'जन्माद्यस्य यतः' इत्यसङ्गतं स्यात्। 'निरतिशयबृहत् बृंहणं च ब्रह्म' इति निर्वचनात्, तच्च ब्रह्म जगज्जन्मादिकारणम्—इति वचनाच्च। एवम् उत्तरेष्वपि सूत्रगणेषु, सूत्रोदाहृतश्रुतिगणेषु च ईक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृतश्रुतयश्च न तत्र प्रमाणम्। तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषवस्तुनि प्रमाणम्। 'जगज्जन्मादिभ्रमो यतः, तद् ब्रह्म' इति स्वोत्प्रेक्षापक्षेऽपि न निर्विशेषवस्तुसिद्धिः; भ्रममूलमज्ञानम्, अज्ञानसाक्षि ब्रह्म—इत्यभ्युपगमात्। साक्षित्वं हि प्रकाशैकरसतयैवोच्यते, प्रकाशत्वं तु जडाद् व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति; तथा सति सविशेषत्वम्।

तदभावे प्रकाशतैव न स्यात्, तुच्छतैव स्यात्' (श्री. भा. १–१–२, पा. १२४) इति । तत्रैवं स्थिते कथं सिद्धान्ते सूत्रस्वारस्यम्? – इति चेत् –

अत्र ब्रूमः । उपपादितमिदं प्राक्तनाधिकरणविवेचन्यां यथा निर्विशेषेऽपि ब्रह्मणि 'अथातो ब्रह्मजिज्ञासा' इति सूत्राक्षराणि सङ्गच्छन्ते । यथैव तत्र जिज्ञासुजिज्ञासाजिज्ञास्यलक्षणरूपभेदविरहेऽपि ब्रह्मणि अध्यारोपापवादन्यायमनुसृत्य सूत्रप्रवृत्तिः शक्योपपादना, तथैव तेनैव न्यायेनात्रापि 'जन्माद्यस्य यतः' इति सूत्रसङ्गतिरपि सूपपादेति न किञ्चिदधिकं वक्तव्यमवशिष्यते । न चेहास्माभिः सूत्राणि वा सूत्रोदाहृतश्रुतयो वा निर्विशेषवस्तुनि प्रमाणतया उपन्यस्यन्ते, स्वतःसिद्धात्मन्यतद्धर्मनिवर्तकत्वेनैव श्रुतीनां प्रमाणत्वोपचारात् – इत्यवोचाम । तर्कस्यापि अनुमानाद् विलक्षणस्य यथात्र सावकाशत्वम्, तथा दर्शितम् 'श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम्' इति भाष्यार्थविवेचनप्रसङ्गेन (खं. २६, पा. ४७) । 'जगज्जन्मादि भ्रमो यतः' इत्यादिव्याख्यानसरणिः, 'भ्रममूलमज्ञानम्' इत्यादिप्रक्रियावष्टम्भेन तन्निराकृतिश्च अनभ्युपगमादेव निराकृता । न हि वयं ब्रह्मणि आत्मनि वा अज्ञानमूलको भ्रमो जायते, तस्य च भ्रमस्य कार्यं जगत् – इति युक्तिहीनं श्रुतिसूत्रभाष्यैरपरामृष्टं वादम् अभ्युपगच्छामः, येनेत्थम् अभियोगः स्यात् । एतेन तेऽपि व्याख्यानप्रस्थानीयाः प्रत्याख्याताः, ये खल्वाहुः – 'जगत्कारणता ब्रह्मलक्षणं स्रग्भुजङ्गवत् । जीवाज्ञातपरब्रह्मविवर्तश्च जगन्मतम्' इति । न हि जीवेश्वरभेदं

सिद्धवत्कृत्य जन्मादिकारणत्वरूपं लक्षणं प्रणीतं सूत्रकारेण। जगदन्तर्भाविनो हि जीवा अपि ; अनेककर्तृभोक्तृसंयुक्तस्य हि जगतो जन्मादि ब्रह्मणः सकाशाद् भवतीति श्रूयते, 'यतो वा इमानि भूतानि' इत्यादिस्थले, तदनुसारेणैव चात्र सूत्रं प्रवृत्तमिति ॥

तदलं 'प्रत्यक्षानुमानागमाख्यं प्रमाणजातम्, आगमगम्यं चासङ्ख्येयकल्याणगुणगणं सर्वज्ञं सत्यसङ्कल्पं परं ब्रह्म' (श्री. भा. ८७) इति श्रद्धामात्रेण विश्वस्य, अविद्याकल्पितप्रमाणप्रमेयव्यवहारमेवाश्रितैः प्रस्थानान्तरमनुरुन्धानैरुत्थापितानां दूषणानां समुद्धरणयत्नेन ॥

ननु चास्त्वेवं परैराशङ्किता दोषा निर्विशेषवादे न लब्धावकाशा इत्यपि। कथमेतावता सिद्धान्ते जगज्जन्मादिकारणत्वं ब्रह्मणः? कथं वा तस्य सर्वज्ञत्वसर्वशक्तित्वादिधर्मवत्त्वं सिध्येत्? न हि निर्विशेषम्, कारणत्वादिधर्मवच्च–इत्यव्याहतं वचः! अत्र यद् वक्तव्यं तत् प्रागेवास्माभिः सोपपत्तिकमुपन्यस्तम् (सं. १६)। तथाप्यत्र भाष्यकारेण शङ्कामुत्थाप्य यः परिहार उपन्यस्तः, सोऽप्यनुसन्धेय इति तद्वाक्यान्येवात्र लिख्यन्ते –

"कूटस्थब्रह्मात्मवादिनः एकत्वैकान्त्यात् ईशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञाविरोध इति चेत्। न। अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्, सर्वज्ञात्, सर्वशक्तेरीश्वरात् जगज्जनिस्थितिप्रलया नाचेतनात् प्रधानात्, अन्यस्माद्वा–इत्येषोऽर्थः प्रतिज्ञातः 'जन्माद्यस्य यतः' इति। सा प्रतिज्ञा तदवस्थैव, न तद्विपरीतोऽर्थः पुनरिहोच्यते। कथं नोच्यते अत्यन्तमात्मन एकत्वम्

अद्वितीयत्वं च श्रुयता ? शृणु यथा नोच्यते । सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्याम् अनिर्वचनीये संसार-प्रपञ्चबीजभूते सर्वज्ञस्य, ईश्वरस्य 'माया', 'शक्तिः', 'प्रकृतिः' इति च श्रुतिस्मृत्योरभिलप्येते । ताभ्यामन्यः सर्वज्ञ ईश्वरः, 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छां. ८-१४-१) इति श्रुतेः । ........ एवम् अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति व्योमेव घटकरकोपाध्यनुरोधि । स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रति ईष्टे व्यवहारविषये । तदेवम् अविद्यात्मकोपाधि-परिच्छेदापेक्षमेव ईश्वरस्य ईश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूप आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादि-व्यवहार उपपद्यते " (सू. भा. २-१-१४, पा. २०१) ॥

एवं 'सर्वोपेता च तद्दर्शनात्' (वे. सू. २-१-३०) इति सूत्रं 'सर्वशक्तियुक्ता च परा देवता – इत्यभ्युपगन्तव्यम् । कुतः ? तद्दर्शनात् । तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः' (सू. भा. २-१-३०, पा. २१५) इति व्याख्यायापि भगवान् भाष्यकारोऽन्यत्र लिखति स्म –

"जगदुत्पत्तिस्थितिलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत् । न । विशेषनिराकरणश्रुतीनामनन्यार्थत्वात् । उत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वम् – इति चेत् । न । तासाम् एकत्वप्रतिपादनपर-त्वात् । मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयत् शास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति । कस्मात् पुनरुत्पत्त्यादि-श्रुतीनां विशेषनिराकरणश्रुतिशेषत्वम् , न पुनरितरशेषत्वमितरासाम् इति ? उच्यते । विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात् । न ह्यात्मनः एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकाङ्क्षा

उपजायते । पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः ॥ " (सू. भा. ४-३-१४, पा. ४९९) ॥

इत्यादि ॥

एतदुक्तं भवति – अध्यारोपापवादन्यायेन निर्विशेषतत्त्वमवबोधयितुमेवेदं ब्रह्मणि ब्रह्मशब्दवाच्यत्वं जगज्जन्मादिकारणत्वम्, ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वादिकं चाध्यारोप्यते । अपवाददृष्ट्या तु 'तदनन्यत्वम्' इति कार्यस्य जगतः कारणानन्यत्वमुच्यते कार्यस्य वाचारम्भणत्वं हेतुत्वेनावष्टभ्य । त्रिष्वपि कालेषु तदेवैकं तत्त्वं निर्विशेषमेव सत् व्यवहारदृष्ट्या ईश्वरः, सर्वज्ञः, सर्वशक्तिः–इत्यादिशब्दैर्व्यपदिश्यते । न चेश्वरत्वादिशब्दप्रयोगमात्रेण तत्त्वस्य निर्विशेषत्वं हीयते सगुणत्वं वा आपाद्यते इति । अत एवात्र भाष्यकारः परमार्थतत्त्वमपि व्यवहारदृष्टिमवलम्ब्य 'परः', 'परमात्मा', 'परमेश्वरः'–इत्यादिशब्दैर्निर्दिशति । इत्थमेव खलु श्रुतिवादा अपि निर्विशेषं तत्त्वं 'यः सर्वज्ञः सर्ववित्' इत्यादिरूपेण व्यवहरन्तः सम्प्रच्छन्त इति मन्यते । एवमेव च कारणत्वाधिकरणादिस्थलेषु दृश्यमानानि ब्रह्मेश्वरशब्दयोः पर्यायत्वमूरीकृत्य प्रवृत्तानि वाक्यानि सामञ्जस्यमीयुः –

"यथाभूतो हि एकस्मिन् वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्मा एकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते । तद्यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र तावत् ज्ञानशब्देन परेण च तद्विषयेण कामयितृत्ववचनेन चेतनं ब्रह्म न्यरूपयत् अपरप्रयोज्यत्वेन ईश्वरं कारणम् अब्रवीत् । तद्विषयेणैव परेण आत्मशब्देन शरीरादिकोशपरम्परया च अन्तरनुप्रवेशनेन सर्वेषामन्तः प्रत्यगात्मानं निरधारयत्" (सू. भा. १-४-१४, पा. १६२).

इत्यादीनीति सर्वमनाविलम् ॥

६९. **सगुणनिर्गुणब्रह्मसतत्त्वम्** – कथं पुनः सगुणनिर्गुण-विवेकः प्रत्यभिज्ञायतां ब्रह्मणीति ? एतदपि **स्फुटतरमुक्तं भाष्यकृतैव**– 'यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधात् अस्थूलादिशब्दैर्ब्रह्म उप-दिश्यते, तत् परम् ; तदेव यत्र नामरूपादिविशेषेण केनचिद् विशिष्ट-मुपासनायोपदिश्यते, 'मनोमयः प्राणशरीरो भारूपः' (छां. ३-१४ २) इत्यादिशब्दैस्तदपरम्' (सू. भा. ४–३–१४, पा. ५०२) इति । परमेव ब्रह्मोपासनाय समुपदिष्टं सगुणमित्युच्यते । कार्यम्, अपरम्, अमुख्यम्, सगुणं ब्रह्म – इत्युपास्यब्रह्मणो पर्यायनामानि ; कारणम्, परम्, मुख्यम्, निर्गुणं ब्रह्म – इति च ज्ञेयस्य शुद्धब्रह्मणः । **कार्याधि-करणभाष्ये** तथा व्यपदेशदर्शनात् । इदं त्विहावश्यमवधेयम् 'परं ब्रह्म' इति यत्र यत्र विशेषणादानम्, तत्र तत्र निर्गुणमेव ब्रह्म विवक्ष्यत इति– परविशेषणेन च ब्रह्मणि कश्चिदुत्कर्षः, अपरशब्देन च तस्मिन् कश्चिन्निकर्ष इति वा–न कदापि मन्तव्यम् । यत्कारणं भाष्य-कार एव सगुणमपि ब्रह्म परब्रह्मनाम्ना निर्दिशति । तद्यथा 'मनोमयः प्राणशरीरः' इत्याम्नातम् अधस्तात् अपरब्रह्मत्वेन कण्ठरवेणाभिव्याहृतं च यद् ब्रह्म स्वेनैव, तदेव तु **सर्वत्रप्रसिद्ध्यधिकरणे** स्वयमेव भाष्यकारः परब्रह्मशब्देन निरदिक्षत् 'परमेव ब्रह्म मनोमयत्वादिभिर्धर्मैरुपास्यम्' (सू. भा. १–२–१, पा. ६२) इति । अथ च तत्रैव लिखति स्म "'अप्राणो ह्यमनाः शुभ्रः' इति श्रुतिः शुद्धब्रह्मविषया, इयं तु 'मनो-मयः प्राणशरीरः' इति सगुणब्रह्मविषया इति विशेषः" (सू. भा. १–२–२, पा. ६५) इति । मनोमयत्वादिधर्मयुक्ते परत्वविशेषणं तु

सूक्ष्मोपाधियुक्तत्वात् स्थूलोपाधियुक्तविराडाद्यपेक्षयेति सन्तोष्टव्यम् । यदप्युक्तं भाष्यकृतैवान्यत्र “ नन्वपरब्रह्मपरिग्रहे ‘ परं पुरुषम् ’ इति विशेषणं नोपपद्यते । नैष दोषः । पिण्डापेक्षया प्राणस्य परत्वोपपत्तेः । ” (सू. भा. १-३-१३, पा. १०४) इति । उपाधिद्वारेणोपदेशनमपि न सगुणत्वनिश्चायकं भवति । यतः परमार्थतो निरुपाधिकमेव सद् ब्रह्म, जिज्ञासुजनचित्तावतारोपायत्वेन यत्किञ्चिदुपाधिद्वारेणैव बोध्यते सर्वत्र वेदान्तेषु – इति स्थितिः । अतो यत्रोपाधिद्वारेणोपदिष्टमपि परिसमाप्तौ प्रतिषिद्धसमस्तविशेषरूपेण समर्प्यते ब्रह्म, तत्र निर्गुणं ब्रह्मोपदिदिक्षितम्, यत्र तु केनचिद् विशेषेण विशिष्टमेव समर्प्यते उपासनार्थम्, तत्र सगुणं विवक्षितम् – इतीदमेव तु निश्चितं सगुण-निर्गुणविवेककारणम् इति मन्तव्यम् । न चैतावन्मात्रेण ब्रह्मद्वितयं प्रसज्यते । वस्तुतो निर्गुणमेकमेव सद् ब्रह्म, उपासनार्थमेव तु उपदिश्यते अविद्याकल्पितगुणविशिष्टत्वेन – इत्यभ्युपगमात् । अत्रानुसन्धेयानि भाष्यवाक्यानीमानि –

(१) ‘ एकमपि ब्रह्म, अपेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं च उपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषु उपदिश्यते ॥ ’

सू. भा. १-१-१२, पा. ३५.

(२) ‘ निर्गुणमपि सद् ब्रह्म नामरूपगतैर्गुणैः सगुणम् उपासनार्थं तत्र तत्रोपदिश्यते ॥ ’ सू. भा. १-२-१४, पा. ७६.

(३) ‘ नन्वेवम् अद्वितीयश्रुतिरुपरुध्येत । न, अविद्याकृतनाम-रूपोपाधिकतया परिहृतत्वात् ॥ ’ सू. भा. ४-४-१४, पा. ५०२.

इति ॥

तदेवं प्रत्यस्तमितसर्वविशेषेऽपि ब्रह्मणि, अविद्याकल्पितनाम-रूपोपाध्यनुरोधित्वेन जगत्कारणत्वम्, ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वं चाध्यारोप्य श्रुतिषु, सूत्रेषु, भाष्ये च व्यवहारो परमार्थतत्त्वे जिज्ञासुजनचित्तावतारोपायत्वेन । अविद्याध्यारोपितनामरूपगतगुण-विशिष्टत्वेन सगुणं ब्रह्मेति व्यवहारस्तु मध्यमाधिकारिजनस्योपासनार्थः – इति सर्वमनाकुलम् ॥

७०. प्रजापतिवाक्ये निर्गुणमेव ब्रह्म प्रतिपाद्यते – अथैतदेकमवशिष्टं विवेक्तव्यत्वेन । यथैव दहरवाक्ये आत्मा वर्णितः 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' (छां.८-१-५) इत्यष्टगुणविशिष्टः, एवमेवोत्तरत्र प्रजापतिवाक्येऽपि 'य आत्माऽपहतपाप्मा' (छां. ८–७–१) इत्यादिना तैरेवाष्टभिर्गुणैर्विशिष्टः श्रूयते । यथैव च 'अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छां. ८–३–४) इति पूर्वस्मिन् प्रकरणे ब्रह्मरूपत्वप्राप्तिः स्वरूपप्राप्तित्वेन वर्णिता, तथैवोत्तरस्मिन्नपि 'एवमेवैष संप्रसादोऽस्माच्छरीरात्' (छां. ८–१२–३) इत्यादिना । यथैव च 'स यदि पितृलोककामो भवति' (छां. ८–२–१) इत्यादिना पूर्वत्र, एवमुत्तरस्मिन्नपि 'स तत्र पर्येति जक्षत् क्रीडन्रममाणः स्त्रीभिर्वा' (छां. ८–१२–३) इत्यादिना ऐश्वर्यप्राप्तिरपि वर्णिता । तदेवं स्थिते कुत एतदवसीयते अपहतपाप्मत्वादिधर्मकः पूर्वत्र सगुणेश्वर एव विवक्षितः, उत्तरत्र तु निर्गुणं ब्रह्म – इति, तथा सत्यामपि सत्यकामत्वादिरूपप्राप्तौ निर्गुणब्रह्मस्वरूपप्राप्तिरेव सा – इति च ? – इति शङ्का स्यात् केषाञ्चित् ॥

तत्रोच्यते – पूर्वत्र तावत् सर्वगतस्यैव ब्रह्मणो हृदयपुण्डरीकदेशस्तदभिगमस्थानत्वेनोपदिष्टः 'दहरं पुण्डरीकं वेश्म' (छां. ८-१-१) इति । तत्र च 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ' (छां. ८–१–३) इत्यादिना द्यावापृथिव्याद्याधारत्वमप्युपदिष्टम् । न च वास्तविकेन वृत्तेन हृदयपुण्डरीके स्वल्पे वेश्मनि ब्रह्मणः स्थितिः, द्यावापृथिव्यादीनां तत्र समाहितत्वं वा सम्भवति इत्यतस्तथादृष्टिक्षेप एव विवक्षित इति गम्यते । तथा निर्गुणस्यैव सतः सत्यकामत्वादिगुणवत्त्वम् उपदिष्टं तदेतदपि तथाबुद्धिकरणार्थमेवेति कल्पयितव्यं भवति । आत्मनः सर्वगतत्वे एकत्वेन निश्चीयमाने न सिद्धे सत्यपि 'य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' (छां. ८-१-६) इति देहादपसृप्य गतिरुपदिष्टा । तेनापि गम्यते नैवास्ति यथार्थाभिध्यानमत्रानुष्ठेयं विवक्षितमिति ; याथार्थ्यज्ञाने हि 'अत्र ब्रह्म समश्नुते', 'ब्रह्मैव भवति' इति च श्रुत्यन्तर इव सद्योमुक्तिर्विवक्षिता स्यादिति । तथा ब्रह्मात्मैकत्वविदां यद्यपि स्त्र्यादिविषयेभ्यः स्वयमेवोपरतिर्भवेत् द्वितीयवस्तुनो मिथ्यात्वेनैवावगमात्, तथापीह ब्रह्मचर्यं साधनत्वेन पदे पदे उपदिश्यते सावधारणम् 'तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः' (छां. ८–४–३) इत्यादिना । तस्मादपि साधनप्राप्यमेव फलमाह तत्रेति गम्यते । 'तयोर्ध्वमायन्नमृतत्वमेति' (८–६–६) इति गतिश्रवणाच्च । तस्मात्, 'यथोपासनं फलप्राप्तिः' इति न्यायेन तत्र सगुणब्रह्मप्राप्तिः, ऐश्वर्यप्राप्तिश्च विवक्षिता इत्यवगम्यते ॥

प्रजापत्युपदेशप्रकरणे पुनः – न देशसंकीर्तनमस्ति ब्रह्मगः, नापि कामा द्रष्टव्यतया समुपदिष्टाः 'य एषोऽक्षिणि पुरुषो दृश्यते' (८–७–४), 'य एष स्वप्ने महीयमानश्चरति' (छां. ८–१०–१), 'यत्रैतत् सुप्तः' (छां. ८–११–२) इत्यवस्थात्रयस्थमात्मानं प्रतिपर्यायम् 'एतदमृतमभयमेतद्ब्रह्म' इति ब्रह्मात्मनैवोपदिशति, तत्तदवस्थावत्यात्मनि दोषवत्त्वे इन्द्रेण शङ्किते 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छां. ८-११-३) इति तमेवात्मानमनुक्रम्य, उपदेशपरिसमाप्तौ 'एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छां. ८-१२-३) इति विवेकहीनशरीराभिमानात् समुत्थितस्य स्वरूपेणैवाभिनिष्पत्तिं ब्रूते ; न त्वेवात्र पूर्वत्रेव 'अनुविद्य व्रजन्ति' इत्युच्यते विज्ञानफलप्राप्तये, 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमनुविद्य विजानाति' (छां. ८–७–३) इति विज्ञानमात्रेण सर्वलोककामावाप्तिं ब्रुवन् प्रजापतिः, मिथ्याज्ञाननिवृत्तिमात्रेण फलनिष्पत्तिं विवक्षतीत्यवगम्यते । अतोऽन्योन्यं सुमहद्वैषम्यम् अनयोरुपदेशयोरिति सिद्धम् । एतच्च **सूत्रकारो** वक्ष्यति 'सम्पद्याविर्भावः स्वेन शब्दात्' (वे.सू. ४–४–१) इत्यारभ्य 'अविभागेन दृष्टत्वात्' (वे. सू. ४–४–४) इत्यन्तेन सूत्रसन्दर्भेण ॥

**७१. प्रजापतिवाक्योपसंहारे श्रूयमाणायाः स्वरूपेणाभिनिष्पत्तेः सतत्त्वम्–** या च फलप्राप्तिः, अपहतपाप्मत्वाद्यष्टगुणयुक्तब्रह्मरूपेण निष्पत्तिलक्षणा, ताम्, 'ब्राह्मैश्वर्यरूपा', 'निर्विशेषचितिमात्ररूपा' इति च जैमिनिमतेन, औडुलोमिमतेन च विकल्प्य उभयविधस्यापि

दृष्टिभेदेनाविरोधं दर्शयिष्यति सूत्रकारः । तत्र जैमिनिमतम् एवं व्याख्यातं भाष्यकारेण –

"स्वम् अस्य रूपं ब्राह्मम् अपहतपाप्मत्वादि सत्यसङ्कल्पत्वावसानम्, तथा सर्वज्ञत्वं सर्वेश्वरत्वं च, तेन स्वरूपेण अभिनिष्पद्यते–इति जैमिनिराचार्यो मन्यते ॥" सू. भा. ४–४–५, पा. ५०६.

इति ॥

औडुलोमिमतेन तु पारमार्थिकदृष्टिमाश्रित्य प्रोक्तम् –

"यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते, तथापि शब्दविकल्पजा एवैते । पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते । चैतन्यमेव तु अस्यात्मनः स्वरूपम् इति तन्मात्रेण स्वरूपेणाभिनिष्पत्तिर्युक्ता । तथा च श्रुतिः 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. ४–५–१३) इत्येवञ्जातीयका अनुगृहीता भविष्यति । सत्यकामत्वादयस्तु यद्यपि वस्तुस्वरूपेणैव धर्मा उच्यन्ते 'सत्याः कामाः अस्य' इति, तथापि उपाधिसंबन्धाधीनत्वात् तेषां न चैतन्यवत् स्वरूपत्वसंभवः । अनेकाकारत्वप्रतिषेधात् । प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वम् 'न स्थानतोऽपि परस्योभयलिङ्गम्' (३–२–११) इत्यत्र । अत एव च जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थम्, 'आत्मरतिः' इत्यादिवत् । न हि मुख्यान्येव रतिक्रीडामिथुनानि आत्मनि शक्यन्ते वर्णयितुम् ; द्वितीयविषयत्वात् तेषाम् । तस्मात्, निरस्ताशेषप्रपञ्चेन प्रसन्नेन अव्यपदेश्येन बोधात्मना अभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते ॥" सू. भा. ४–४–६, पा. ५०६.

इति ॥

'एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः' (वे. सू. ४–४–७) इति बादरायणमतं तु एवं व्याख्यातं भाष्ये –

"एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्य ऐश्वर्यरूपस्य अप्रत्याख्यानात् अविरोधं बादरायण आचार्यो मन्यते ॥ " (पा. ५०६–५०७) इति ॥

छान्दोग्यभाष्ये च इदं ब्रह्मविद्याफलम् तत्रोपवर्ण्यमानमैश्वर्यं च एवं व्याख्यातम् –

(१) वाय्वादीनाम् आकाशादिसाम्यगमनवत् अविद्यया संसारावस्थायां शरीरसाम्यमापन्नः, 'अहममुष्य पुत्रः, जातः, जीर्णो, मरिष्ये' इत्येवंप्रकारं प्रजापतिनेव मघवान् यथोक्तेन क्रमेण 'नासि त्वं देहेन्द्रियादिधर्मा, तत्त्वमसि' इति प्रतिबोधितः सन्, स एष संप्रसादो जीवोऽस्मात् शरीरात् आकाशादिव वाय्वादयः समुत्थाय देहादिविलक्षणम् आत्मनो रूपमवगम्य, देहात्मभावनां हित्वा इत्येतत् । 'स्वेन रूपेण सदात्मनैव अभिनिष्पद्यते' इति व्याख्यातं पुरस्तात् । स येन स्वेन रूपेण संप्रसादोऽभिनिष्पद्यते – प्राक् प्रतिबोधात् तद्भ्रान्तिनिमित्तात् सर्पो भवति यथा रज्जुः, पश्चात् कृतप्रकाशा रज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते–एवं च स उत्तमपुरुषः । उत्तमश्चासौ पुरुषश्चेति उत्तमपुरुषः स एवोत्तमपुरुषः । अक्षिस्वप्नपुरुषौ व्यक्तौ, अव्यक्तश्च सुषुप्तः समस्तः संप्रसन्नः, अशरीरश्च स्वेन रूपेणेति । एषामेष स्वेन रूपेणावस्थितः क्षराक्षरौ व्याकृताव्याकृतौ अपेक्ष्य उत्तमपुरुषः । कृतनिर्वचनो ह्ययं गीतासु ॥ छां. भा. ८–१२–३.

(२) स सम्प्रसादः स्वेन रूपेण तत्र स्वात्मनि स्वस्थतया सर्वात्मभूतः, पर्येति क्वचित् इन्द्राद्यात्मना । जक्षत् हसन् भक्षयन् वा भक्ष्यान् उच्चावचान् ईप्सितान् । क्वचिन्मनोमात्रैः सङ्कल्पादेव समुत्थितैर्ब्राह्मलौकिकैर्वा क्रीडन् स्त्र्यादिभिः रममाणश्च मनसैव, नोपजनम् स्त्रीपुंसयोरन्योन्योपगमेन जायत इति उपजनम् ; आत्मभावेन वा आत्मसामीप्येन जायत इति उपजनम् इदं शरीरम् । तन्न स्मरन् ॥

(३) ननु कथमेकः सन् 'नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा', 'कामांश्च ब्राह्मलौकिकान् पश्यन् रमते' इति च विरुद्धम्, यथा एको यस्मिन्नेव क्षणे पश्यति, तस्मिन्नेव क्षणे न पश्यति च इति ? नैष दोषः। श्रुत्यन्तरे परिहृतत्वात्। द्रष्टुर्दृष्टेरविपरिलोपात् पश्यन्नेव भवति ; द्रष्टुरन्यत्वेन कामानाम् अभावात् न पश्यति च इति ॥ (छां. भा. पा. ५९९-६०१).

तदेवं छान्दोग्यश्रुतिभाष्यसूत्रभाष्ययोरेकवाक्यताकरणेनेदं सिद्धम्, यत् प्रजापतिवाक्योक्ता जीवस्य स्वरूपेणाभिनिष्पत्तिर्निर्विशेषचैतन्यमात्ररूपैव, अवस्थात्रयपरीक्षणेन शरीरात्समुत्थाप्य अशरीरतावधारणादात्मनः, 'सत्यकामः सत्यसङ्कल्पः' इत्यात्मगुणानुक्रमणे कथनं तु सगुणोपासनेन मुक्तानामेव सन्तः कामादयो ज्ञानिनोऽपीति स्तुत्यर्थम्। 'जक्षत् क्रीडन् रममाणः' इत्याद्यैश्वर्यमपि ब्राह्मलौकिकमेवानूक्तं ज्ञानस्तुत्यर्थमिति सर्वं सुस्थम्। मुक्तस्य ब्राह्मैश्वर्यानुमोदनं च बादरायणेन व्यवहारापेक्षं स्तुत्यर्थमेवेति सर्वमनाकुलं मुक्तस्य स्वेन निर्विशेषचिन्मात्ररूपेणाभिनिष्पत्तिपक्षाङ्गीकारे। एवमेव च विद्यया अविद्यापबाधने सति एकान्तेन नित्यमुक्तब्रह्मस्वरूपावाप्त्युपचार उपपद्यते, विद्याफले मुक्तिलक्षणे विशेषप्रतिनियमाभावश्च भगवता बादरायणेन सूत्रितः 'एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः' इति (सू. ३-४-५२) इत्युपपन्नतरो भवतीत्यलमतिप्रपञ्चेन ॥

## ६. उपसंहारः

७२. तदेवं प्रत्यस्तमितसर्वविशेषम् अवाङ्मनसगोचरमपि परमार्थतत्त्वं स्वात्मरूपेणैव सर्वदा स्थितमपि उपदेशार्थं शास्त्रे जिज्ञास्य-

त्वेन व्यवह्रियमाणम्, ब्रह्मसदात्मादिशब्दगोचरं भवति । तस्य च सूत्रे 'जन्माद्यस्य यतः' इत्येवं श्रुत्यनुगमेन प्रणीतं लक्षणं ब्रह्मस्वरूपसमर्पणार्थम् । अस्य च सूत्रस्य यद्यपि 'अस्य जगतः जन्मस्थितिभङ्गं यतः, तद् ब्रह्म' इत्येतावानक्षरार्थः, तथापि विवक्षितार्थस्त्वयम् – स्वरूपेण निर्विशेषं कूटस्थम् अद्वितीयमेव च शश्वत् स्थितमपि सत् तदेव ब्रह्म अविद्याप्रत्युपस्थापितव्याकृतनामरूपवशात्, नामरूपकृतकरणसङ्घातवैचित्र्यवशाच्च नानाकर्तृभोक्तृसंयुक्तेन प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयभूतेन जगद्रूपेणावभासते । 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा' (छां. ८–१४–१) इति च श्रुतेः । तादृशजगद्व्याकर्तृत्वलक्षणम् उपाधिम् आश्रित्यैव तद् ब्रह्म सर्वज्ञत्वसर्वेश्वरत्वादिगुणकेश्वरत्वेन व्यवह्रियते; व्याकृतं जगत्, तदन्तर्गता जीवाश्च ईशितव्यत्वेन व्यवह्रियन्ते । यावदविद्याव्यवहारं तथाविभक्तत्वेनैव प्रतिभासाद् ब्रह्मणः । श्रुतौ ब्रह्मणो जगज्जन्मादिकारणत्वेन व्यवहारस्तूपदेशार्थम् अध्यारोपदृष्ट्या लोकसिद्धकार्यकारणभावबुद्धिमनुसृत्यैव जगतो ब्रह्मानन्यत्वविज्ञापनेन विज्ञाप्यब्रह्मस्वरूपनिर्दिदिक्षयैव । 'आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ॥' इति ब्रह्मणो आनन्दस्वरूपज्ञापनेनैवोपक्षयदर्शनाज्जगज्जन्मादिश्रुतिवाक्यस्य । तत्र 'जायन्ते' इत्याद्यवान्तरवाक्यं तु न पारमार्थिकजन्माद्यभिप्रेत्य प्रवृत्तम्, किं तर्हि ब्रह्मात्मतामपरित्यज्यैव तिष्ठति जगत् सर्वदा – रज्ज्वात्मतामिव सर्पादि तिसृष्वप्यवस्थासु

स्वविषयप्रतीत्युदयलयलक्षणासु–इत्येतदुपपादयितुम् । न हि 'जायन्त एव' इत्यादिरूपेण जन्माद्यवधारणमस्ति, 'आनन्दाद्ध्येव' इत्यादिरूपेण ब्रह्मस्वरूपमेव त्ववधार्यते । एवं हि जगत उत्पत्तिस्थितिलयानाम् इतरेतरव्यभिचारात्, ब्रह्मण आनन्दस्वरूपाविशेषाच्च सर्वत्र, उत्पत्त्यादीनां प्रतीतवेषेणानिर्वचनीयत्वम्, स्वरूपेण तु आनन्दब्रह्मानन्यत्वमेवेति गमितं भवति, रज्ज्वादिस्वरूपस्याविशेषेऽपि सर्पादीनामिव विकल्पानाम् इतरेतरव्यभिचरतां रज्ज्वाद्यनन्यत्वम् । 'तदेतद् ब्रह्मापूर्वमनपरमनन्तर-मबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ. २–५–१०) इति कार्य-कारणभाववर्जितत्वेनैव ब्रह्मस्वरूपनिर्देशाच्च श्रुत्यन्तरे इहापि तथैव ब्रह्मस्वरूपनिर्देश इत्यवगम्यते । एवं च यथैव पूर्वस्मिन् सूत्रे 'अथातो ब्रह्मजिज्ञासा' इति जिज्ञासुजिज्ञास्यभेदमध्यारोपदृष्ट्या स्वीकृत्योपदिष्टा जिज्ञासा तादृशभेदापनयनेन स्वयंप्रसिद्धाद्वितीयब्रह्मात्मतावगमायैव, एवमत्रापि कार्यकारणभावमध्यारोपदृष्ट्या स्वीकृत्योपदिष्टं जगज्जन्मादि-कारणत्वम्, उत्तरत्र तादृशकार्यकारणभावापनयनेन नित्याजाद्वय-ब्रह्मात्मस्वरूपावगमनायैवेति गम्यते, 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद' (बृ. ४–४–२५) इति च श्रुतेः – इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-परिचर्यावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्र-सरस्वत्याख्येन भिक्षुणा प्रणीतायां सूत्रभाष्यार्थतत्त्वविवेचन्यां

जन्माद्यधिकरणभाष्यार्थतत्त्वविवेकः समाप्तः

ॐ तत् सत्

श्रीसच्चिदानन्देन्द्रसरस्वतीविरचिता

# सूत्रभाष्यार्थतत्त्वविवेचनी

## (जिज्ञासाधिकरणभाष्यस्य नूतना व्याख्या)

अत्र भगवत्पादसंमतवेदान्तप्रक्रियाया असाधारणधर्माः सुविशदं तदीयभाष्योक्त्युपजीवनेनैव आविष्कृताः । व्याख्यानप्रस्थानेषु परस्परेण भाष्यकृदभिप्रायेण विरुध्यमानाः कतिचनाभिप्रायाः परीक्षिताः । संप्रदायविरुद्धाः परवादा अपि तत्र तत्र श्रुतियुक्त्यनुभवप्रातिकूल्यप्रकटनपूर्वकं निराकृताः । **परिशिष्टभागे च** (१) अधिकरणसारः, (२) निर्विशेषब्रह्मवादे सूत्रस्वारस्यम्, (३) सूत्रस्य विधिविचारपरत्वाभावश्च – इत्येते विषयाः सप्रमाणं निरूपिताः ॥

**क्रौन् अष्टपार्श्वक १६+१२२ पत्रात्मकस्य ;**

**इदानींतनं मूल्यम् रू. १–७५.**

# वेदान्तप्रक्रियाप्रत्यभिज्ञा

श्रीसच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीताया अस्याः प्रथमः संपुटः । अत्र खलु सर्वत्र वेदान्तेषु एकैव प्रक्रिया अध्यारोपापवादन्यायाभिख्या नानावेषधारिणी वेदान्ताभियुक्तैः प्रयुक्ताऽस्तीत्येतत् सुस्पष्टमादर्शितम् । अतिप्राचीनकालादारभ्य सङ्क्षेपशारीरकनिर्मातुः सर्वज्ञात्ममुनेः कालं यावत्, वृत्तिकारैः शङ्करभगवत्पादानुयायित्वेन प्रसिद्धैश्च उपस्थापितानि प्रस्थानान्तराणि तत्तद्ग्रन्थत एवोद्धृत्य दर्शितवाक्यानुवादपूर्वकं सुसमीक्षितानि यथा शाङ्करप्रस्थानाभिमतविशुद्धप्रक्रियाया सर्वश्रैष्ठ्यं हृदयङ्गमं भवेद् वाचकानाम् ॥

संस्कृतभूमिकया विस्तृतांग्लभूमिकयापि संयोजितो ग्रन्थः ॥

**डेमि अष्टपार्श्वात्मक ६७२+१८० पृष्ठमितस्यास्य**

**इदानींतनं मूल्यम् रू. १६–००.**

## अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

**(हासन जिल्ला, मैसूरु संस्थानम्, दक्षिण रेल्वे.)**

१०००—८–७–१९६५. अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्.

# शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

# BACK-TO-SHANKARA SERIES

*Editor and Commentator :*

SWAMI SATCHIDANANDENDRA SARASWATI.

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** – सटिप्पणभाष्ययुताः –

The Isa, Kena, Kathaka and Mundaka Upanishads and the Shikshavalli of the Taittiriya, critically edited separately with the Bhashya and Notes.

**आनन्दवल्ली भृगुवल्ली च** – सभाष्या, भाष्यार्थविमर्शिनीसहिता –

Anandavalli and Bhriguvalli with an elaborate original commentary. Contains a critical review of all mis-interpretations as also of objections of adverse schools.

**माण्डूक्यरहस्यविवृतिः** – उपनिषदो गौडपादकारिकाणां च अभिनवा व्याख्या –

This is the first attempt of its kind to present both Gaudapada and Shankara in their true perspective.

**सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या –

A New original sub-commentary on the Adhyasa Bhashya pointing out a straight and smooth way to the essentials of the Vedanta method. All later undesirable accretions cleared out of the way.

**सूत्रभाष्यार्थतत्त्वविवेचनी** –

A new commentary on Shankara's Bhashya bringing out the salient features of Shankara's system and its method. Written in the same lines as the Janmadyadhikarana.

*Apply for descriptive catalogue to –*

ADHYATMA PRAKASHA KARYALAYA,

HOLENARSIPUR (Hassan Dist., Mysore State).